
सारस्वती सुषमा

काशिकराजकीयसंस्कृतमहाविद्यालयमुखपत्रिका

[त्रैमासिकी]



भाद्रपूर्णिमा २०११

नवमवर्षे प्रथमद्वितीयाङ्कौ

सारस्वती सुषमा

काशिकराजकीयसंस्कृतमहाविद्यालयमुखपत्रिका

[त्रैमासिकी]



प्रधानसम्पादकः

श्रीकुबेरनाथशुक्लः, एम० ए०,

व्याकरणाचार्यः

सहायकसंपादकः

श्रीव्रजवल्लभद्विवेदो दर्शनाचार्यः



वार्षिकम्
७॥)

प्रत्यङ्कम्
१॥।=)

विषय-सूची

सारस्वती सुषमा

काशिकराजकीयसंस्कृतमहाविद्यालयपत्रिका

१. एषा देशे विदेशे च लब्धप्रसारा त्रैमासिकी संस्कृतपत्रिका ।

२. अस्याः प्रकाशनं प्रतिवर्षं ज्येष्ठभाद्रमार्गफाल्गुनपूर्णिमासु भवति ।

३. अस्याः प्रधानमुद्देश्यं संस्कृतज्ञेषु मौलिकानुसन्धानप्रवृत्तेः समालोचनाप्रवृत्तेरुद्बोधनं प्रोत्साहनं चास्ति ।

४. अस्यां सरस्वतीभवनस्य काशिकराजकीयसंस्कृतमहाविद्यालयस्य च विदुषामन्येषां च लेखकानां मौलिकविचारपूर्णा अनुसन्धानप्रधाना अन्यविधाश्चोपयोगिनो निबन्धाः प्रकाश्यन्ते ।

५. उपर्युक्तप्रकारा एव निबन्धाः प्रकाशनार्थं प्रेषणीयाः ।

६. फुलस्केपपरिमितेषु पत्रेष्वेकस्मिन् पार्श्व एव पर्याप्तं रिक्तं स्थानं (मार्जिन) दत्त्वा सुस्पष्टं शोभनाक्षरैर्लिखिता निबन्धा ग्राह्या भविष्यन्ति ।

७. निबन्धे संशोधनाधिकारः सम्पादकायत्तः ।

८. अस्वीकृता निबन्धाः प्रत्यावर्तनव्ययप्राप्तौ सत्यामेव परावर्तिताः स्युः ।

९. लेखकैः प्रकाशितनिबन्धस्य पञ्चविंशतिः प्रतिमुद्रणान्युपलब्धानि स्युः ।

१०. पत्रिकायाः प्रत्यङ्कं विशिष्टानां हिन्दीसंस्कृताङ्गलग्रन्थानां समालोचनाः प्रकाश्यन्ते ।

११. लेखकैः प्रकाशकैश्च समालोचनार्थं सम्पादकपार्श्वे ग्रन्थस्य द्वे प्रती प्रेषणीये ।

१२. अस्या वार्षिकं मूल्यं सार्द्धसप्तरूप्यकाणि प्रत्यङ्कं चाणकद्वयन्यूनं रूप्यकद्वयं वर्तते ।

१३. पत्रिकायाश्चतुर्थपञ्चमषष्ठवर्षीया अङ्का अर्धमूल्येन प्राप्तुं शक्यन्ते ।

१४. पत्रिकासम्बन्धी सर्वविधः पत्रव्यवहारः–"सम्पादक, सारस्वती सुषमा, राजकीयसंस्कृतमहाविद्यालय, बनारस २" इति संकेतेन विधेयः ।

सारस्वती सुषमा

काशिकराजकीयसंस्कृतमहाविद्यालयमुखपत्रिका

९ वर्षः } ज्येष्ठभाद्रौ २०११ { १-२ अङ्कौ

श्रुतिविमर्शः

कौषीतकिब्राह्मण आचारविचाराः

अथवा

कौषीतकिब्राह्मणपर्यालोचनम्

डाक्टरमङ्गलदेवशास्त्री, भूतपूर्वप्रधानाचार्यः, रा० सं० म०, काशी ।

निधानं यद्धि शक्तीनां सर्वासामन्ततो मतम् ।
आत्मरूपेण सर्वेषां भाति यत्तदुपास्महे ॥
निर्मलं शाश्वतं शान्तमवाङ्मनसगोचरम् ।
विद्यते यन्महत्तेजस्तन्मे नित्यं प्रकाशताम् ॥

नानाविधज्ञानविज्ञानप्रतिपादकत्वेनातिगभीरं सुविस्तृतं च खलु वैदिकं वाङ्मयमिति नाविदितं विदुषाम् । तस्यैव तत्तद्भागक्रमेण विचारणीयान् विवेचनीयाँश्च विषयानधिकृत्य प्रबन्धमालारूपेण प्रवृत्तोऽयं श्रुतिविमर्शो नाम महानिबन्धः । तस्यैवैतस्य महानिबन्धस्य ऐतरेयपर्यालोचने नाम प्रथमे निबन्धे ऐतरेयारण्यकवर्जमैतरेयब्राह्मणगताः, द्वितीये च ऐतरेयारण्यकपर्यालोचने नाम निबन्धे ऐतरेयारण्यकगता रीति-नीति-स्वर्ग-यज्ञस्वरूप-तत्त-द्देवतास्वरूप-तत्तत्पदार्थविज्ञानादिविषयका विचाराः संगृहीताः स्पष्टीकृताश्च पूर्वमस्माभिः ।

अस्मिन् पुनः कौषीतकिब्राह्मणपर्यालोचने नाम तृतीये निबन्धे ऋग्वेदीयं कौषीतकिब्राह्मणमधिकृत्य तादृशा एव विचाराः संग्रथ्यन्तेऽस्माभिः ।

अस्मिन् हि ब्राह्मणे त्रिंशदध्यायाः । अत एव "त्रिंशच्चत्वारिंशतोर्ब्राह्मणे संज्ञायां डण्" (पाणिनि० ५।१।६२) इत्यस्य सूत्रस्य "त्रिंशदध्यायाः परिमाणमेषां ब्राह्मणानां त्रैंशानि ब्राह्मणानि" इत्यस्मिन्नुदाहरणे त्रैंशानि ब्राह्मणानीत्यनेनास्य कौषीतकिब्राह्मणस्यैव ग्रहणमिति विदुषां मतम् ।

खेदस्यायं विषयो यदद्य यावद् ब्राह्मणस्यास्य किमपि भाष्यं विवरणं वा नैव मुद्रितम् । उपलभ्यते परं विनायकेन विदुषा निर्मितं प्रसन्नगम्भीरं तद्भाष्यं[1] हस्तलिखितं यत्र तत्र हस्तलिखितप्राचीनग्रन्थालयेषु । तथैव ए०बी०कीथनामकेन विपश्चिता कृतं तस्य इंग्लिशभाषान्तरमपि नाविदितं विदुषाम् । विषमस्थलेषु प्रायेण तयोरेव साहाय्येन लिखिताभिः क्वचित्क्वचित् स्वोपज्ञाभिरपि काभिश्चिट्टिप्पणीभिः समुपेतं पर्यालोचनमिदं प्रस्तुतीक्रियते ।

यद्यपि "कर्मचोदना ब्राह्मणानि" (आपस्तम्बयज्ञपरिभाषासूत्रम् ३२) इत्याद्युक्तेर्ब्राह्मणत्वेन कौषीतकिब्राह्मणग्रन्थस्यापि विधिप्रतिपादनमेव मुख्यो विषयः, तथापि प्रस्तुतेऽस्मिन् पर्यालोचने ग्रन्थस्य तस्य मुख्यप्रतिपाद्यविषयमपहाय, प्रथमे निबन्ध इव, प्रायेणार्थवादेषु निबद्धाः प्रसङ्गागतास्तदानीन्तनरीतिनीत्यादिपरिचायका एव विषयाः क्रमेण संगृहीता विमृष्टाश्च नूनं विदुषां मनस्तोषायेतिहासादिविषयकज्ञानवृद्धये च भवेयुरिति नो विश्वासः ।

तस्मिन्नेतस्मिन् पर्यालोचने क्रमेणोपनिबद्धा विषया एते—

(१) वाङ्मनसयोः स्वरूपं महिमा च ।

(२) जीवने समुन्नतेः श्रमस्य च महिमा ।

(३) सत्यभाषणादिसदाचारस्य ज्ञानस्य च प्रशंसा, पाप्मनो निन्दा च ।

---

१. तस्यादिमं पद्यद्वयमेवं पठ्यते—"विश्वोत्पत्तिनिदानमादिपुरुषं सर्वेश्वरं साक्षिणं, धर्मब्रह्मविधानवेदवदनं ब्रह्माण्डकोट्यन्तरम् । मीमांसायुगमानसं स्मृतिपदं भक्तानुकम्पास्पदं, श्रद्धाशुद्धधिया स्मरामि वरदं श्रीरामचन्द्राह्वयम् ॥ १ ॥ विद्यावदातप्रथितोरुकीर्तनश्रीमाधवस्वामिगुरोः प्रसादतः । कौषीतकिब्राह्मणभाष्यमादरात् करोमि माध्यन्दिनकौथुमानुगम् ॥ २ ॥"

कौषीतकिब्राह्मणपर्यालोचनम्

(४) संपत्तेर्महत्त्वं दारिद्र्यस्य निन्दा च ।

(५) दानमातिथ्यं च ।

(६) लौकिका दृष्टान्ताः ।

(७) यज्ञस्य महिमा स्वरूपं च, तथार्त्विज्यम् ।

(८) देवानां सामान्येन, तत्तद्देवानां पितॄणां गन्धर्वाणां रक्षसां देवासुराणां स्वर्गादिलोकानां च वर्णनम् ।

(९) अग्न्यादिपदार्थविज्ञानम् ।

(१०) मनुष्यस्य पश्चादेश्च स्वभावादिवर्णनम् ।

(११) प्रकीर्णकम् ।

(१) वाङ्मनसयोः स्वरूपं महिमा च

ऐतरेयब्राह्मण ऐतरेयारण्यक इव चास्मिन्नपि ब्राह्मणे वाङ्मनसयोः स्वरूपं महिमा च विविधरूपेण यत्र तत्र श्रूयते । तद्यथा—

अथो वाग्वै सार्पराज्ञी । वाग्घि सर्पतो राज्ञी । (कौ० ब्रा० २७।४)

वाग्घि सर्पतः प्राणिजातस्य राज्ञी । वाचा हि प्राणिजातं सनाथं भवति । तथा चोक्तं बृहदारण्यकोपनिषदि (४।३।५)—“अस्तमित आदित्ये याज्ञवल्क्य चन्द्रमस्यस्तमिते शान्तेऽग्नौ किंज्योतिरेवायं पुरुष इति । वागेवास्य ज्योतिर्भवतीति । वाचैवायं ज्योतिषास्ते……… ।” काव्यादर्शे तु सुतरां स्पष्टीकृतोऽयमर्थः । तथा हि—“वाचामेव प्रसादेन लोकयात्रा प्रवर्तते ॥ इदमन्धंतमः कृत्स्नं जायेत भुवनत्रयम् । यदि शब्दाह्वयं ज्योतिरासंसारं न दीप्यते ॥” (१।३–४)

उदीच्यां दिशि प्रज्ञाततरा वागुद्यते । उदञ्च उ एव यन्ति वाचं शिक्षितुम् । यो वा तत आगच्छति तस्य वा शुश्रूषन्त इति ह स्माह । एषा हि वाचो दिक् प्रज्ञाता । (कौ० ब्रा० ७।६)

तदत्र स्मृतिपथमायाति काशिकायां (१।१।७५) जयादित्येन समुद्धृतं प्राचीनं पद्यमेतत्—“प्रागुदञ्चौ विभजते हंसः क्षीरोदके यथा । विदुषां शब्दसिद्ध्यर्थं सा नः पातु शरावती ॥”

शालातुरीयस्य भगवतः पाणिनेराचार्यस्य उदग्देशाभिजनत्वं प्रसिद्धमेव । प्राचीनकाले तक्षशिलाया विश्वविद्यालयस्य ख्यातिः सुदूरदेशदेशान्तरेष्वपि प्रसृतासीत् ।

एतद्ध वा एकं वाचोऽनन्ववसितं पाप्मनो यन्निरुक्तम् । तस्मान्निरुक्तमनुब्रूयात् । (कौ० ब्रा० ११।१)

अनन्ववसितम् । असंबद्धम् । पाप्मन उच्चारणदोषेण । निरुक्तं स्पष्टम् ।

उच्चैर्निरुक्तमनुब्रूयात्प्रातरनुवाकम्—इत्येवात्र प्रकृतम् ।

जुष्टो वाचो भूयासं जुष्टो वाचस्पतेः । देवि वाग ! यत्ते वाचो मधुमत्तमं तस्मिन्नो अद्य धात् । स्वाहा सरस्वत्यै ।

(कौ० ब्रा०१०।६)

जुष्टः सेवितः । प्रीतिपात्रमिति यावत् । कृष्णयजुःसंहितायामपि श्रूयते—"जुष्टो वाचो भूयासं जुष्टो वाचस्पतये देवि वाक् । यद्वाचो मधुमत्तस्मिन् मा धाः स्वाहा सरस्वत्यै ॥" (३।१।१०।१)

पुरुषः सर्वा वाचो वदति, एकैकामितरे पशवः । (कौ० ब्रा० ३०।७)

सर्वा वाचो वदति । विविधपदार्थविषया वाचो वदतीति विनायकभाष्ये ।

रुचिता वै वाक् स्वयम् । (कौ० ब्रा० १४।५)

रुचिता दीप्तिमती ।

वागनुष्टुप् । (कौ० ब्रा० ५।६)

चतुष्पदा पूर्णा वागनुष्टुब् भवति । गायत्र्युष्णिहौ त्रिपदे इत्यपूर्णे । इयं पूर्णा । (विनायकः) ।

वागनुष्टुप् । वाचा यज्ञस्तायते । (कौ० ब्रा० ७।६)

वाग्दीक्षा । वाचा हि दीक्षते । प्राणो दीक्षितः । वाचा वै दीक्षया देवाः प्राणेन दीक्षितेन सर्वान् कामानुभयतः परिगृह्यात्मन्नदधत । तथो एवैतद् यजमानो वाचैव दीक्षया प्राणेन दीक्षितेन सर्वान् कामान् उभयतः परिगृह्यात्मन्धत्ते । (कौ० ब्रा० ७।१)

वाग्वा इन्द्रः । न ह्यृते वाचः पवते धाम किञ्चन । (कौ० ब्रा० २।७)

वाग्वै पथ्या स्वस्तिः । (कौ० ब्रा० ७।६)

वाग्वै विश्वामित्रः । वाचा यज्ञस्तायते । (कौ० ब्रा० १०।५)

वाचो विश्वामित्रत्वे हेतुरुच्यते—वाचा यज्ञस्तायत इति । यतो विश्वस्य कल्याणाय यज्ञो वाचा तायते ततो वाग्वै विश्वामित्र इति भावः ।

वाग्वै विश्वामित्रो । वाचैव तत्सर्वतो यज्ञं तन्वते । (कौ० ब्रा० २६।३)

वाग्वै सरस्वती । (कौ० ब्रा० ५।२)

वाग्वै सरस्वती । वाचा वा इदं स्वदितमन्नमद्यते । (कौ० ब्रा० १२।८)

वाचो जिह्वा स्थानम् । रसनेन्द्रियस्यापि जिह्वा स्थानम् । तेन वाचाद्यत इत्युक्तम्—इति विनायकः ।

वाग्वै होता । (कौ० ब्रा० १३।६)

वाचं ह वा एतदाप्याययन्ति यद् वाचंयमा आसत आपीनां वाचमभ्यासिक्तामन्तत ऋध्नवामेति । (कौ० ब्रा० २७।६)

ऋध्नवाम प्राप्नवाम । वाचः संयमेन आपीना पुष्टा वाग्भवतीत्यभिप्रायः ।

वाचं ह वा एतद्भूतान्याप्याययन्ति यद्वाचंयमानि शेरते, आपीनां वाचमव्या(भ्या)सिक्तां प्रथमत ऋध्नवामेति ।

(कौ० ब्रा० ११।८)

आपीनाम् । रात्रौ शयनेन यो विश्रमस्तेन पुष्टाम् । अभ्यासिक्ताम् आभिमुख्येनासिक्ताम् । अव्यासिक्ताम् इति पाठे तु अव्याक्षिप्तामित्यर्थः । ऋध्नवाम समर्धयाम । भूतानि (पशवो मनुष्या वयांसि) रात्रौ यद्वाचंयमानि शेरते तद्वाचः परिपुष्ट्यर्थमेवेति भावः ।

वाचा यज्ञस्तायते । (कौ० ब्रा० ७।६)

वीर्यवतीमाश्रितां देवेषु वाचमुद्यासम् । (कौ० ब्रा० २८।१)

उद्यासम् । प्राप्यासम् ।

सोऽयं पुरुषो यः प्राणिति वापानिति वा । न तत्प्राणेन नापानेनाहेति प्राणिषं वापानिषं वेति । वाचैव तदाह । तत्प्राणापानौ वाचमपीतो वाङ्मयौ भवतः । अथ यच्चक्षुषा पश्यति न तच्चक्षुषाहेत्यद्राक्षमिति । वाचैव तदाह । तच्चक्षुर्वाचमप्येति वाङ्मयं भवति । अथ

यच्छ्रोत्रेण शृणोति न तच्छ्रोत्रेणाहेत्यश्रौषमिति। वाचैव तदाह। तच्छ्रोत्रं वाचमप्येति वाङ्मयं भवति। अथ यन्मनसा सङ्कल्पयते न तन्मनसाहेति समचीक्लृपमिति। वाचैव तदाह। तन्मनो वाचमप्येति वाङ्मयं भवति। अथ यदङ्गैः सुशीमं वा दुःशीमं वा स्पृशति न तदङ्गैराहेति सुशीमं वा दुःशीमं वास्प्राक्षमिति। वाचैव तदाह। तत्सर्व आत्मा वाचमप्येति वाङ्मयो भवति। तदेतदृचाभ्युदितम्— "नेन्द्रादृते पवते धाम किञ्चन" (ऋ० ९।६९।६) इति। वाग्वा इन्द्रो न ह्यृते वाचः पवते धाम किञ्चन। (कौ० ब्रा० २।७)

वाचमपीतः। वाङ्मयौ वाक्प्रधानौ भवतः। सुशीमं सुप्रापम्। दुःशीमं दुःप्रापम्।

एतद्ध वा एकमक्षरं त्रयीं विद्यां प्रतिप्रति। (कौ० ब्रा० ६।१२)

एतदक्षरम्। ओ३मित्यक्षरम्। प्रतिप्रति। प्रतिनिधिरूपं प्रतीकरूपं वा।

ब्रह्म वै प्रणवः। (कौ० ब्रा० ११।४)

शुद्धः प्रणवः स्यात्प्रजाकामानाम्। मकारान्तः प्रतिष्ठाकामानाम्। मकारान्तः प्रणवः स्यादिति हैक आहुः। शुद्ध इति त्वेव स्थितः। मीमांसितः प्रणवोऽथात इह शुद्ध इह पूर्ण इति। शुद्ध एव प्रणवः स्याच्छस्त्रानुवचनयोर्मध्य इति ह स्माह कौषीतकिः, तथा संहितं भवति। मकरान्तोऽवसानार्थे, प्रतिष्ठा वा अवसानम्, प्रतिष्ठित्या एव (कौ० ब्रा० ११।५)

मकारान्तः प्रणवः स्यादिति। नित्यकर्मणीति शेषः। संहितं पूर्वोत्तरसंहितम्। शुद्धोऽनुनासिकेन मकारेण रहित इत्यर्थः। तु० "सव्यञ्जनः सानुस्वारः शुद्धो वापि स्वरोऽक्षरम्" इति ऋग्वेदप्रातिशाख्ये। शुद्धोऽनुस्वारेण रहित इति हि तत्र व्याख्यानम्।

एष ह वै यज्ञस्य व्यृद्धं समर्धयति य एताभिर्व्याहृतिभिः प्रायश्चित्तिं करोति।... सर्वं ह वा उ स वेद य एता व्याहृतीर्वेद। तद्यथा ह वै दारुणः श्लेष्मसंश्लेषणं स्यात् परिचर्मण्यं वैवमेवैता व्याहृतयस्त्रय्यै विद्यायै संश्लेषिण्यः। (कौ० ब्रा० ६।१२)

तदाहुर्यदृचा होता होता भवति यजुषाध्वर्युरध्वर्युः साम्नो-

द्गातोद्गाता केन ब्रह्मा ब्रह्मा भवतीति। यमेवामुं त्रय्यै विद्यायै तेजोरसं प्राबृहत्तेन ब्रह्मा ब्रह्मा भवति। (कौ० ब्रा० ६।११)

तेजोरसं भूर्भुवःस्वरितिव्याहृतिरूपमित्यर्थः।

प्रजापतिस्तपोऽतप्यत। स तपस्तप्त्वा प्राणादेवेमं लोकं प्राबृहत्। अपानादन्तरिक्षलोकम्। व्यानादमुं लोकम्। स एताँस्त्रींल्लोकानभ्यतप्यत। सोऽग्निमेवास्माल्लोकादसृजत। वायुमन्तरिक्षलोकात्। आदित्यं दिवः। स एतानि त्रीणि ज्योतींष्यभ्यतप्यत। सोऽग्नेरेवर्चोऽसृजत। वायोर्यजूंषि। आदित्यात्सामानि। स एतां त्रयीं विद्यामभ्यतप्यत। स यज्ञमतनुत। स ऋचैवाशंसत्। यजुषा प्रातरत्। साम्नोदगायत्। अथैतस्या एव त्रय्यै विद्यायै तेजोरसं प्राबृहदेतेषामेव वेदानां भिषज्यायै। स भूरित्यृचां प्राबृहत्। भुव इति यजुषाम्। स्वरिति साम्नाम्। (कौ० ब्रा० ६।१०)

प्राबृहत् वर्द्धितवान्। प्रातरत् अत्यन्तं विस्तीर्णवान्। तेजोरसं सारम्।

सर्वं ह वा उ स वेद य एता व्याहृतीर्वेद। तद्यथा ह वै दारुणः श्लेष्मसंश्लेषणं स्यात् परिचर्मण्यं वा। एवमेवैता व्याहृतयस्त्रय्यै विद्यायै संश्लेषण्यः। (कौ० ब्रा० ६।१२)

(वज्रो वै वषट्कारः।)........एते एव वषट्कारस्य प्रियतमे तनू यदोजश्च सहश्च। (कौ० ब्रा० ३।५)

प्रियतमे तनू निर्भर्त्सनशक्ती। (विनायकः)।

न ह वा ऋक् छन्दसा यातयामा भवति, नानुवचनेन। वषट्कारेणैव सा यातयामा भवति समानेऽहन्। (कौ० ब्रा० २२।१)

वज्रो वै वषट्कारः। (कौ० ब्रा० ३।५)

वषट्कारेण ह वा ऋग्यातयामा भवति समानेऽहन्। (कौ० ब्रा० ८।६)
वज्रो वै हिङ्कारः। वज्रेणैव तद्यजमानस्य पाप्मानं हन्ति। (कौ० ब्रा० ३।२)

वज्रो वै हिङ्कारः वज्रेणैव तद् यजमानस्य पाप्मानं हन्ति। उच्चैर्निरुक्तमनुब्रूयात्। (कौ० ब्रा० ११।१)

वज्रो हिङ्कारः । प्रतिकूलवर्जने व्यवहारात् । निरुक्तं स्पष्टम् । (विनायकः)

प्रतिष्ठा वै शंयोर्वाकः । (कौ० ब्रा० ३।८)

प्रतिष्ठा वै सूक्तवाकः । (कौ० ब्रा० ३।८)

प्राणा वै स्तवः । (कौ० ब्रा० ८।३)

ब्रह्म वै जपः । (कौ० ब्रा० ३।७)

अमृतं वा ऋक् ।......अथो ब्रह्म वा ऋक् । (कौ० ब्रा० ७।१०)

एतत्परिचरणावितरौ वेदौ । (कौ० ब्रा० ६।११)

एतत्परिचरणौ । एतस्य बह्वृचवेदस्य परिचरणौ । स्वाधारमस्माद् वेदाल्लभेते इत्युपजीविनाविति भावः । एतदेवाधस्ताद्विशेषतो व्याख्यायते ।

एतत्परिचरणावितरौ वेदौ । अत्र च भूयिष्ठा होत्रा आयत्ता भवन्तीति । ऋग्भिर्ग्रहा गृह्यन्ते । ऋक्षु सामानि गीयन्ते । (कौ० ब्रा० ६।११)

एतत्परिचरणौ । एतस्य बह्वृचस्य परिचरणभूतौ । अत्र ऋग्वेदे । होत्रा होतृकर्माणि होत्रका ऋत्विजो वा ।

प्राणा वै छन्दांसि । (कौ० ब्रा० ७।६)

अतिच्छन्दा वै प्रजापतिः । (कौ० ब्रा० २३।८)

ज्योतिर्वै गायत्री । तमः पाप्मा रात्रिः । तेन तज्ज्योतिषा तमः पाप्मानमपघ्नन्ति । (कौ० ब्रा० १७।६)

गायत्री ज्योतिरग्नेर्जातत्वात् । तमः पाप्मा रात्रिः । तमोहेतुत्वात्तमसः पाप्महेतुत्वात् परम्परासंबन्धादिति विनायकभाष्ये ।

ब्रह्म वै गायत्री । क्षत्रं त्रिष्टुप् । (कौ० ब्रा० ३।५)

पशवो वै जगती । जागताः पशवः । (कौ० ब्रा० ३०।२)

एकादशाक्षरा वै त्रिष्टुप् । त्रैष्टुभ इन्द्रः । (कौ० ब्रा० ३।२)

क्षत्रं वै त्रिष्टुप् । (कौ० ब्रा० ७।१०)

इन्द्रस्य त्रिष्टुबिति संहिताश्रुतेः । (विनायकः) ।

क्षत्रस्यैवैतच्छन्दो यत्त्रिष्टुप । (कौ० ब्रा० १०।५)

बलं वै वीर्यं त्रिष्टुप्। (कौ० ब्रा० ७।२)

पञ्चपदा पङ्क्तिः। पाङ्क्तो यज्ञः। पाङ्क्ताः पशवः। पाङ्क्तः पुरुषः। (कौ० ब्रा० १३।२)

पाङ्क्तो यज्ञः। यजमानश्चत्वार ऋत्विज इत्येवं पञ्चावयवो यज्ञः। पाङ्क्ताः पशवः। चतुर्भिः पादैर्मुखेन च योगात् पाङ्क्ताः पशवः। पाङ्क्तः पुरुषः। तदुक्तमैतरेयब्राह्मणे—"पाङ्क्तोऽयं पुरुषः पञ्चधा विहितो लोमानि त्वङ् मांसमस्थि मज्जा" (२।१४)।

मनसा हि मनः प्रीतम्, मनसा हि मनः प्रीतम्। (कौ० ब्रा० १०।६)

मनःप्रसादस्य मुख्यं कारणं स्वविचारा एवेति भावः। अथवा वास्तविकी मनः-प्रीतिर्भावाश्रिता एव भवति, वाङ्मात्रेण सा कर्तुं न शक्यत इति भावः। तदेतत्प्रपञ्चित-मस्माभिः स्वकीय-रश्मिमालायाः—"सुखस्य कारणं स्वान्तम्" (१३) इत्यस्मिन्नधिकरणे, 'भावसंशुद्धिः', 'मनःप्रसादः' इत्याख्ययोः प्रकरणयोश्च।

मनो वा अग्रणीर्भवत्येषां प्राणानाम्। (कौ० ब्रा० १७।७)

तदत्र दृश्यतां माध्यन्दिनशुक्लयजुर्वेदस्य चतुस्त्रिंशेऽध्याये—"तन्मे मनः शिव-संकल्पमस्तु" इत्येतत्प्रकरणम्।

मनो वा एतद्यदपरिमितम्। प्रजापतिर्वै मनः। यज्ञ उ वै प्रजापतिः। स्वयं वै तद्यज्ञो यज्ञस्य जुषते यन्मनो मनसः। (कौ० ब्रा० २६।३)

वाचि च वै मनसि चेदं सर्वं हितम्। (कौ० ब्रा० ६।३)

(२) जीवने समुन्नतेः श्रमस्य च महिमा

"कृधी न ऊर्ध्वाञ्चरथाय जीवसे" (ऋग्० १।३६।१४), "भद्रादभि श्रेयः प्रेहि" (ऐतरेयब्राह्मणे १।१३), "इन्द्र इच्चरतः सखा" (ऐतरेयब्रा० ७।१५) इत्येवं शतशः स्थलेषु श्रुतिषु समुन्नतेः श्रमस्य च महत्त्वमुद्घोष्यते। अस्मिन् ब्राह्मणेऽपि तन्महत्त्वं स्वकीयया कयाचिदसाधारणया शैल्या प्रतिपाद्यते। तथा हि—

अगर्तस्कन्द्यं रोहस्य रूपं स्वर्ग्यम्। (कौ० ब्रा० ११।४)

अगर्तस्कन्द्यमारोहस्य स्वर्ग्यं रूपम्। गर्तस्कन्दरहितमेवारोहणं जीवने प्रशस्तं मन्यत इति भावः।

ऊर्ध्वं वा उ वयं संवत्सरं रोहामः । (कौ० ब्रा० २६।१)

संवत्सरं संवत्सरमिति कृत्वा संवत्सरशो वा जीवने समुन्नत्या एव मानवैः प्रयतनीयमिति भावः । तथा चोक्तमस्माभिरेव रश्मिमालायाम्—"उत्तरोत्तरमुत्कर्षि जीवनं शाश्वतं हि नः । अस्पृष्टं तमसा चापि मोहरूपेण सर्वथा ॥" (२।७)

....कामान् ध्यायन्ते, यत्कामा भवन्त्ययं नः कामः समृध्यतामिति स उ हैभ्यः कामः समृध्यते । (कौ० ब्रा० २७।६)

तथा च श्रूयते गोपथब्राह्मणेऽपि—"स मनसा ध्यायेत्—यद्वा अहं किञ्चन मनसा ध्यास्यामि तथैव तद् भविष्यति । तद्ध स्म तथैव भवति ।" (१।१।६) इति ।

द्वन्द्वं वै वीर्यम् । (कौ० ब्रा० ८।७)

एकाक्ष्यपेक्षया द्वौ वीर्यवन्तौ । (विनायकः) । कस्यापि कार्यस्य सिद्धावन्यस्य साहाय्यमपेक्ष्यत एवेति निष्कर्षः ।

यथा तु प्रायणं तथोदयनम् । (कौ० ब्रा० ३०।१)

प्रायणं प्रारम्भः । उदयनं समाप्तिः ।

मितं ह वै मितेन जयत्यमितममितेन । (कौ० ब्रा० १०।१)

प्रयत्नानुसारेणैव फलस्य प्राप्तिर्भवतीति तात्पर्यम् ।

वाजी हि वाजी ।...वोढा हि वाजी ।........जिष्णुर्हि वाजी । (कौ० ब्रा० १७।४)

तथा च श्रूयते ऐतरेयब्राह्मणे—"वहति ह वै वह्निर्धुरो यासु युज्यते" (६।१८) ।

अन्तो गतिः । (कौ० ब्रा० २६।१४)

तदुच्यते—"प्रारब्धस्यान्तगमनं द्वितीयं बुद्धिलक्षणम् ।" अथवा—"प्रारभ्य तूत्तमजना न परित्यजन्ति ।" इति ।

अन्तो वै क्षयः । (कौ० ब्रा० ८।१)

क्षयो निवासस्थानम् । कार्यं समाप्यैव विश्रमोऽपेक्षणीय इति भावः ।

ऐतीव वा अन्तं गत्वा । कच्चिद्ध हि तत इयात् । (कौ० ब्रा० २६।१४)

पान्थोऽन्तं गत्वा पश्चादैतीव । आगन्तुकामो गतं निवृत्तमिति मन्यते । (विनायकः)

क्षियतीव वा अन्तं गत्वा । कच्चिद्ध हि तत इयात् । (कौ० ब्रा० २६।१५)

ध्रियतीव निवसतीव । गमनस्य निवृत्तेः ।

तिष्ठतीव वा अन्तं गत्वा । कम्यङ् हि तत इयात् । (कौ० ब्रा० २०।४)

कार्यान्तं गत्वा मनुष्यस्तिष्ठतीव । पश्चात् किञ्चिदञ्चित्वोद्दिश्य तत इयात् ।

नीव वा अन्तं गत्वा नृत्यति । कम्यङ् हि तत इयात् ।
(कौ० ब्रा० २०।४)

कार्यस्यान्तं गत्वा मनुष्यो निनृत्यतीव नर्तनमिव करोति । प्रसन्नतावशादिति भावः । "पश्चात् किञ्चिदपूर्वमञ्चन्नुद्दिश्य ततः स्थानादियात् । हि निश्चये । अन्तं गत्वा नृत्यतीव पुनरग्रे कार्यमारभत इत्युक्तं भवति" इति विनायकः ।

श्रियतीव वा अन्तं गत्वा । कम्यङ् हि तत इयात् ।
(कौ० ब्रा० २६।१५)

श्रियतीव तत्स्थानमाश्रयतीव ।

... दण्डोपानहं दक्षिणा । तदभयस्य रूपम् । (कौ० ब्रा० ४।३)

दण्डोपानहमिति । दण्डश्चोपानहौ च समाहारे द्वन्द्वः ।

रसो वा उदर्कः । (कौ० ब्रा० ११।५)

उदर्कः समाप्तिः । तच्छ्रूयतेऽत्रैव ब्राह्मणे—"नीव वा अन्तं गत्वा नृत्यति" (कौ० ब्रा० २०।४) ।

(३) सत्यभाषणादिसदाचारस्य ज्ञानस्य च प्रशंसा पाप्मनो निन्दा च

"अश्रद्धामनृतेऽदधाच्छ्रद्धां सत्ये प्रजापतिः" (यजु० १९।७७), "सा मा सत्योक्तिः परि पातु विश्वतः" (ऋग्० १०।३७।२), "तमसो मा ज्योतिर्गमय" (बृहदारण्यकोपनिषद् १।३।२८), "अपैतु सर्वं मत्पापम्" (अथर्व० १०।१।१०), "मा मा प्रापत्पाप्मा" (अथर्व० १७।१।२९) इत्येवं श्रुतिषु यत्र तत्र सत्योक्तेर्ज्ञानस्य च स्पृहणीयता, अनृतस्य पाप्मनश्च परिवर्जनीयता प्रतिपाद्यते । तदनुसारमेवास्मिन् ब्राह्मणेऽपि तादृशा अर्था यत्र तत्र साक्षाद्रूपेणासाक्षाद्रूपेण वा प्रतिपाद्यन्ते स्वकीयया विशिष्टपद्धत्या । तथा हि—

रात्र्या उ शीर्षन् सत्यं वदति । स यदि ह वा अपि तत ऊर्ध्वं

मृषा वदति, सत्यं हैवास्योदितं भवति। राज्या उ हि शीर्षन् सत्यं वदति।......अह्न उ शीर्षन् सत्यं वदति। स यदि ह वा अपि तत ऊर्ध्वं मृषा वदति, सत्यं हैवास्योदितं भवति। अह्न उ हि शीर्षन् सत्यं वदति। (कौ० ब्रा० २।८)

शीर्षन् शिरसि। मुख इति यावत्।

सत्यमयो ह वा अमृतमयः। संभवति य एवं वेद। (कौ० ब्रा० २।८)

संभवति। समृद्धिमाप्नोतीति भावः।

स यः सत्यं वदति स दीक्षित इति ह स्माह। (कौ० ब्रा० ७।३)

ज्योतिर्वै जागरितम्, तमः पाप्मा रात्रिः। तेन तज्ज्योतिषा तमः पाप्मानं तरन्ति। (कौ० ब्रा० १७।६)

तेन ज्योतिषा। जागरणेन। तथा हि श्रूयते—"यो जागार तमृचः कामयन्ते यो जागार तमु सामानि यन्ति" (ऋग्० ५।४४।१४)। तथा—"भूत्यै जागरणम्। अभूत्यै स्वपनम्" (यजु० ३०।१७)।

तमः पाप्मा रात्रिः। तज्ज्योतिषा तमः पाप्मानमपघ्नन्ति।

(कौ० ब्रा० १७।६)

अथो द्वयं वा इदं सर्वं स्नेहश्चैव तेजश्च। तदुभयमहोरात्राभ्यामाप्तम्। (कौ० ब्रा० १७।५)

"अथो द्वयं वा इदं सर्वं प्रेक्षावतो द्वयमीप्सितं स्नेहश्चैव तेजश्च। तदुभयमहोरात्राभ्यामाप्तम्। वर्तमाने क्तः। आप्यते।" इति विनायकभाष्यम्।

अत्र रघुवंशमहाकाव्ये दृश्यतां पद्यमेतत्—"भीमकान्तैर्नृपगुणैः स बभूवोपजीविनाम्। अधृष्यश्चाभिगम्यश्च यादोरत्नैरिवार्णवः॥" (१।१६)।

ईश्वरो विवक्तारं भ्रेषोऽन्वेतोः। (कौ० ब्रा० २७।१)

भ्रेषो नियमत्यागो विवक्तारं भ्रंशवाचिनमन्वेतोः पराभवाय अन्वेतुमीश्वरः समर्थः।.... नियमभ्रेषकारी (वि) वक्ता पराभवं प्राप्नोतीति निन्दा। (विनायकः)। अन्वेतोरित्यत्र—"ईश्वरे तोसुन्कसुनौ" (पाणिनि० ३।४।१३) इति तुमर्थे तोसुन्प्रत्ययः।

न ह वा अव्रतस्य देवा हविरश्नन्ति । तस्मादुपवसति । (कौ० ब्रा० ३।१)

तस्य व्रतमन्नमेवेच्छमानं न प्रत्याचक्षीतेति । (कौ० ब्रा० ६।८)

तस्य ईशाननामकस्य सहस्राक्षस्य । ईशानोऽन्नम् । तदेव नामात्र सहस्राक्षस्य महादेवस्य प्रजापतिना कृतमिति सन्दर्भः ।

तस्य व्रतमार्द्रमेव वासः परिदधीतेति । (कौ० ब्रा० ६।२)

तस्य भवनामकसहस्राक्षस्य । भव आपः । तदेव नामात्र सहस्राक्षस्य महादेवस्य प्रजापतिना कृतमिति सन्दर्भः ।

तस्य व्रतमुद्यन्तमेवैनं नेक्षेतास्तं यन्तं चेति । (कौ० ब्रा० ६।६)

तस्य महतो देवस्य सहस्राक्षस्य । महान् देव आदित्यः । तदेव नामात्र सहस्राक्षस्य महादेवस्य प्रजापतिना कृतमिति सन्दर्भः । एनमादित्यम् ।

तस्य व्रतं ब्राह्मणमेव न परिवदेदिति । (कौ० ब्रा० ६।४)

तस्य पशुपतिनामकस्य सहस्राक्षस्य । पशुपतिर्वायुः । तदेव नामात्र सहस्राक्षस्य महादेवस्य प्रजापतिना कृतमिति सन्दर्भः ।

तस्य व्रतं विमूर्त्तमेव नाश्नीयात्, मज्जानं चेति । (कौ० ब्रा० ६।७)

तस्य रुद्रनामकस्य सहस्राक्षस्य । रुद्रश्चन्द्रमाः । तदेव नामात्र सहस्राक्षस्य महादेवस्य प्रजापतिना कृतमिति सन्दर्भः ।

तस्य व्रतं सत्यमेव वदेत्, हिरण्यं च बिभृयादिति । (कौ० ब्रा० ६।६)

तस्याशनिनामकस्य सहस्राक्षस्य । अशनिरिन्द्रः । तदेव नामात्र सहस्राक्षस्य महादेवस्य प्रजापतिना कृतमिति सन्दर्भः ।

तस्य व्रतं सर्वमेव नाश्नीयादिति । (कौ० ब्रा० ६।३)

तस्य शर्वनामकस्य सहस्राक्षस्य । शर्वोऽग्निः । तदेव नामात्र सहस्राक्षस्य महादेवस्य प्रजापतिना कृतमिति सन्दर्भः ।

तस्य व्रतं स्त्रिया एव विवरं नेक्षेतेति (कौ० ब्रा० ६।५)

तस्य उग्रनामकस्य सहास्रक्षस्य । उग्रो देव ओषधयो वनस्पतयः । तदेव नामात्र सहस्राक्षस्य महादेवस्य प्रजापतिना कृतमिति सन्दर्भः ।

(४) संपत्तेर्महत्त्वं दारिद्र्यस्य निन्दा च

"हिरण्यवर्णां हरिणीं सुवर्णरजतस्रजाम् । चन्द्रां हिरण्मयीं लक्ष्मीं जातवेदो म आ वह ।। श्रियं देवीमुपह्वये श्रीर्मा देवी जुषताम् । (श्रीसूक्ते १,३) इत्येवं खलु श्रियः संपत्तेर्वा माहात्म्यमनेकधा श्रूयते श्रुतिशतेषु । "अशनाया वै पाप्मामतिः" (ऐतरेय-ब्राह्मणे २।२) इत्यादिप्रकारेण च क्षुधोपलक्षितदारिद्र्यस्य पाप्मत्वमुद्घोष्यते । अयमेवार्थोऽत्रापि ब्राह्मणे स्पष्टतया प्रतिपाद्यते । तद्यथा—

अन्तं वै श्रेष्ठी भजते । (कौ० ब्रा० ५।५)

श्रेष्ठं नाम धनं गुणाश्चास्य सन्तीति श्रेष्ठी । स सर्वान् भोजयित्वान्तं भजते—इति विनायकः । अथवा यः श्रेष्ठी स एव स्वसमीहितमाप्नोतीति भावः ।

एकस्था वै श्रीः । (कौ० ब्रा० १८।६)

"एकस्था वै श्रीः । एकस्मिन् स्वामिनि श्रीरितरे सेवकाः ।" (विनायकभाष्यम्) ।

तिष्ठन् वै वीर्यवत्तमः, तिष्ठन्वा उ श्रुतवदनतमः । (कौ० ब्रा० २८।१)

श्रुतवदनतमः । यस्य वदनं कथनमतीव सरलतया परैः श्रोतुं शक्यते ।

प्रतिष्ठा वै निधनम् । (कौ० ब्रा० २६।३)

बल एव तद्वीर्येऽन्ततः पशुषु च प्रतितिष्ठन्ति । (कौ० ब्रा० १७।६)

यं वै श्रेष्ठ्युपह्वयते स उपहूत इति ह स्माह । (कौ० ब्रा० २८।६)

श्रेष्ठी मुख्यः । इति ह स्माह । इत्याह स्म सर्वलोकः ।

सर्वं वै तद्यत्सहस्रम् । (कौ० ब्रा० ११।७)

(५) दानमातिथ्यं च

"सर्वो वा एष जग्धपाप्मा यस्यान्नमश्नन्ति", "अशितवत्यतिथावश्नीयात् यज्ञस्य सात्मत्वाय यज्ञस्याविच्छेदाय तद् व्रतम्" (अथर्व० ९।७।८, ९।८।८) इत्येवमनेकधा दानस्यातिथ्यस्य च महिमा श्रुतिषु गीयते । अस्मिन्नपि ब्राह्मणे तयोः श्रैष्ठ्यप्रतिपादनपराः श्रुतयो दृश्यन्ते । तद्यथा—

यो वा अन्नं विभजत्यन्ततः स भजते । (कौ० ब्रा० ३।६)

लोक इति शेषः ।

यो ह वै न सर्वं ददाति सर्वं ददानीति ब्रुवन् गर्तपत्यमेव तद्धीयते प्र वा मीयत इति ह स्माह। सहस्रं वैनमवरुन्ध इति ह स्माह कौषीतकिः। सर्वं वै तद्यत्सहस्रम्। (कौ० ब्रा० २५।१४)

धीयते आश्रयति। प्रमीयते वा। पत्यमिति—"कृत्यल्युटो बहुलम्" (पाणिनि० ३।३।११३) इति यत्। धी मी धातू दिवादी आत्मनेपदिनौ।.........अवरुन्धे आवृणुते। (विनायकः)।

रिरिचान इव वा एतस्यात्मा भवति यः सर्वं ददाति। (कौ० ब्रा० २५।१५)

रिरिचान इति कानच्प्रत्ययान्तं रूपम्।

शिरो वा एतद्यज्ञस्य यदातिथ्यम्। (कौ० ब्रा० ८।१)

आतिथ्यम्। आतिथ्येष्टिः।

(६) लौकिका दृष्टान्ताः

प्रतिपादयितुमिष्टानामर्थानाम्, विशेषतश्च गूढार्थानामप्रसिद्धार्थानां वा स्पष्टीकरणार्थं दृष्टान्तानामुपयोगः प्रायेण सर्वशास्त्रेषु सुप्रसिद्धः। बुद्ध्यतिशयमप्राप्ता अपि दृष्टान्तानां साहाय्येन दुरूहमपि तत्तदर्थं झटित्यवगन्तुमर्हन्ति। अत एवैतरेयब्राह्मण इवात्रापि तत्तत्प्रसङ्गेन नैके दृष्टान्ताः प्रयुक्ता दृश्यन्ते। तात्कालिकसामाजिकादिपरिस्थितेरवगमाय नूनं तेषामुपयोगितेति दृष्ट्याधस्तात्ते संगृह्यन्ते। तथा हि—

तद्यथा गाधाभ्यां तीर्थाभ्यां समुद्रमतीयात् तादृक् तत्। (कौ० ब्रा० २।६)

अतीयात्। एकतः प्रविश्यान्यतो निःसरेत्। (विनायकः)।

तद्यथा गिरिशिखराद् गर्तमभिप्रस्कन्देदेवं तत्...... । (कौ० ब्रा० २६।१)

अत्युच्चादतिनीचे पतनं विशेषेण दुरूहरूपं दुर्घटरूपं चेति भावः।

तद्यथा चतुःसमृद्धमेवं तत्। (कौ० ब्रा० ८।२)

तद्यथा चतुर्भिः समृद्धं भवति किञ्चिदेवं तत्।

तद्यथा जाताय स्तनमुपदध्यादेवं तत्।......यदा वै वर्धतेऽतिस्तनो वै तदा। (कौ० ब्रा० १३।२)

अतिस्तनः। अतिक्रान्तौ स्तनौ येन सः।

तद्यथान्यस्य सन्तमन्यस्मै हरेदेवं तत्। (कौ० ब्रा० १२।६)

तद्यथा पद्भ्यां क्षिप्रमध्वानमन्वियात् तादृक् तत्। (कौ० ब्रा० २।६)

तद्यथा भयेऽतिमुच्य मृत्युं यथातिमुमुचान एव। (कौ० ब्रा० १५।५)

तद्यथा भये सति अतिमुच्य मृत्युमतिक्रम्य। अतिमुमुचान एव। अतिमुक्त एव। मुमुचान इति लिटः कानच्।

तद्यथाभिर्ग्रासमन्नमद्यादेवं तत्। (कौ० ब्रा० २२।८)

तद्यथाभिरङ्गुलीभिर्ग्रासमन्नमद्यादेवं तत्।

तद्यथाभ्यागारमभि निनर्तं पुनः पुनः पाप्मानं निर्हण्यादेवमेव।···
(कौ० ब्रा० १७।८)

तद्यथाभ्यागारं गृहाभिमुखमभ्यस्तं निनृतं(?) पुनः पुनः क्रियमाणं पाप्मानं निर्हण्यादमङ्गलं निर्हत्य मङ्गलं कुर्यादेवमेव। (विनायकः)।

तद्यथा महाराजः पुरस्तात् सैनानीकानि प्रत्युह्याभयं पन्थानमन्वियादेवमेव··· । (कौ० ब्रा० ५।५)

सैनानीकानि। सेनानीकेषु भवानि तुरंगकरिरथप्रभृतीनि। प्रत्युह्य प्रापय्य।

तद्यथा राजानं वा राजमात्रं वा श्रान्तं वेश्म प्रपादयेयुरेवमेव······।
(कौ० ब्रा० २७।६)

राजानं सार्वभौमं राजमात्रं वेति विनायकभाष्ये। अन्ये तु राजमात्रं राजप्रतिनिधिमित्यर्थं इत्याहुः।

तद्यथा वंशेन वा मर्त्येन वा गर्तं संक्रामेदेवं······ । (कौ० ब्रा० ११।४)

वंशेन यष्ट्यादिना। मर्त्येन अन्यकरावलम्बनेन।

तद्यथाविदमित्याविर्नष्टं कुर्यादेवं तदाविष्कामान् करोत्यापमिति।
(कौ० ब्रा० १।५)

नष्टं पदार्थं यथा 'अविदम्' इत्येवं ब्रुवन्नर आविष्करोति तथैव 'आपम्' इति ब्रुवन् कामानाविष्करोतीत्यर्थः।

तद्यथा व्राजबाहुभ्यां परिजिग्रहीष्यन्नन्तरेणातिमुच्येत तादृक् तत्।
(कौ० ब्रा० २।६)

(सावशेषम्)

वैदिकच्छन्दःसङ्कलनम्

श्रीयुधिष्ठिरमीमांसकः, प्राच्यविद्याप्रतिष्ठानम्, मोतीझील, काशी।

आर्या मान्याः श्रोत्रिया विपश्चिद्वराः, विदितप्रायमेव भवतां वैदिकच्छन्दसां विस्तरः। येषु ग्रन्थेषु वैदिकच्छन्दसां प्रपञ्चः प्रपञ्च्यते, नहि तेषु सर्वाणि छन्दांसि समाननामानि समानपरिमाणानि च विद्यन्ते। विद्यते हि केषुचिद् ग्रन्थेषु केषाञ्चित् समानाक्षराणां नाम-भेदः, असमानाक्षराणां च समानं नाम। अपि च केषुचिच्छन्दोग्रन्थेषु छन्दसामल्पीयांस एवावान्तरभेदा निर्दिश्यन्ते, अपरेषु बंहिष्ठाः। नैतावदेव, अपि तु केचन वैदिकविद्वांसः कस्यचिन्मन्त्रस्य किञ्चिल्लक्षणमाश्रित्य छन्दोनाम निर्दिशन्ति, अपरेऽपरं लक्षणमाश्रित्य नामान्तरमाचक्षते। तत्रैकस्यैव मन्त्रस्य छन्दोनाम्नि भेदं दृष्ट्वा कृतधियोऽपि विभ्राम्यन्ति किं पुनरकृतधियः। अत एवात्र समुपलभ्यमानेभ्यो वैदिकच्छन्दःप्रतिपादकेभ्यो ग्रन्थेभ्य-श्छन्दसां सर्वोऽपि प्रपञ्चः संगृह्य प्रकाश्यते।

आसन् पुरा लक्षणत उद्देशतश्च वैदिकच्छन्दःप्रतिपादका भूयिष्ठा ग्रन्थाः, ये प्रायेणा-धुना कालकवलिताः। केवलं तेषु पञ्चषा एव ग्रन्थाः कथञ्चिदवशिष्टाः सम्प्रत्युपलभ्यन्ते। तेषामयं संक्षिप्तः परिचयः—

१-पिङ्गलसूत्रम्

ग्रन्थोऽयं तत्रभवता पिङ्गलाचार्येण वैयाकरणशिरोमणेः 'पाणिनेरनुजेनाष्टभिरध्यायै-र्निबद्धः। अत्र हि भगवता पिङ्गलेन ज्येष्ठभ्रातुः कृतिमनुसृत्य वैदिकानां लौकिकानां

---

१. तथा च सूच्यते भगवता पिङ्गलनागेन पाणिन्यनुजेन—"क्वचिन्नवकाश्चत्वारः" [छन्दःसूत्रे ३।३३] इति—षड्गुरुशिष्यविरचिता ऋक्सर्वानुक्रमणीटीका, पृ०-७०। ज्येष्ठभ्रातृभिर्विहिते व्याकरणेऽनुजस्तत्र भगवान् पिङ्गलाचार्यः……। द्र०पाणिनीयनाम्ना प्रसिद्धायाः शिक्षायाः शिक्षाप्रकाशटीकायाः प्रारम्भे (तत्र भगवता पाणिनिना प्रणीतानि मूलानि शिक्षासूत्राण्यस्माभिराचार्यापिशलिचन्द्रगोमिविरचितशिक्षासूत्रैः सह प्रकाशितानि)। एतद्विषयेऽस्मदीयः—"संस्कृत व्याकरणशास्त्रका इतिहास" नामा ग्रन्थोऽप्यवश्यं द्रष्टव्यः [पृ० १३२, १६०]।

चोभयेषां छन्दसां लक्षणानि सूत्रितानि । अतोऽयं ग्रन्थो लोकवेदसाधारणः । अत एवोच्यते—

'याष्षट् पिङ्गलनागाद्यैश्छन्दोविचितयः कृताः ।
तासां पिङ्गलनागीया सर्वसाधारणी तु सा ॥ इति ।

अत्र द्वितीयाध्यायमारभ्य चतुर्थाध्यायस्य सप्तमसूत्रपर्यन्तं वैदिकच्छन्दांसि प्रपञ्च्यन्ते । तत्रभवतः पिङ्गलनागस्य ग्रन्थोऽयं लोक एतादृशीं प्रतिष्ठां प्रसिद्धिं च जगाम, येनाद्य हिन्दीभाषायां तत्तत्प्रान्तीयासु च बह्वीषु प्राकृतभाषासु पिङ्गलशब्दश्छन्दःशास्त्रस्य पर्यायतां लब्धवान् ।

२–ऋक्प्रातिशाख्यम्

अयं ग्रन्थो भगवता शौनकेन प्रोक्तः । अत्र हि दाशतय्याः शिक्षा छन्दो व्याकरणं च प्रोच्यते । एतस्य षोडशसप्तदशाष्टादशेषु त्रिषु पटलेषु ऋग्वेदस्य छन्दसां लक्षणानि निरूप्यन्ते ।

३–ऋक्सर्वानुक्रमणी

इयमनुक्रमणी शौनकशिष्येण [2]तत्रभवता कात्यायनेन निबद्धा । अत्र हि छन्दसां लक्षणानि, अखिलस्यर्ग्वेदस्य प्रत्यृचं छन्दांसि च निर्दिश्यन्ते ।

४–निदानसूत्रम्

ग्रन्थमिमं भगवान् पतञ्जलिर्जग्रन्थ । अयं हि महाभाष्यकारात् पतञ्जलेः प्राचीनः । अयमेव च योगसूत्राण्यपि सूत्रयाञ्चकारेति केचन प्रतिजानते । अत्र हि प्रथमप्रपाठकस्यादिमेषु नवसु खण्डेषु छन्दसां लक्षणानि निबद्धानि । सूत्रमिदं छन्दोगानां विद्यते, अतोऽत्र प्राधान्येन सामवेदीयच्छन्दसां लक्षणानि निरुच्यन्ते ।

५–उपनिदानसूत्रम्

इमां लघुपुस्तिकां सामवेदस्य पदकारो भगवान् गार्ग्यः पुस्तकयाञ्चकार । इदमपि सूत्रं

---

१. लवपुरतः (लाहौरतः) प्रकाशितस्य निदानसूत्रस्य भूमिकायां [पृ० २५] कुतश्चिन्निर्दिष्टः श्लोकः ।

२. "ननु च एको हि शौनकाचार्यशिष्यो भगवान् कात्यायनः......" इति षड्गुरुशिष्यविरचितसर्वानुक्रमणी-टीकारम्भे ।

छन्दोगानामेव । अत्र हि प्राथमिकेषु त्रिष्वध्यायेषु छन्दसां लक्षणानि लक्ष्यन्ते, अपरेषु साम-वेदस्य प्रत्यृचं छन्दांसि निर्दिश्यन्ते ।

६–जानाश्रयी छन्दोविचितिः

इयं छन्दोविचितिर्जनाश्रयेण केनचिद् विदुषा विरचिता । अत्र वैदिकच्छन्दसां नामो-द्देश एव वर्तते । ग्रन्थोऽयं दक्षिणापथे तिरुपतिनगरे मुद्रितः ।

छन्दसामन्ये ग्रन्थाः

वैदिकच्छन्दःप्रतिपादका ये षड् ग्रन्थाः पुरस्तान्निर्दिष्टास्त एवेदानीमुपलभ्यन्ते । इतोऽन्ये बहवो वैदिकच्छन्दोनिरूपका ग्रन्थाः पुरा आसन्, ये खल्विदानीं नाम्नाऽपि न स्मर्यन्ते । वैदिकवाङ्मय इमे पुराणाश्छन्दःशास्त्रप्रतिपादका आचार्या नाम्ना स्मर्यन्ते—

१–यास्कः

आसीद् भगवान् यास्कः कस्यचिच्छन्दोग्रन्थस्य रचयितेति भगवतः पिङ्गलनागस्य—"उरोबृहतीति यास्कस्य" [३।३०] इति सूत्रेण सूच्यते । ऋक्प्रातिशाख्यस्य टीकाकार उव्वटोऽपि—"सर्वैश्छन्दोविचित्यादिभिः पिङ्गलयास्कसैतवप्रभृतिभिर्यत्सामान्येनोक्तं लक्षणम्" [ऋक्प्राति० काशीसं० पृ० १७] इत्यत्र छन्दोविचितकारं यास्कं सस्मार । निदानसूत्रान्तर्गतच्छन्दो-विचितेर्भाष्यकारो हृषीकेशापरनामा पेट्टाशास्त्री यास्कविरचितां तैत्तिरीयसर्वानुक्रमणीमष्टादश-कृत्व उज्जहार, तत्रैव—"द्वितीयश्चेत् स्कन्धोग्रीवी क्रौष्टुकेः, उरोबृहती वा स्यात्" इति सूत्रद्वय-मुद्धृतवान् । एतेनेदमपि स्पष्टीभवति यद् ऋक्सर्वानुक्रमणीवद् यास्कीयतैत्तिरीयसर्वानुक्रमण्या-मपि छन्दसां लक्षणानि प्रतिमन्त्रं छन्दसां निर्देशश्चासीदिति ।

२–क्रौष्टुकिः

छन्दोविचितिकारं भगवन्तं क्रौष्टुकिं पिङ्गलनागः—"स्कन्धोग्रीवी क्रौष्टुकेः" [३।२९] इति सूत्रे निर्दिदेश । यास्कोऽपि तैत्तिरीयसर्वानुक्रमण्याम्—"द्वितीयश्चेत् स्कन्धोग्रीवी क्रौष्टुकेः" इत्यत्र सस्मार ।

३–तण्डी

छन्दःसूत्रकारमाचार्यतण्डिनं भगवान् पिङ्गलः—"सतोबृहती तण्डिनः" [३।३१] इत्यस्मिन् सूत्र उदाजहार ।

४-सैतवः

छन्दःशास्त्रकारं सैतवनामानमाचार्यमृक्प्रातिशाख्यस्य भाष्यकार उव्वटः स्मृतवान् [द्र० यास्कप्रकरण उद्धृतं वचनम्] पिङ्गलाचार्योऽपि सैतवाचार्य्यं द्विः [५।१८, ७।१०] सस्मार।

५-काश्यपः

भगवन्तं छन्दःसूत्रकारं काश्यपं "सिंहोन्नता काश्यपस्य" [७।९] इति लौकिकच्छन्दःप्रकरणे पिङ्गलः स्मरति। काश्यपीयं छन्दःसूत्रं किं केवलं लौकिकच्छन्दःप्रतिपादकमुतोभयप्रतिपादकमिति न शक्यते याथातथ्येन वक्तुम्।

पिङ्गलच्छन्दःशास्त्रस्य भाष्यकारो यादवप्रकाशो भाष्यसमाप्तौ छन्दःशास्त्रवंशप्रतिपादकमिमं श्लोकमाह—

'छन्दोज्ञानमिदं भवाद्भगवतो लेभे सुराणां गुरुः
तस्माद् दुश्च्यवनस्ततोऽसुरगुरुर्माण्डव्यनामा ततः।
माण्डव्यादपि सैतव................स्ततः पिङ्गलः
तस्येदं यशसा गुरोर्भुवि धृतं प्राप्यास्म [द] द्यैः क्रमात्॥

तदनुसारमिमेऽपि छन्दःसूत्रकाराः स्मर्यन्ते—

६-भवः = शिवः

७-सुरगुरुः = बृहस्पतिः

८-दुश्च्यवनः = इन्द्रः

९-असुरगुरुः = शुक्रः

१०-माण्डव्यः

एषु माण्डव्यं भगवान् पिङ्गलोऽपि—"अन्यत्र रातमाण्डव्याभ्याम्" [७।३४] इत्यस्मिन् सूत्रे सस्मार।

११-रातः

पिङ्गलाचार्येण—"अन्यत्र रातमाण्डव्याभ्याम्" [७।३४] इत्यस्मिन् सूत्रे कश्चिच्

---

१. पण्डितभगवद्दत्तविरचितः "वैदिक वाङ्मयका इतिहास" नामा ग्रन्थो द्रष्टव्यः [ब्राह्मणारण्यकभाग पृ० २४६]।

वैदिकच्छन्दःसंकलनम्

छन्दःशास्त्रकारो रातनामाऽऽचार्यः स्मर्यते । किं "पदेषु पदैकदेशाः" [महाभाष्य] इति न्यायेनाऽऽजीगर्तिः शुनःशेपः कृत्रिमो वैश्वामित्रो देवरातः [द्र० ऋक्सर्वा०] स्मर्यत उतान्य इति न शक्यते वक्तुम् ।

इमे सर्वेऽप्याचार्याः पिङ्गलाचार्यात् तज्ज्येष्ठभ्रातुः पाणिनेश्च पुरातनाः । ऋक्सर्वानुक्रमणीकारः कात्यायनः पाणिनेः समकालिकः किञ्चिदूर्ध्वकालिको वा । भारतीयैतिहासिककालगणनानुसारं भगवान् पाणिनिर्विक्रमात् सप्तविंशतिशतेभ्यः प्राक्कालिकः । एतच्चास्माभिः स्वकीये "संस्कृत व्याकरणशास्त्रका इतिहास" नाम्नि ग्रन्थे निपुणतरमुपपादितम् ।

कृत्रिमैका सर्वानुक्रमणी

अस्त्येका शुक्लयजुषः सर्वानुक्रमणी । सा काण्वमाध्यन्दिनशाखाभेदाद् द्विधा भक्ता । एतस्याः कर्ता भगवान् कात्यायन इत्येके प्रतिजानते । परं नैषा कात्यायनविरचितर्क्सर्वानुक्रमणीवत् प्राचीना सुसंस्कृता च । तत्रैते हेतवः—

१. माध्यन्दिनसंहिताभाष्यकार उव्वटः स्वभाष्यारम्भे यजुषामृष्यादिनिर्देशविषय आह—

गुरुतस्तर्कतश्चैव तथा शातपथश्रुतेः ।
ऋषीन् वक्ष्यामि मन्त्राणां देवता छान्दसं च यत् ॥ इति ।

अत्रोव्वटेन सर्वानुक्रमण्या अनुल्लेखान्नासीत्तत्काल इयमिति सम्यक् शक्यत ऊहितुम् , अन्यथा ऋष्यादिनिर्देशे तत्साहाय्यं परित्यज्य गुरुतर्कशातपथश्रुत्यादीन् न निरदेक्ष्यत्, यद्वा प्राधान्येन तस्या नामाग्रहीष्यत् ।

२. अस्त्येका माध्यन्दिनीया वासिष्ठी शिक्षा (काशीतः प्रकाशिते शिक्षासंग्रह इयं मुद्रिता) । तस्या अयमाद्यः श्लोकः—

अथ शिक्षां प्रवक्ष्यामि वसिष्ठस्य मतं यथा ।
सर्वानुक्रममुद्धृत्य ऋग्यजुषोस्तु लक्षणम् ॥ इति ।

अत्र खलु ग्रन्थकृता ऋग्यजुषां निर्देशे कस्यचित् सर्वानुक्रमस्यानुक्रमणं प्रतिज्ञातम् । तत्र चास्याः शिक्षाया विद्यमानाया याजुषसर्वानुक्रमण्याः सह संमेलने क्रियमाणे प्रायेण भेदोप-

ग्रहाद् विस्पष्टं ज्ञायते यन्नैषा सा सर्वानुक्रमणी या वासिष्ठशिक्षायां स्मर्यत इति। अतोऽप्यस्याः शुक्लयाजुषसर्वानुक्रमण्या अर्वाचीनत्वं व्यक्तं द्योत्यते।

३. अपरश्चायं हेतुः—अस्याः शुक्लयाजुषसर्वानुक्रमण्या आद्येषु चतुर्ष्वध्यायेषु प्रतिमन्त्रमृषिदैवतच्छन्दांसि निरुच्य पञ्चमे छन्दसां लक्षणानि निर्दिष्टानि। तानि चर्क्सर्वानुक्रमणीतः शब्दशः संगृहीतानि। तत्रर्क्सर्वानुक्रमण्यां छन्दसामुद्देशानन्तरम्—"आद्ये तु सप्तवर्गे पादविशेषात् संज्ञाविशेषास्ताननुक्रामन्त एवोदाहरिष्यामः" इत्युक्तम्। तत 'उपरिष्टात् प्रत्यृचं छन्दोनिदशादुक्तसूत्रे भविष्यत्कालिकी क्रियोपपद्यते। अस्यां याजुषसर्वानुक्रमण्यामप्येतत्सूत्रमृक्सर्वानुक्रमणीवदेव पठ्यते, परं तत्र भविष्यत्कालिकी क्रिया न समञ्जसा। यतो ह्यस्यां याजुषसर्वानुक्रमण्यां प्रतिमन्त्रं छन्दसां निरूपणं पुरस्तादेव कृतम्, अतस्तत्र—"अनुक्रामन्त एवोदाहरिष्यामः" इत्यस्य स्थाने "अनुक्रामन्त एवोदाहृताः" इत्येवं पाठेन भवितव्यम्। अपि चास्यामाद्येषु चतुर्ष्वध्यायेष्वसकृन्निर्दिष्टानां दैव्यादीनां छन्दसां लक्षणानि न क्वचिन्निर्दिष्टानि। अतोऽपि ज्ञायते नैषा याजुषसर्वानुक्रमणी भगवतः कात्यायनस्य कृतिरिति। अत एवास्या अस्मिन् छन्दःसंकलने निर्देशोऽस्माभिर्न कृत इति।

छन्दोलक्षणम्

ऋक्सर्वानुक्रमण्यां छन्दोलक्षणमेवमुच्यते—"यदक्षरपरिमाणं तच्छन्दः" [उपो०] इति। अथर्ववृहत्सर्वानुक्रमण्यामपि—"छन्दोऽक्षरसंख्याव्यवच्छेदकमुच्यते" [उपो०] इत्युक्तम्। अनयोरयमर्थः—मन्त्राक्षराणामियत्ताबोधकं छन्दो भवति, अर्थाद् यस्य पदस्य श्रवणमात्रेण मन्त्राक्षरपरिज्ञानं भवति तदेव छन्दः। अर्थापत्त्येदमाकूतं भवति—यस्य पदस्य प्रयोगेण मन्त्राक्षराणामियत्ताया यथावज्ज्ञानं न भवति न तद्वास्तविकं छन्दोनाम भवितुमर्हति।

छन्दसां संक्षेपः

प्राधान्येन गायत्री-उष्णिग्-अनुष्टुब्-बृहती-पङ्क्ति-त्रिष्टुब्-जगत्यः सप्तैव वैदिकच्छन्दांसि। अस्य सप्तकस्यापि द्वौ भेदौ स्तः। एको यत्राक्षरगणनैव प्राधान्येनाश्रीयते। अपरो यत्राक्षरगणनया सह पादविभागो मुख्यत्वेनाश्रीयते। तत्र प्रथमस्य दैवी-आसुरी-प्राजापत्या-

---

१. प्राचीनेषु निरुक्तादिग्रन्थेषु अग्रे वक्ष्यमाण उपरिष्टाच्छब्देन निर्दिश्यते, न त्वधरताच्छब्देन। एवं पूर्वनिर्दिष्टं च पुरस्तादधस्ताद्वा शब्दाभ्याम्, न तूपरिष्टाच्छब्दात्।

आर्षी याजुषी-साम्नी-आर्ची-ब्राह्मीत्यष्टौ भेदाः (निदानसूत्रे प्राथमिकानि दैव्यादीनि चत्वार्येव छन्दांसि निर्दिष्टानि न त्वपराणि याजुषादीनि) । अपरस्य पादविशेषात् संज्ञाविशेषाः । तदुक्तं कात्यायनेन—"आद्ये तु सप्तवर्गे पादविशेषात् संज्ञाविशेषः" [ऋग्सर्वा० उपो०] इति ।

दैव्यादीनि छन्दांसि पादविभागरहितेषु याजुषमन्त्रेष्वेवोपयुज्यन्त इति केषाञ्चिन्मतम् । तच्च प्राचीनच्छन्दःशास्त्रापर्यालोचनमूलकमेव । अथर्ववेदीयबृहत्सर्वानुक्रमण्यां सामवेदीयोपनिदानसूत्रेषु च पादबद्धानामृचामपि तादृशच्छन्दसामसकृन्निर्देश उपलभ्यते । तथाहि अथर्ववेदीयाष्टादशकाण्डे चतुर्थसूक्ते सर्वेऽप्येकोननवतिः पादबद्धा ऋक्संज्ञका मन्त्राः सन्ति । तदुक्तं बृहत्सर्वानुक्रमण्याम्—

"एकोननवतिश्चैव यमेषु विहिता ऋचः" इति ।

अथर्ववेदीयपञ्चपटलिकायामप्येवं पठ्यते—

एकषष्टिश्च षष्टिश्च सप्ततिस्त्र्यधिकात् परः ।
एकोननवतिश्चैव यमेषु विहिता ऋचः ॥ इति ।

तत्रैतासु कासाञ्चिदृचां बृहत्सर्वानुक्रमण्यामेवं छन्दांसि निर्दिश्यन्ते—

अथर्व०	१८, ४, २७	याजुषी गायत्री ।
,,	१८, ४, ६७	द्विपदार्च्यनुष्टुप् ।
,,	१८, ४, ७१	आसुर्यनुष्टुप् ।
,,	१८, ४, ७२–७४	आसुर्यः पङ्क्तयः ।
,,	१८, ४, ७५	आसुरी गायत्री ।
,,	१८, ४, ८१	प्राजापत्यानुष्टुप् ।
,,	१८, ४, ८२	साम्नी बृहती ।
,,	१८, ४, ८५	आसुरी बृहती ।

एवमुपनिदानसूत्रेऽपि—"भगो न चित्रम्' [सा० पू० ५।२।२।३] इति त्रिपदाऽऽसुरी गायत्री" [पृ० १२] इत्येवं दैव्याद्यन्तर्गतमासुरीगायत्रीच्छन्दो निर्दिश्यते । "ऋच्यध्यूढं साम गीयते" इति वचनात् "भगो न चित्रम्" इत्यस्य सामसंहितान्तर्गतस्य मन्त्रस्यर्क्त्वं विस्पष्टम् । तदेवं पादबद्धास्वृक्षु दैव्यादीन्यक्षरच्छन्दांसि न प्रवर्तन्त इति वचनमज्ञानविजृम्भितमेव ।

दैव्यादीनि छन्दांसि प्रथमसप्तकस्यैव सन्ति नोत्तरयोः (उत्तरौ सप्तकावग्रे वक्ष्येते)। निदानसूत्रे तु द्वितीयसप्तकस्यापि दैव्यादयो भेदा निरूप्यन्ते ।

"एकाक्षरं वै देवानामवमं छन्द आसीत्, सप्ताक्षरं परम्" इति, "नवाक्षरमसुराणामवमं छन्द आसीत् पञ्चदशाक्षरं परम्" [ताण्ड्य० १२।१३।२७] इति च ब्राह्मणमपि प्रथमसप्तकस्यैव दैव्यादिविभागे प्रमाणम् । परन्तु दैवं छन्द एकाक्षरप्रभृत्युत्तरमेकैकाक्षरवृद्ध्या सप्ताक्षरपर्यन्तं वर्द्धते । आसुरं च पञ्चदशप्रभृत्युत्तरमेकैकाक्षरह्रासेन नवाक्षरपर्यन्तं ह्रसति । तदेवं वृद्धिह्रासौ न सम्यगुपपद्येते । यथा तु निदानसूत्र उत्तरसप्तकस्यापीमे भेदाः स्वीकृतास्तथेमौ वृद्धिह्रासौ सम्यगुपपद्येते । तथा हि—दैवं छन्द एकाक्षरप्रभृति द्वयोः सप्तकयोर्वर्धमाननश्चतुर्दशसंख्यापर्यन्तं वर्धते, आसुरं च पञ्चदशप्रभृति द्वयोः सप्तकयोर्ह्रसमानो द्विसंख्यापर्यन्तं ह्रसति ।

जगत्यनन्तरमतिजगती-शक्वरी-अतिशक्वरी-अष्टि - अत्यष्टि - धृति - अतिधृतीनां द्वितीयः सप्तको वर्गः । इमान्यतिच्छन्दांसीत्युच्यन्ते । तदनन्तरं कृति-प्रकृति-आकृति-विकृति-संकृति-अभिकृति-उत्कृतीनां तृतीयः सप्तको वर्गः । अनयोः सप्तकयोर्निदानसूत्रे नामान्तराणि सन्ति । ऋक्सर्वानुक्रमण्यां तृतीयो वर्गो न निर्दिश्यते ।

तत्र गायत्री चतुर्विंशत्यक्षरा । उत्तरोत्तरं प्रतिच्छन्दश्चत्वार्यक्षराणि वृद्धिमापद्यन्ते । तदेवमुत्कृतिसंज्ञकं परमं छन्दश्चतुरुत्तरशताक्षरं भवति ।

निदानसूत्र-उपनिदानसूत्र-ऋक्प्रातिशाख्य-जानाश्रयीछन्दोविचितिषु चतुरक्षरमारभ्याविंशत्यक्षरं पञ्च गायत्र्याः प्राञ्चि छन्दांसि निरूप्यन्ते, परं तत्रैषां नाम्नि विसंवाद उपलभ्यते ।

निदानसूत्र-ऋक्प्रातिशाख्ययोः पूर्वोक्तानां सर्वेषामपि (गायत्र्याः प्राचाम्, त्रयाणां सप्तकानां च) द्व्यूनानां छन्दसां हर्षिकादीनि संज्ञान्तराणि निर्दिष्टानि । तत्र निदानसूत्रे पुनरिमानि कृत्यादीनि हर्षिकादीनि च द्विधा विभज्यन्ते—पूर्णाक्षराणि, एकाक्षरन्यूनानि च । तत्र पूर्णाक्षराणि कृत्यादीनि कृतसंज्ञकानि, एकाक्षरन्यूनानि कृत्यादीनि त्रेतासंज्ञकानि, द्व्यक्षरोनानि च हर्षिकादीनि द्वापरसंज्ञकानि, तेष्वेकाक्षरोनानि कलिच्छन्दांस्यभिधीयन्ते ।

दैव्यादीनि छन्दांसि विहायान्यानि सर्वाण्यपि छन्दांसि नियमत उत्तरोत्तरं चतुरक्षरं वृद्धिमापद्यन्ते ।

निदानसूत्र-ऋक्प्रातिशाख्य-ऋक्सर्वानुक्रमणीषु केचन बार्हतादयः प्रगाथा अपि निर्दि-

श्यन्ते। प्रकर्षेण ग्रथनं गानं वा प्रगाथ इति हि तस्य यौगिकोऽर्थः। यत्र हि समुदाये नियमेन द्वे द्वे छन्दसी विद्येते (क्वचित्त्रीण्यपि, यथा—आनुष्टुभे प्रगाथे) तत्रादिच्छन्दोऽनुरोधेन तस्य तस्य प्रगाथस्य संज्ञा क्रियते। तदुक्तं भगवता पाणिनिना—"सोऽस्यादिरिति छन्दसः प्रगाथेषु" (अष्टा० ४।२।५५) इति। यथा—बृहतीसतोबृहत्योर्बार्हतः प्रगाथः, एवं सर्वत्र।

एतेषां सर्वेषामपि छन्दसां विस्तरो यथालक्षणं यथाशास्त्रं च द्रष्टव्यम्। अत्र तु प्राङ्निर्दिष्टेभ्यः पञ्च ग्रन्थेभ्यो यथालक्षणं प्रतिच्छन्दः पादाक्षरसंख्या निर्दिश्यते। तद्भेदेन च गायत्र्यादीनां येऽवान्तरभेदाः संपद्यन्ते तेषां निदर्शनमेवास्माकं मुख्योऽभिप्रायः। अतोऽत्र छन्दसां लक्षणानि नोच्यन्ते, न चात्र किञ्चिदप्यलक्षणमुच्यते। अत एतेषां लक्षणानि यथाशास्त्रं वेदितव्यानि।

यथालक्षणं यथाशास्त्रं च बहुधा संशोधितेऽप्यस्मिन् छन्दःसंकलने दृष्टिदोषादनवधानादज्ञानाद्वा क्वचिदन्यथा लेखो भवेत्तद् विपश्चिद्भिर्यैः संशोधनीयमिति प्रार्थये। यतो हि—

गच्छतः स्खलनं क्वापि भवत्येव प्रमादतः।
हसन्ति दुर्जनास्तत्र समादधति सज्जनाः॥

इति हि महाजनपरिगृहीतः पन्थाः।

इतोऽग्रे यथाक्रमं छन्दःप्रपञ्चो द्रष्टव्यः—

---

१. सोऽस्यादिरिति सूत्रवृत्तौ जयादित्य आह—"प्रगाथशब्दः क्रियानिमित्तकः क्वचिदेव मन्त्रविशेषे वर्तते। यत्र द्वे ऋचौ प्रग्रथनेन तिस्रः क्रियन्ते स प्रग्रथनात् प्रकर्षगानाद्वा प्रगाथ इत्युच्यते" इति। इदमत्रावधेयम्—अस्ति हि द्विविधः प्रगाथः। एक ऋक्साम्नोर्ऋक्षु श्रूयमाणः, अपर सामगाने। तत्रर्क्षु नहि क्वचिदपि द्वे ऋचौ तिस्रः क्रियन्ते। सामगाने तु—"यद्योन्यां गायति तदुत्तरयोर्गायति" इति ब्राह्मणवचनेन प्रतिसामगानं तिस्र ऋचोऽपेक्ष्यन्ते। तदर्थं साम्न उत्तरार्चिके प्रायेण तृच एव पठ्यन्ते, परन्तु यत्र क्वचिदुत्तरार्चिके द्वृचः श्रूयन्ते तत्र सामगाननियमस्यान्यथानुपपत्त्या द्वयोर्ऋचोः केषाञ्चित् पदानां पुनराश्रयणेन तयोरेवर्चोस्तिस्र ऋचः संपाद्यन्ते। अयमपि प्रगाथनाम्ना व्यवह्रियते। अस्य विस्तरः सामवेदीयब्राह्मणेषु मीमांसाया नवमेऽध्याये च द्रष्टव्यः। पाणिनिसूत्रे स्मृतः प्रगाथस्तु प्राथमिक ऋक्षु श्रूयमाण एव। अतः सामगान उपयुज्यमानस्य प्रगाथस्यात्र ग्रहणं जयादित्यस्याज्ञानमूलकमेव।

अथ वैदिकच्छन्दसां

	अक्षराणि	पिङ्गल०	ऋक्प्राति०
गायत्र्याः प्राक्छन्दांसि	४	×	मा
	८	×	प्रमा
	१२	×	प्रतिमा
	१६	×	उपमा
	२०	×	समा
गायत्र्यादिप्रथमसप्तकम्	२४	गायत्री	पि
	२८	उष्णिक्	ङ्ग
	३२	अनुष्टुप्	ल
	३६	बृहती	व
	४०	पङ्क्तिः	दे
	४४	त्रिष्टुप्	व
	४८	जगती	
अतिजगत्यादिद्वितीयसप्तकम्	५२	अतिजगती	पि
	५६	शक्करी	ङ्ग
	६०	अतिशक्करी	ल
	६४	अष्टिः	व
	६८	अत्यष्टिः	दे
	७२	धृतिः	व
	७६	अतिधृतिः	
कृत्यादितृतीयसप्तकम्	८०	कृतिः	पि
	८४	प्रकृतिः	ङ्ग
	८८	आकृतिः	ल
	९२	विकृतिः	व
	९६	संकृतिः	दे
	१००	अभिकृतिः	व
	१०४	उत्कृतिः	

प्रपञ्चः

	निदान०		उपनिदान०		जानाश्रयी०		ऋक्सर्वा०
....	कृतिः	....	उक्तम्	....	उक्तम्	....	×
....	प्रकृतिः	...	अत्युक्तम्	....	अत्युक्तम्	....	×
....	संकृतिः	....	मध्या	....	मध्यमम्	....	×
....	अभिकृतिः	....	प्रतिष्ठा	....	प्रतिष्ठा	....	×
....	उत्कृतिः (आकृतिः, पा०)		सुप्रतिष्ठा	....	सुप्रतिष्ठा	....	×
....	पि	....	पि	....	पि	....	पि
....	ङ्ग	....	ङ्ग	....	ङ्ग	....	ङ्ग
....	ल	....	ल	....	ल	....	ल
....	व	....	व	....	व	....	व
....	दे	....	दे	....	दे	....	दे
....	व	....	व	....	व	....	व
....		....		....		....	
....	विधृतिः	....	पि	....	पि	....	पि
....	शक्वरी	....	ङ्ग	....	ङ्ग	....	ङ्ग
....	अष्टिः	....	ल	....	ल	....	ल
....	अत्यष्टिः	....	व	....	व	....	व
....	अंहः (मंहना)	....	दे	....	दे	....	दे
....	सरित्	....	व	....	व	....	व
....	सम्पा	....		....		....	
....	सिन्धुः	....	पि	....	पि	....	×
....	सलिलम्	....	ङ्ग	....	ङ्ग	....	×
....	अम्भः	....	ल	....	ल	....	×
....	गगनम्	....	व	....	व	....	×
....	अर्णवः	....	दे	....	दे	....	×
....	आपः	....	व	....	व	....	×
....	समुद्रः	....		....		....	×

विराट्

गायत्र्याः प्राचां विराजः

अक्षराणि	ऋक्प्राति०	निदान०
२	हर्षीका	हर्षीका
६	सर्षीका	सर्षीका (शर्षीका)
१०	मर्षीका	मर्षीका (सर्षीका)
१४	सर्वमात्रा	सर्वमात्रा
१८	विराट्	विराट्

प्रथमसप्तकस्य विराजः

अक्षराणि	ऋक्प्राति०	निदान०
२२	(ता)राट्	राट्
२६	विराट्	सम्राट्
३०	स्वराट्	विराट्
३४	सम्राट्	स्वराट्
३८	स्ववशिनी	स्ववशनी
४२	परमेष्ठी	परमेष्ठा
४६	प्रतिष्ठा	अन्तस्था

निदानसूत्रानुसारं	गायत्र्याः प्राश्चिच्छन्दांसि					प्रथमसप्तकच्छन्दांसि						
छन्दोनामानि	कृतिः	प्रकृतिः	संकृतिः	अभिकृतिः	उत्कृतिः	गायत्री	उष्णिक्	अनुष्टुप्	बृहती	पङ्क्तिः	त्रिष्टुप्	जगती
कृतच्छन्दसामक्षराणि	४	८	१२	१६	२०	२४	२८	३२	३६	४०	४४	४८
त्रेताच्छन्दसामक्षराणि	३	७	११	१५	१९	२३	२७	३१	३५	३९	४३	४७
छन्दोनामानि	हर्षीका	सर्षीका	मर्षीका	सर्वमात्रा	विराट्	राट्	सम्राट्	विराट्	स्वराट्	स्ववशनी	परमेष्ठा	अन्तस्था
द्वापरच्छन्दसामक्षराणि	२	६	१०	१४	१८	२२	२६	३०	३४	३८	४२	४६
कलिच्छन्दसामक्षराणि	१	५	९	१३	१७	२१	२५	२९	३३	३७	४१	४५

छन्दांसि		गायत्री	उष्णिक्	अनुष्टुप्	बृहती	पङ्क्तिः	त्रिष्टुप्	जगती
दैवी	छ	१	२	३	४	५	६	७ } [1]
आसुरी	न्द	१५	१४	१३	१२	११	१०	९ }
प्राजापत्या		८	१२	१६	२०	२४	२८	३२
आर्षी	सा	२४	२८	३२	३६	४०	४४	४८
याजुषी	म	६	७	८	९	१०	११	१२
साम्नी	क्ष	१२	१४	१६	१८	२०	२२	२४
आर्ची	रा	१८	२१	२४	२७	३०	३३	३६
ब्राह्मी	णि	३६	४२	४८	५४	६०	६६	७२

---

१. एकाक्षरं वै देवानामवमं छन्द आसीत्, सप्ताक्षरं परमम्।
नवाक्षरमसुराणामवमं छन्द आसीत्, पञ्चदशाक्षरं परमम्॥ [ताण्ड्य० १२।१३।२७]

छन्दांसि

द्वितीयसप्तकस्य विराजः			तृतीयसप्तकस्य विराजः		
अक्षराणि	ऋक्प्राति०	निदान०	अक्षराणि	ऋक्प्राति०	निदान०
५०	प्रत्नम्	प्रत्नम्	७८	अर्णः	अर्णः
५४	अमृतम्	अमृतम्	८२	अंशः	अंशः
५८	वृषा	वृषा	८६	अम्भः	अम्भः
६२	शुक्रम्	जीवम्	९०	अम्बु	अम्बु
६६	जीवम्	तृप्तम्	९४	वारि	वारि
७०	पयः	रसम्	९८	आपः	आपः
७४	तृप्तम्	शुक्रम्	१०२	उदकम्	उदकम्

द्वितीयसप्तकच्छन्दांसि

विधृतिः	शक्करी	अष्टिः	अत्यष्टिः	अंहः	सरित्	सम्पा
५२	५६	६०	६४	६८	७२	७६
५१	५५	५९	६३	६७	७१	७५
प्रत्नम्	अमृतम्	वृषा	जीवम्	तृप्तम्	रसम्	शुक्रम्
५०	५४	५८	६२	६६	७०	७४
४९	५३	५७	६१	६५	६९	७३

तृतीयसप्तकच्छन्दांसि

सिन्धुः	सलिलम्	अम्भः	गगनम्	अर्णवः	आपः	समुद्रः
८०	८४	८८	९२	९६	१००	१०४
७९	८३	८७	९१	९५	९९	१०३
अर्णः	अंशः	अम्भः	अम्बु	वारि	आपः	उदकम्
७८	८२	८६	९०	९४	९८	१०२
७७	८१	८५	८९	९३	९७	१०१

विधृतिः	शक्करी	अष्टिः	अत्यष्टिः	अंहः	सरित्	सम्पा
८	९	१०	११	१२	१३	१४
८	७	६	५	४	३	२
३६	४०	४४	४८	५२	५६	६०
५२	५६	६०	६४	६८	७२	७६

गायत्र्यादिजगत्यन्तानां दैव्यादयो भेदा; पिङ्गलऋक्प्रातिशाख्यनिदानोपनिदानसूत्रेषु समाना दृश्यन्ते। याजुष्यादयो भेदा निदानसूत्रवर्जमन्येषु समानाः। निदानसूत्रे याजुष्यादयो न सन्ति। विधृत्यादिसम्पान्तानां दैव्यादयो भेदा निदानसूत्र एव समुपलभ्यन्ते ॥

गायत्र्याः

पादाक्षरसंख्या		पूर्णाक्षरसंख्या		पिङ्गल०	
८ । ८ । ८	....	२४	....	गायत्री	....
७ । ७ । ७	....	२१	....	पादनिचृत्	....
६ । ८ । ७	....	२१	....	अतिपादनिचृत्	....
६ । ७ । ८	....	२१	....	वर्धमाना	....
८ । ६ । ८	....	२२	....	×	....
८ । ७ । ६	....	२१	....	प्रतिष्ठा	....
६ । ९ । ९	....	२४	....	वाराही	....
९ । ९ । ६	....	२४	....	नागी	....
१२ । ८	....	२०	....	द्विपाद् विराट्	....
११ । ११ । ११	....	३३	....	त्रिपाद् विराट्	....
६ । ६ । ६ । ६	....	२४	....	चतुष्पात्	....
७ । १० । ७	....	२४	....	यवमध्या	....
९ । ६ । ९	....	२४	....	पिपीलिकमध्या	....
५ । ६ । ६ । ६	....	२३	....	शङ्कुमती	....
६ । ६ । ७	....	१९	....	×	....
७ । ६ । ७	....	२०	....	×	....
५ । ५ । ५ । ४ । ६	....	२५	....	×	....
५ । ५ । ५ । ५ । ६	....	२६	....	×	....
५ । ५ । ५ । ५ । ५	....	२५	....	×	....
६ । ७ । ११	....	२४	....	×	....
८ । १० । ७	....	२५	....	×	....
१२ । १२	....	२४	....	×	....
१० । १०	....	२०	....	×	....
९ । ९	....	१८	....	×	....
८ । ८	....	१६	....	×	....
८	....	८	....	×	....

प्रपञ्चः

ऋक्प्राति०	ऋक्सर्वा०	निदान०	उपनिदान०
गायत्री	गायत्री	गायत्री	गायत्री
पादनिचृत्	पादनिचृत्	×	पादनिचृत्
×	×	×	×
वर्धमाना	वर्धमाना	×	वर्धमाना
,, (एकेषाम्)	×	×	×
×	प्रतिष्ठा	×	प्रतिष्ठा
×	×	×	×
×	×	×	×
×	×	×	×
×	×	×	×
चतुष्पात्	×	चतुष्पात्	चतुष्पात्
यवमध्या	यवमध्या	×	×
×	×	×	×
×	×	×	शङ्कुमती
अतिनिचृत्	ह्रसीयसी	×	×
अतिनिचृत्	अतिनिचृत्	×	×
पदपङ्क्तिः	पदपङ्क्तिः	×	×
भुरिक्पदपङ्क्तिः	पदपङ्क्तिः	×	×
भुरिक्पदपङ्क्तिः	×	×	×
उष्णिग्गर्भा	उष्णिग्गर्भा	×	×
भुरिग्गायत्री	×	×	×
द्विपदा	×	×	×
×	×	×	विराट्
×	×	×	स्वराट्
×	×	द्विपदा	द्विपदा
×	×	×	एकपदा

उष्णिहः

पा० सं०	पू० सं०	पिङ्गल०	ऋक्प्राति०
८ । १२ । ८	२८	ककुप्	ककुप्
१२ । ८ । ८	२८	पुरउष्णिक्	पुरउष्णिक्
८ । ८ । १२	२८	परोष्णिक्	उष्णिक्
७ । ७ । ७ । ७	२८	चतुष्पात्	(चतुष्पात्) उष्णिक्
११ । १२ । ४	२७	×	ककुम्न्यङ्कुशिरा
११ । ११ । ६	२८	×	तनुशिरा
११ । ६ । ११	२८	×	पिपीलिकमध्या
५ । ८ । ८ । ८	२९	(शङ्कुमती)	अनुष्टुब्गर्भा

अनुष्टुभः

पा० सं०	पू० सं०	पिङ्गल०	ऋक्प्राति०
१२ । १२ । ८	३२	त्रिपात्	कृतिः
१२ । ८ । १२	३२	त्रिपात्	पिपीलिकमध्या
८ । १२ । १२	३२	त्रिपात्	×
८ । ८ । ८ । ८	३२	चतुष्पात्	अनुष्टुप्
९ । १२ । ९	३०	×	काविराट्
९ । १० । १३	३२	×	नष्टरूपा
१० । १० । १०	३०	×	विराट्
११ । ११ । ११	३३	×	विराट्
५ । ५ । ५ । ५ । ५ । ६	३१	×	महापदपङ्क्तिः

प्रपञ्चः

	ऋक्सर्वा०		निदान०	उपनिदान०
....	ककुप्	....	ककुप्	ककुप्
....	पुरउष्णिक्	....	पुरउष्णिक्	पुरउष्णिक्
....	उष्णिक्	....	उष्णिक्	परोष्णिक्
....	उष्णिक्	....	(चतुष्पात्) उष्णिक्	चतुष्पात्
....	ककुम्न्यङ्कुशिरा	....	×	×
....	तनुशिरा	....	×	×
....	पिपीलिकमध्या	....	×	×
....	अनुष्टुग्गर्भा	....	×	शङ्कुमती

प्रपञ्चः

	ऋक्सर्वा०		निदान०		उपनिदान०
....	कृतिः	....	उपरिष्टाज्ज्योतिः (बह्वृचाः)		उपरिष्टाज्ज्योतिः
....	पिपीलिकमध्या	....	पिपीलिकमध्या मध्येज्योतिः (बह्वृचाः) }		मध्येज्योतिः
....	×	....	पुरस्ताज्ज्योतिः (बह्वृचाः)		पुरस्ताज्ज्योतिः
....	अनुष्टुप्	....	(चतुष्पात्) अनुष्टुप्	....	अनुष्टुप्
....	काविराट्	....	×	....	×
....	नष्टरूपा	....	×	....	×
....	विराड्	....	×	....	×
....	विराट्	....	×	....	×
....	महापदपङ्क्तिः	....	×	....	×

४   ३३

बृहत्याः

पा० सं०	पू० सं०	पिङ्गल०	ऋक्प्राति०
८ । ८ । १२ । ८	३६	पथ्या	×
८ । १२ । ८ । ८	३६	न्यङ्कुसारिणी स्कन्धोग्रीवी (क्रौष्टुकिः) उरोबृहती (यास्कः)	न्यङ्कुसारिणी स्कन्धोग्रीवी उरोबृहती
८ । ८ । ८ । १२	३६	उपरिष्टाद्बृहती	उपरिष्टात्०
१२ । ८ । ८ । ८	३६	पुरस्ताद्बृहती	पुरस्तात्०
९ । ९ । ९ । ९	३६	बृहती	बृहती
१० । १० । ८ । ८	३६	बृहती	×
१२ । १२ । १२	३६	महाबृहती	विराडूर्ध्वबृहती
१२ । १२ । १२	३६	सतोबृहती (ताण्डी)	×
८ । १० । १० । ८	३६	×	विष्टारबृहती
१३ । ८ । १३	३४	×	पिपीलिकमध्या
९ । ८ । ११ । ८	३६	×	विषमपदा
८ । ८	१६	×	×
१० । १०	२०	×	×

पङ्क्त्याः

पा० सं०	पू० सं०	पिङ्गल०	ऋक्प्राति०
१२ । ८ । १२ । ८	४०	सतोबृहती	सतोबृहती
८ । १२ । ८ । १२	४०	सतोबृहती	विपरीता
८ । ८ । १२ । १२	४०	आस्तार०	आस्तार०
१२ । १२ । ८ । ८	४०	प्रस्तार०	प्रस्तार०
१२ । ८ । ८ । १२	४०	संस्तार०	संस्तार०
८ । १२ । १२ । ८	४०	विष्टार०	विष्टार०
८ । ८ । ८ । ८ । ८	४०	पथ्या	पङ्क्तिः
५ । ५	१०	(अल्पशः) अक्षरपङ्क्तिः	×
५ । ५ । ५ । ५	२०	अक्षरपङ्क्तिः	×
५ । ५ । ५ । ५ । ५	२५	पदपङ्क्तिः	×
४ । ६ । ५ । ५ । ५	२५	पदपङ्क्तिः	×
१० । १० । १० । १०	४०	×	विराट्
८ । ८ । ८ । ८ । ८ । ८	४८	जगतीपङ्क्तिः	×
१२ । ८	२०	×	×
१० । १० । १०	३०	×	×

प्रपञ्चः

ऋक्सर्वा०	निदान०	उपनिदान०
बृहती	पथ्या	पथ्या (सिद्धेत्येके)
न्यङ्कुसारिणी	न्यङ्कुसारिणी	न्यङ्कुसारिणी
स्कन्धोग्रीवी	स्कन्धोग्रीवी[1]	स्कन्धोग्रीवी
उरोबृहती	उरोबृहती	उरोबृहती (यास्कः)
उपरिष्टात्०	उपरिष्टात्०	उपरिष्टात्०
पुरस्तात्०	पुरस्तात्०	पुरस्तात्०
बृहती	बृहती	बृहती
×	×	बृहती
ऊर्ध्वबृहती	त्रिपदा	महाबृहती (एके)
×	सतोबृहती	सतोबृहती
विष्टारबृहती	×	×
पिपीलिकमध्या	×	×
विषमपदा	×	×
×	×	? (द्विपदा)
×	×	? (द्विपदा)

१. "तां पथ्येत्याचक्षते, अपि च स्कन्धोग्रीवीति" इति निदानसूत्रस्य पाठक्रमः। तथा सति पथ्याया एव नामान्तरं स्कन्धोग्रीवीति विज्ञायते। परन्तु सर्वग्रन्थसंतुलनेन न्यङ्कुसारिण्या एव नामान्तरं स्कन्धोग्रीवी प्रतीयते। अत्र कदाचिन्निदानसूत्रे पाठविपर्यासः संजातः स्यात्॥

प्रपञ्चः

ऋक्सर्वा०	निदान०	उपनिदान०
सतोबृहती	सिद्धाविष्टार०	सतोबृहती, सिद्धा वा विष्टार० (ताण्डी)
विपरीता	विपरीता	सतोबृहती, सिद्धा वा विष्टार० (ताण्डी)
आस्तार०	आस्तार०	आस्तार०
प्रस्तार०	प्रस्तार०	प्रस्तार०
संस्तार०	संस्तार०	संस्तार०
विष्टार०	विष्टार०	विष्टार०
पङ्क्तिः	पङ्क्तिः	पथ्या
×	(द्विपदा) अक्षरपङ्क्तिः	अक्षरपङ्क्तिः (क्वचित्)
×	(चतुष्पदा) अक्षरपङ्क्तिः	अक्षरपङ्क्तिः
×	पञ्चपदा-पदपङ्क्तिः	×
×	×	पदपङ्क्तिः
विराट्	×	विराट्
×	×	×
×	द्विपदा	विराट्, विष्टारपङ्क्तिर्वा; द्विपदा (ताण्डी)
×	×	विराट्

त्रिष्टुभः

पा० सं०	पू० सं०	पिङ्गल०	ऋक्प्राति०	
११ । ८ । ८ । ८ । ८	४३	पुरस्ताज्ज्योतिः	×	....
८ । ८ । ११ । ८ । ८	४३	मध्येज्योतिः	×	....
८ । ८ । ८ । ८ । ११	४३	उपरिष्टाज्ज्योतिः	×	....
११ । ११ । ११ । ११	४४	×	चतुष्पदा त्रिष्टुप्	....
१२ । १२ । ११ । ११	४६	×	त्रिष्टुप् (त्रैष्टुभे सूक्ते)	....
१० । १० । १२ । १२	४४	×	अभिसारिणी	....
६ । ६ । १० । ११	३६	×	विराट्स्थाना	....
१० । १० । ६ । ११	४०	×	विराट्स्थाना	....
६ । १० । ११ । ११	४१	×	विराट्स्थाना	....
११ । ११ । ११ । ८	४१	×	विराड्रूपा	....
१२ । १२ । १२ । ८	४४	×	ज्योतिष्मती	....
१२ । १२ । १२ । ८	४४	×	उपरिष्टाज्ज्योतिः	....
८ । १२ । १२ । १२	४४	×	पुरस्ताज्ज्योतिः	....
१२ । ८ । १२ । १२ १२ । १२ । ८ । १२	४४	×	मध्येज्योतिः	....
८ । ८ । ८ । ८ । १२	४४	×	×	....
१२ । ८ । ८ । ८ । ८	४४	×	महाबृहती	....
८ । ८ । १२ । ८ । ८	४४	×	यवमध्या०	....
१० । १० । ८ । ८ । ८	४४	×	पङ्क्त्युत्तरा	....
१० । १० । ८ । ८ । ८	४४	×	विराट्पूर्वा	....
८ । ८।८ । ८ । ८	४०	×	×	....
११ । ११	२२	×	×	....
११	११	×	×	....

जगत्याः

पा० सं०	पू० सं०	पिङ्गल०	ऋक्प्राति०	
८ । ८ । ८ । ८ । १२	४४	उपरिष्टाज्ज्योतिः	×	....
१२ । ८ । ८ । ८ । ८	४४	पुरस्ताज्ज्योतिः	×	....
८ । ८ । १२ । ८ । ८	४४	मध्येज्योतिः	×	....
८ । ८ । ८ । ८ । ८ । ८	४८	(षट्पदा) जगती	महापङ्क्तिः	....
८ । ८ । ७ । ६ । १० । ६	४८	×	महापङ्क्तिः	....
१२ । १२ । १२ । १२	४८	×	जगती	....
१२ । १२ । ११ । ११	४६	×	उपजगती (जागतसूक्ते)	
८ । ८ । ८ । १२ । १२	४८	×	×	....
१२ । ८ । १२ । ८ । ८	४८	×	महासतोबृहती	....
६।६।६।६।६।६।६।६	४८	×	×	....
१२ । १२	२४	×	×	....
१२	१२	×	×	....
। । । । ८	४८	×	×	....

प्रपञ्चः

ऋक्सर्वा०	निदान०	उपनिदान०
×	×	पुरस्ताज्ज्योतिः
×	×	मध्येज्योतिः
×	×	उपरिष्टाज्ज्योतिः
त्रिष्टुप्	त्रिष्टुप्	×
त्रिष्टुप् (त्रैष्टुभे सूक्ते)	×	×
अभिसारिणी	×	×
विराट्स्थाना	×	×
विराट्स्थाना	×	×
×	×	×
विराड्रूपा	×	×
ज्योतिष्मती	ज्योतिष्मती	×
उपरिष्टाज्ज्योतिः	×	×
पुरस्ताज्ज्योतिः	×	×
मध्येज्योतिः	×	×
महाबृहती	(पञ्चपदा) त्रिष्टुप्	त्रिष्टुप्
×	×	×
यवमध्या	×	×
पङ्क्त्युत्तरा	×	×
विराट्पूर्वा	×	×
×	पञ्चपदा	×
×	द्विपदा	द्विपदा
×	एकपदा	एकपदा

प्रपञ्चः

ऋक्सर्वा०	निदान०	उपनिदान०
×	×	उपरिष्टाज्ज्योतिः
×	×	पुरस्ताज्ज्योतिः
×	×	मध्येज्योतिः
महापङ्क्तिः	(षटपदा) जगती	(षट्पदा) जगती
महापङ्क्तिः	×	×
जगती	जगती	×
जगती (जागतसूक्ते)	×	×
महासतोबृहती	(पञ्चपदा) जगती	जगती
×	×	×
×	विष्टारपङ्क्तिः प्रवृद्धपदा	×
×	द्विपदा	द्विपदा
×	एकपदा	एकपदा
×	ज्योतिष्मती[1]	×

१. अवशिष्टेषु चत्वारिंशदक्षरेषु पादकल्पसिद्धहनीया [नि० सू० ३०] ।

		गायत्री	उष्णिक्	अनुष्टुप्	बृहती	पङ्क्तिः	त्रिष्टुप्
देवताः	ऋग्वेद(१०।१३०।४-५)	अग्निः	सविता	सोमः	बृहस्पतिः	मित्रावरुणौ	इन्द्रः
	पिङ्गल०	अग्निः	सविता	सोमः	बृहस्पतिः	,, [1]	इन्द्रः
	ऋक्प्राति०	अग्निः	सविता	सोमः	बृहस्पतिः	वसवः	इन्द्रः
	उपनिदान०	अग्निः	सविता	सोमः	बृहस्पतिः	मित्रावरुणौ वसवो वा	इन्द्रः
वर्णः	पिङ्गल०	सितः	सारङ्गः	पिशङ्गः	कृष्णः	नीलः	लोहितः
	ऋक्प्राति०	श्वेतः	सारङ्गः	पिशङ्गः	कृष्णः	नीलः	लोहितः
	उपनिदान०	शुक्लः	सारङ्गः	कृष्णः	रोहितः	नीलः	सुवर्णम्
गोत्रम्	पिङ्गल०	आग्निवेश्यम्	काश्यपम्	गौतमम्	आङ्गिरसम्	भार्गवम्	कौशिकम्

प्रगाथाः—	बार्हतः	काकुभः
ऋक्प्राति०	बृहती+सतोबृहती	ककुप्+सतोबृहती
ऋक्सर्वा०	बृहती+सतोबृहती	ककुप्+सतोबृहती
निदान	बृहती+सिद्धा।विष्टारपङ्क्तिः	ककुप्+सिद्धा।विष्टारपङ्क्तिः

ऋक्प्रातिशाख्योक्ता अवशिष्टाः प्रगाथाः

उष्णिक्	+	सतोबृहती	=	औष्णिहः	ककुप्	+	त्रिष्टुप्	=	काकुभत्रैष्टुभः
बृहती	+	जगती	=	बार्हतः	अनुष्टुप्	+	त्रिष्टुप्	=	आनुष्टुभत्रैष्टुभः
बृहती	+	अतिजगती	=	बार्हतः	बृहती	+	त्रिष्टुप्	=	बार्हतत्रैष्टुभः
बृहती	+	यवमध्या (त्रिष्टुप्)	=	बार्हतः	त्रिष्टुप्	+	जगती	=	त्रैष्टुभजागतः जगत्युत्तरस्त्रैष्टुभो वा
गायत्री	+	बृहती	=	गायत्रबार्हतः					
गायत्री	+	ककुप्	=	गायत्रकाकुभः	जगती	+	त्रिष्टुप्	=	त्रिष्टुबुत्तरो जागतः
ककुप्	+	पङ्क्तिः	=	पाङ्क्तकाकुभः					
अनुष्टुप्	+	जगती	=	अनुष्टुप्पूर्वो जगत्यन्तः					
द्विपदा	+	बृहती	=	द्विपदापूर्वो बृहत्युत्तरः					
ककुप्	+	बृहती	=	काकुभबार्हतः					
अनुष्टुप्	+	उष्णिक्	=	आनुष्टुभौष्णिहः					
अनुष्टुप्	+	पङ्क्तिः	=	आनुष्टुभपाङ्क्तः					
बृहती	+	अनुष्टुप्	=	बार्हतानुष्टुभः					

---

१. ऋक्संहितायाम्—"विराण्मित्रावरुणयोः" [१०।१३०।५] इति श्रवणाद् विराजो मित्रावरुणौ देवते इति मत्वा शौनक आह—"न पङ्क्तेः, सा तु वासवी" [ऋक्प्रा० १७।७–८]। अर्थाद् ऋङ्मन्त्रे पङ्क्तेर्देवता न निर्दिष्टा, तस्या वसवो देवता ज्ञेया इति। पिङ्गलस्तु ऋङ्मन्त्रे विराट्पदेन पङ्क्तेरुल्लेख इति मत्वा तस्या मित्रावरुणौ देवते इति निर्दिदेश। अनयोः पिङ्गलमतमेव युक्तं प्रतिभाति, यतो विराट् शब्देन १० संख्या निर्दिश्यते। यस्मिश्छन्दसि सर्व एव पादा विराजस्तत् १०×४=४० विराट्पङ्क्तिनाम्ना ऋक्प्रातिशाख्यसर्वानुक्रमण्युपनिदानसूत्रकारैर्निर्दिश्यते। तदेवं "पदेषु पदैकदेशाः" इति न्यायेनात्र मन्त्रे विराट्शब्देन विराट्पङ्क्तिरेव गृह्यते।

जगती	अतिच्छन्दाः	विच्छन्दाः	द्विपदाः	एकपदाः	विराट्	निचृत्	भुरिक्
विश्वेदेवाः	×	×	×	×	×	×	×
विश्वेदेवाः	×	×	×	×	×	×	×
विश्वेदेवाः	प्रजापतिः	वायुः	पुरुषः	ब्रह्म			
विश्वेदेवाः	प्रजापतिः	वायुः	पुरुषः	ब्रह्म	आदित्याः[1]		
गौरः	×	×	×	×	×	×	×
सुवर्णम्	अरुणम्	श्यामः	गौरः	बभ्रुः	पृश्निः	श्यावः	पृषत्[2]
गौरः	×	×	बभ्रुः	नकुलः	पृश्निः[3]	×	×
वासिष्ठम्	×	×	×	×	×	×	×

महाबार्हतः	आनुष्टुभः	विपरीतान्तो	विपरीतोत्तरो वा
महाबृहती+महासतोबृहती	अनुष्टुप्+गायत्री+गायत्री	बृहती+विपरीता (पङ्क्तिः)	(विपरीतान्तः)
महाबृहती+महासतोबृहती	अनुष्टुप्+गायत्री+गायत्री	बृहती+विपरीता	(विपरीतोत्तरः)
× ×	अनुष्टुप्+गायत्री+गायत्री	× ×	×

छन्दसां स्वराः

प्रथमसप्तकम्	द्वितीयसप्तकम्	तृतीयसप्तकम्	स्वराः	दयानन्दभाष्यानुसारम्
१ गायत्री	१४ अतिधृतिः	१५ कृतिः	षड्जः	उत्कृतिः
२ उष्णिक्	१३ धृतिः	१६ प्रकृतिः	ऋषभः	अभिकृतिः
३ अनुष्टुप्	१२ अत्यष्टिः	१७ आकृतिः	गान्धारः	संकृतिः
४ बृहती	११ अष्टिः	१८ विकृतिः	मध्यमः	विकृतिः
५ पङ्क्तिः	१० अतिशक्वरी	१९ संकृतिः	पञ्चमः	आकृतिः
६ त्रिष्टुप्	९ शक्वरी	२० अभिकृतिः	धैवतः	प्रकृतिः
७ जगती	८ अतिजगती	२१ उत्कृतिः	निषादः	कृतिः

पिङ्गलसूत्रेषु प्रथमसप्तकस्यैव स्वरो निर्दिश्यते नान्ययोः।

[4]न वा एकाक्षरेण छन्दांसि वियन्ति न द्वाभ्याम् [ऐ० ब्रा० १।६:२।३७]।

एकाक्षरन्यूनम्	=	निचृद्	एकाक्षराधिकम्	=	भुरिक्
द्व्यक्षरन्यूनम्	=	विराट्	द्व्यक्षराधिकम्	=	स्वराट्

१. ककुभामपि सविता देवता विज्ञेयः। २. याजुषी-साम्नी-आर्ची-ब्राह्मीनां कपिलम्।

३. अतोऽन्येषां छन्दसां श्यावो वर्णः, ककुभां तु पिशङ्गः।

४. नाक्षराच्छन्दो व्येत्येकस्मान्न द्वाभ्याम् [शत० १२।२।३।३]।
न ह्येकाक्षरेणान्यच्छन्दो भवति न द्वाभ्याम् [कौ०ब्रा० २७।१]।

पाणिनीयच्छान्दससूत्रालोचनम्

श्रीरामशङ्करभट्टाचार्यः, काशी ।

मैत्र्या प्रशान्तं दयया शरण्यं वदान्यमूर्त्तिं मुदिताबलेन ।
शब्दार्थसंबन्धरहस्यविज्ञं सुश्रद्धया पाणिनिमानतोऽस्मि ॥
वेदसूत्रविचारेऽस्मिन् सुदुस्तरमहार्णवे ।
व्याख्यातृचरणाः सर्वे कर्णधारा भवन्तु मे ॥

(१)

पाणिनिप्रणीतायामष्टाध्याय्यां यथा लौकिकशब्दविषयकमनुशासनं विद्यते, तथा वैदिकशब्दविषयकमपि दृश्यते । वैदिकशब्दानुशासनं खलु पाणिनेरेकं वैशिष्टयमिति प्रसिद्धमेव । अत्र च वैदिकसूत्रविषये किमपि नवीनं वस्तु विचार्यते समासेन । तथा हि—

(क) सर्वेषु प्रकरणेषु लौकिकसूत्रस्थापनानन्तरमेव वैदिकसूत्राणामुपन्यासः कृत आचार्येण । यद्यपि शब्ददृष्टया वैदिकशब्दा लौकिकशब्देभ्योऽभ्यर्हिततरा इति वैदिकशब्दानामेवादावन्वाख्यानं युक्तम्, तथाप्यधिकप्रयोजनवत्त्वादेवादौ लौकिकसूत्राण्युपस्थापितानि । यतो हि वैदिकशब्दा नितरां व्याकरणानुशासनपराङ्मुखाः, अतो व्याकरणदृशा लौकिकशब्दा एव वैदिकशब्दापेक्षया महत्त्वपूर्णा इति कृत्वा प्रयोजनाधिक्याल्लौकिकशब्दा एवादावन्वाख्याताः[१] । किञ्च, अभ्यर्हितत्त्वानुसारेणैव पदार्थानां क्रमिकं स्थापनं कर्तव्यमिति न सार्वत्रिको नियमः ; प्रयोजनीयताधिक्येनापि पदार्थक्रमविन्यासः क्रियत आचार्यैरिति प्राचीनरीतिसिद्धो व्यवहारः (दृश्यतां मधुसूदनसरस्वतीकृतसिद्धान्तबिन्दोः १ श्लोकः) । अपि च सन्ति वादिनो ये वेदज्ञानार्थं व्याकरणस्यावश्यकतां नोररीकुर्वन्ति । यथोक्तं श्रीमता कुमारिलेन—

---

१. व्याकरणदृष्ट्या वैदिकशब्देभ्यो लौकिकशब्दानां प्राधान्यमस्तीति कैयटेन व्यक्तं प्रतिपादितं पस्पशायाम् । किश्च—"न हि च्छन्दांसि क्रियन्ते, नित्यानि च्छन्दांसि" [४।३।१०१ भा०] इत्युक्तं पतञ्जलिना । अतश्छन्दसि व्याकरणाधिकारो लोकापेक्षया लघुतर इति कथनमुचितमेव ।

"तस्माद् वेदरक्षार्थं तावन्नाध्येयं व्याकरणम्" [तन्त्रवार्त्तिकं काशीसंस्क० पृ० २०५] इति ।

(ख) येषु सूत्रेषु 'छन्दः'-पदं विद्यते तान्येव सूत्राणि वैदिकानि नेतराणीत्यपि नाव्यभिचारी नियमः । 'इन्धिभवतिभ्यां च' [१।२।६] इति सूत्रे न छन्दःपदं विद्यते, तथाप्युक्तं वार्त्तिककृता—"इन्धेश्छन्दोविषयत्वात्........" इति¹ । तथैव सन्ति वार्त्तिकानि यत्र छन्दःपदं न विद्यते, तथापि तानि छान्दसानीत्यभ्युपगम्यन्ते सर्वैः । यथा—'नभोऽङ्गिरोमनुष्याणाम्' [१।४।१८ वा०] इत्यादीनि वार्त्तिकानि छान्दसानीति कैयटेनाभ्यधायि, यद्यपि वार्त्तिककारस्य तादृशी विवक्षाऽऽसीन्न वेति न स्पष्टं विज्ञायते । सन्ति च सूत्राणि वैदिकानि, यतो हि तेषां प्रतिपाद्यो विषयश्छान्दस एव, अर्थात् तत्सूत्रविषया न लोकेऽपूपलभ्यन्ते । यथा—'ईदूतौ च सप्तम्यर्थे' [१।१।१९] इति सूत्रं छन्दोविषयकत्वाच्छान्दसमिति स्वीक्रियते । एतादृशेषु स्थलेषु सूत्रकारो न कण्ठरवेण किमप्युक्तवानिति द्रष्टव्यं सुधीभिः ।

(ग) सन्ति च वैदिकानि सूत्राणि, येषामुदाहरणस्थलानि सर्वथा सूत्रपदविन्यासमेवानुसरन्ति, अर्थात् सूत्रमध्ये येन क्रमेण पदानि संस्थापितानि, उदाहरणभूते वाक्येऽपि तेन क्रमेणैव पदान्युपलभ्यन्ते । विस्तरभियाऽस्यैकमेवोदाहरणं दीयते—'प्रत्नपूर्वविश्वेमात्थाल् छन्दसि' [५।३।१११] इत्यस्ति वैदिकं सूत्रम् । परन्त्वहो चित्रम्, एकस्मिन् वैदिके मन्त्रे सूत्रस्थपदक्रमानुसारेणैव मन्त्रगतपदानि दृश्यन्ते । स च मन्त्रो यजुषि दृश्यते । यथा—"तं प्रत्नथा पूर्वथा विश्वथेमथाः" [७।१२] ।

(घ) इदमपि दृष्टं यद् यानि सूत्राणि प्राक्पाणिनीयैराचार्यैर्वैदिकानीति कण्ठरवेण कथितानि तानि क्वचित् पाणिनिर्लौकिकानीति कथितवान् । [७।३।९५] सूत्रस्थायां काशिकायामस्यैकमुदाहरणं विद्यते । प्राक्पाणिनीय आचार्य आपिशलिरेतत्सूत्रप्रतिपादितं विषयं वैदिकत्वेन सस्मार, पाणिनिस्तु लौकिकत्वमेव प्रतिपादितवान् ।

(ङ) अस्या रीतेर्वैपरीत्यमपि दृष्टं भवति, अर्थाद् यानि पदानि प्राक्पाणिनीयैराचार्यै-

---

१. तथैव 'मघवा बहुलम्' [६।४।१२८] इति सूत्रमपि भाष्यकृता वैदिकत्वेन परिगणितम् । परन्त्वेकमपि वैदिकं सूत्रं पाणिनीयवैयाकरणेन लौकिकत्वेन न स्वीक्रियते । इदमत्रावगन्तव्यं यत् सन्ति कातन्त्रव्याकरणे बहूनि लौकिकसूत्राणि, यानि पाणिनीयसंप्रदाये वैदिकत्वेन स्वीक्रियन्ते । प्रबन्धान्तरेऽयं विषयो विशदीभविष्यति ।

लौकिकानीति कथितानि, तानि पुनः पाणिनिना वैदिकानीत्यभ्यधायि। 'सगर्भसयूथ......' [४।४।११४] इत्यादीन्येतत्प्रकरणस्थसूत्राणि वैदिकानीति पाणिनिनाऽभाषि, परन्तु भागुरिमुनिनाऽवादि यदेतानि पदानि लौकिकानीति[1]। दृश्यन्ते खलु वैदिकपदानां सहस्रं प्रयोगा लौकिकग्रन्थेषु; अतो व्याकरणशास्त्रस्य क्रियानंशः खलु लौकिकः, कियांश्च वैदिक इत्यस्य सर्ववादिसंमतं निरूपणमशक्यमेव। अमरकोषटीकाकारेण भानुजिदीक्षितेनेदमप्युक्तं यद् वैदिकपदानां लोके प्रयोगः पाणिनिसंमत एव (दृश्यताम् आशुशुक्षणिशब्दस्था टीका)।

(च) केचिद्वदन्ति—"अष्टाध्यायां येषु सूत्रेषु स्वरविचार आस्ते, तानि स्थलानि वैदिकान्येव"इति, परन्तु नैतत् सारम्; यदि नाम वेद एव स्वरविधिः प्रयुक्ताऽभविष्यत्, तर्हि स्वरविषयकसूत्रेष्वपि क्वचित् क्वचित् 'छन्दसि', 'मन्त्रे' इत्यादीनि पदानि न प्रयुक्तान्यभविष्यन्। इदमपि विस्पष्टमवलोक्यते यत् स्वरप्रकरणेषु न छन्दःपदाधिकारः प्रवर्तते। अत एवोक्तं नागेशभट्टचरणैः—"भाषायां स्वरो नास्त्येवेति भ्राम्यन्तः परास्ताः" [शब्देन्दु० १।२।३६]। भाषायामपि स्वरप्रवृत्तिरस्तीति काशिकायां विवृतम् ('जुष्टार्पिते च च्छन्दसि' [६।१।२०९] इति सूत्रं द्रष्टव्यम्)।

(छ) वैदिकप्रयोगेषु 'छन्दसि दृष्टानुविधिः' इति न्यायः सर्ववादिसंमत एव। यदि नाम कस्मिंश्चिद् वैदिकप्रयोगे सूत्रविहितः स्वरो न दृष्टो भवति, तथापि तत्र स्वरव्यत्ययं स्वीकृत्य साम्प्रदायिकवेदपाठस्यैव युक्तियुक्तताऽभ्युपगम्यते[2]। नियमोऽयं न केवलं स्वरेष्वेव, अपि तु वर्णोच्चारणविषयेऽपि प्रवर्तते। यथा गोषणिशब्दे पाणिनीयानुशासनेन षत्वस्य प्राप्तिरेव न, तथापि षः पठ्यते। अतः समाहितं नागेशेन—"दन्त्यस्यैव मूर्द्धन्यवत्पाठो वैदिकसम्प्रदायात्"

---

१. दृश्यतां भाषावृत्तिः ४।४।१४३ सूत्रीया। प्रायेणेदं दृश्यते यत् केनचिदाचार्येण वैदिकत्वेन संमताः शब्दा आचार्यान्तरेण लौकिका इत्युच्यन्ते, लौकिकत्वेन चाभ्युपगताः शब्दा वैदिका इत्यपि व्यवह्रियन्ते विभिन्नैराचार्यैः। यथा—"जन जनने छान्दसः, कालापास्तु व्यतिजज्ञिष इत्यादिकं भाषायामपीच्छन्ति" [द्र० हरिनामामृतव्याकरणे ७१५ सूत्रवृत्तिः]। हन्तर्घनं घनाघनं चान्यैरुक्तम्, तस्य छान्दसत्वमिति सूत्रकारस्यास्वरसः [संक्षिप्तसारटीका—कृदन्तप्रक० ३११]।

२. व्यत्ययसिद्धान्तो यथा व्याकरणसंमतस्तथा निरुक्तसंमतोऽपि। निरुक्ते [६।१] प्रथमान्त आशुशुक्षणिशब्दो यास्केन पञ्चम्यर्थे व्याख्यातः।

[शब्देन्दु०] इति । लोके खलु व्याकरणनियमबलेन प्रयोगनियमनं भवति, परन्तु क्वचिदपि वेदे नेयं रीतिः प्रवर्तते । पाणिनिनानुशिष्टं लिङ्गमपि वेदेषूपलभ्यते । अस्ति च 'विशाखं नक्षत्रम्' इति प्रयोगो मैत्रायणीसंहितायाम् [२।१३।२०], परन्त्वस्य प्रयोगस्य नपुंसकलिङ्गता न पाणिनिसंमतेति दृश्यते ।

(ज) सन्ति च कतिपयानि प्रत्ययविधायकानि वैदिकसूत्राणि, येषामनुबन्धानुसारेण स्वरो न दृश्यते । अत्रापरमपि चित्रं यद् व्याख्यातारस्तादृशेषु स्थलेषु सूत्रसिद्धस्वरानुसारेण लक्ष्य-स्थलान्यपि न सम्यगुदाहृतवन्तः । दिङ्मात्रमुदाह्रियते—'भवे छन्दसि' [४।४।११०] इति सूत्रस्य यदुदाहरणं (मेध्याय च विद्युत्याय च) काशिकाकृता प्रदत्तम्, तस्य स्वरविषये हरदत्तोऽवादीद्—''अत्राऽऽद्युदात्तेन भवितव्यम् , परन्त्वन्तःस्वरितः पठ्यते''[पदमञ्जरी] इति । हरदत्तस्येदं कर्तव्यमासीद् यत् स आद्युदात्तोदाहरणस्यानुसन्धानं कुर्यात् । परन्त्वहो दुर्भाग्यम्, न केवलं हरदत्तः, परन्तु सर्वेऽपि व्याख्यातारोऽस्य सूत्रस्य सम्यग् लक्ष्यस्थलं नोदाहृतवन्तः । यद्यपि सायणाचार्येण ऋग्वेदभाष्ये [१।१८।१] एतत्सूत्रसिद्धस्य यत्प्रत्ययस्य स्थाने यप्रत्ययः पठितः, तथापि सायणव्यतिरिक्तैः सर्वैर्व्याख्याकारैर्यत्प्रत्यय एवासंशयं स्वीकृतः । सायणेन प्रत्ययभेदविषये न कश्चिदपि हेतुर्दत्तः । अतो बहुसंमत्यनुसारेण सायणपाठोऽशुद्ध इति प्रतिभाति । एतेनेदं निर्गलितं भवति यदस्य सूत्रस्य [४।४।११०] सम्यगुदाहरणं न केनापि दृष्टमिति । तथैव 'तुमर्थे....' [३।४।६] इति सूत्रविहितकसेन्प्रत्ययस्य स्वरविषयेऽपि दृश्यते । अस्य प्रत्ययस्य लक्ष्यस्थलं सर्वैः प्रदत्तम्—''गवामिव श्रियसे'' [ऋक्० ५।५६।३] । अत्र आदिरनुदात्तः, मध्यश्चोदात्तः । परन्तु कसेन्प्रत्ययानुसारेणाऽऽद्युदात्तेनैव भवितव्यम् । न जाने व्याख्याकृद्भिः कथमसम्यगुदाहरणं प्रदत्तम् । कसेन्प्रत्ययस्योदाहरणं न कैश्चिद् दृष्ट-मित्येवात्र वक्तव्यम् । वेदशाखानां क्रमिको लोपः, पठनह्रासश्चात्र कारणमिति मन्यामहे । पाणिनिना तु लक्ष्यं दृष्टमेव ।

(झ) यथा स्वरविषये तथा वैदिकशब्दार्थेन सह सूत्रभाषितार्थसंबन्धविषयेऽपि मन्तव्यम् । अर्थात् सदैव समरूपता नावलोक्यते । 'छन्दसि लुङ्लङ्लिटः' [३।४।६] इति सूत्रमस्यैकं प्रसिद्धमुदाहरणम् । अस्मिन् सूत्रे पूर्वसूत्रतो धातुसंबन्धपदस्यानु-वृत्तिर्भवति, अत एतत्सूत्रोदाहरणेषु धातुसंबन्धस्य विद्यमानताऽपरिहार्या । परन्त्वहो चित्रम् ,

अस्य सूत्रस्योदाहरणानि व्याख्याय सर्वैष्टीकाकृद्भिरुक्तम्—"उदाहरणेषु धातुसंबन्धो मृग्यः" इति। येषूदाहरणेषु धातुसंबन्धोऽस्ति, तेषामुदाहरणानामुपन्यासो न केनापि कृतः। अस्यानुमेयं कारणं तु पूर्वमेवोक्तम्।

(ञ) छान्दसेषु सूत्रेषु 'बहुलम्' इति पदस्योपयोगिता सर्वैरभ्युपगता। किञ्च, 'व्यत्ययो बहुलम्' [३।१।८५] इति सूत्रभाष्ये यच्छ्लोकवार्त्तिकं पठितम्, तेन गम्यते यत् सर्वेषु वेदसंबन्धिविधिषु व्यत्ययोऽहार्यः। व्यत्ययः=व्यतिगतिः=विपरीतभावो वा, यस्य प्राप्तिः स न स्यात्, अन्य एव स्यात्, अथवा कोऽपि न स्यात् (दयानन्दः)। वस्तुतो वैदिक-प्रयोगेषु व्याकरणनियमानामेतावान् पुष्कलो व्यभिचारो दृश्यते, यद्वेदशब्दार्थव्याख्यानाय व्यत्ययमतमेवानन्यशरणं भवति सर्वेषाम्। प्रवर्तते च परिभाषा—"सर्वे विधयश्छन्दसि विकल्प्यन्ते" इति। लौकिकवैदिकप्रयोगेषु यो मौलिको भेदः, स स्वयम्—लौकिकेषु प्रयोगेष्वापाद्यमानं रूपं भवति, परन्तु वैदिकप्रयोगेषु नेदं प्रवर्तते [दृश्यतां शब्देन्दु० ७।१।५६]। अत्रेदमपि विज्ञेयं यल्लौकिकवैदिकप्रयोगेषु न्यायविचारस्यावश्यकता विद्यत एव [दृश्यतां भाष्यप्रदीपोद्योताः ५।३।१०]।

(ट) सूत्राणां छन्दोविषयत्व इदमपि विज्ञेयं यत् क्वचित् परसूत्रे 'भाषा'-पदं यदि विद्येत, तर्ह्युत्तरसूत्राणां छन्दोविषयत्वमभ्युपगम्यते [दृश्यतां सुबोधिनी ८।२।९८ सि० कौ०]। यदि सूत्रभाषितं किमपि कार्यं भाषायां न दृष्टं भवति, तर्हि तदपि सूत्रं वैदिकमिति मन्यते। यथोक्तं कुचमर्दिन्याम्—"एतेन छन्दोऽनुवृत्त्यभावान्नास्य छन्दोविषयत्वमिति कौस्तुभोक्तमशुद्धमेव; छन्दोऽनुवृत्त्यभावेऽपि सूत्रार्थस्य लौकिकोदाहरणेष्वयोगेन छन्दोमात्रविषयतायाः पर्यवसानात्" [हल्सन्धिप्रकरणम्] इति। अस्य नियमस्योदाहरणान्तरम्—'प्रसमुपोदः पादपूरणे' [८।१।६] इति सूत्रम्। यतो हि प्रादीनामुपसर्गाणां द्वित्वं भाषायां न दृश्यते[1], अतः सूत्रमिदं छान्दसमिति स्वीक्रियते। सन्ति च सूत्राणि यानि कस्यचिन्मते वैदिकानि, मतान्तरे लौकिकानीति। यथा—'षष्ठ्याः पति······' [८।३।५३] इति सूत्रं दीक्षितादिमतेन वैदिकम्, परन्त्वमरटीकाकाररायमुकुटमतेन लौकिकमिति।

---

१. यद्यपि भाषायामुपसर्गद्वित्वार्थमनुशासनं न विद्यते, तथापि वैदिकभाषाया अनुकरणं कृत्वा क्वचिदुपसर्गस्य द्विर्वचनं कृतमेव [दृश्यतां कातन्त्र० आख्यातप्रक० ८२ दुर्गटीका]।

(ठ) वैदिकसूत्राण्येकान्तात्यन्ततो वेदशब्दशरणानीति प्रसिद्धमेव। इदमपि विज्ञेयं यद् वैदिकसूत्रेण यादृशो वैदिकप्रयोगोऽनुमीयते, यदि तादृशः प्रयोगो नोपलभ्यते तर्हि शाखान्तरे सूत्रदर्शितपाठोऽवश्यमासीदित्युररीक्रियते। कैश्चिच्चेदमप्यभिधीयते यद्वैदिकप्रयोगानुसारेण सूत्रशरीरस्य संशोधनं विधेयम् (सूत्रशरीरस्य विकृतिः संभाव्यते)। अन्ये प्रवचन्ति यद् यदि सूत्रानुसारेण वेदशब्दा न पठिता भवन्ति, तर्हि वैदिकशब्दा एव संशोधनीयाः, यतो हीदानीं वैदिकसम्प्रदायः परिभ्रष्ट एव [दृश्यतां ६।३।२३ उद्द्योतटीका—"आधुनिकानां वा सम्प्रदायभ्रंश इति कल्प्यम्"]।

(२)

अथात्र वयं छन्दःपदार्थं विवेचयिष्यामः। अष्टाध्याय्यां छन्दःपदं वेदव्यतिरिक्तेष्वप्यर्थेषु व्यवहृतमाचार्येण। यथा—

१. गायत्र्यादिच्छन्दोवाचित्वेन 'छन्दोनाम्नि च' [८।३।९४] इति सूत्रे। वार्त्तिकेऽप्यस्मिन्नेवार्थे शब्दोऽयं भाषितः। यथा—'ग्रीष्मादच्छन्दसि' [४।१।८६ सूत्रवार्त्तिकम्] इत्यत्र।

२. इच्छावाचित्वेनापि शब्दोऽयं प्रयुक्तः। यथा—'छन्दसो निर्मिते' [४।४।९३] इत्यत्र। मुख्यतश्छन्दःशब्दस्य द्वावेवार्थौ दृश्येते—प्रथमश्छान्दसप्रयोगविषयः, द्वितीयस्तु छन्दोऽभिधेयता। प्रथमस्योदाहरणभूतानि प्रायः सर्वाणि सूत्राणि छन्दःपदयुक्तानि। द्वितीयस्योदाहरणम्—'शौनकादिभ्यश्छन्दसि' [४।३।१०६] इति सूत्रम्। अत्रेदमपि विज्ञेयं यत् ४।३।१०६ सूत्रस्य छन्दसीति पदस्यार्थः खलु 'छन्दसि अभिधेये' इति। अतः सूत्रमिदं न वैदिकम्, प्रत्युत सर्वथा लौकिकमेव। अत एव सिद्धान्तकौमुद्यादिषु लौकिकभागे सूत्रमिदं पठ्यते। इदमप्यत्र विज्ञेयं यच्छन्दःपदं न सर्वदा छन्दोबद्धमन्त्राणामेव वाचकम्। यतो हि—'छन्दसि पुनर्वस्वोरेकवचनम्' [१।२।६१] इति सूत्रस्योदाहरणं छन्दोहीने यजुर्मन्त्रे दृश्यते। तथा च पठ्यते—"पुनर्वसुर्नक्षत्रमदितिर्देवता वा" [यजुः]।

छन्दःपदघटितानां सूत्राणां लक्ष्यस्थलानि यादृशेषु ग्रन्थेषूपलभ्यन्ते, तेषां विवरणमत्र प्रस्तूयते—

१. वेदसंहितासु, मैत्रायण्यादिशाखासु च[१]।

२. ब्राह्मणग्रन्थेषु[2] ।

३. आरण्यकेषु, उपनिषत्सु च[3] ।

४. श्रौतगृह्यादिसूत्रेषु[4] ।

५. महाभारतादिग्रन्थेषु ।

एषु ग्रन्थेषु यानि वैदिकपदान्युपलभ्यन्ते, तद्विषये न किमप्यत्र व्याख्यायते ।

अष्टाध्याय्यां छन्दसीति पदवत् 'मन्त्रे' इति पदमपि व्यवहृतम् । अवश्यमनयोः पदयोरर्थभेदेन भवितव्यम्, अन्यथा छन्दोऽधिकारवतां सूत्राणां मध्ये मन्त्रपदस्य पाठो न न्यायसंगतः स्यात् । दृश्यते खलु ६।१।२०९ सूत्रे छन्दःपदम्, ६।१।२१० सूत्रे पुनर्मन्त्र-पदम्, अतस्तर्कलाघवत इदमभ्युपेयं यदस्त्यनयोर्मध्ये कश्चिदर्थभेदः । शब्दलाघवमाश्रित्य यो ग्रन्थः प्रणीयते, तस्मिन् केवलपर्यायवाचिनां शब्दानामधिकवर्णयुक्तानां ग्रहणं न न्यायेन संगमनीयम् ।

विषयेऽस्मिन् प्राचीनैर्व्याख्यातृभिर्यत् किमप्युक्तं तदत्र संगृह्यते । युक्तायुक्तविचारे तु सूरय एव प्रभवन्तीत्यादावेव निवेद्यते ।

(क) जयकृष्णमतानुसारेण मन्त्रशब्दः खलु संहितायां रूढः [सि०कौ०२।४।८०]; परन्त्वस्य नियमस्यैकमपवादस्थलं विद्यते, तच्च 'मन्त्रे घसह्वरणशवृहदहाद्वृच्कृगमिजनिभ्यो लेः' [२।४।८०] इति सूत्रम् । एतत्सूत्रसिद्धम्—'अक्षत' इति पदमैतरेयब्राह्मणे दृश्यते, ''अक्षत वा अस्य दन्ताः'' [७।१४।५] इति । अस्योदाहरणे केनापि टीकाकारेण संहिताप्रयोगो न प्रदर्शितः । मन्त्रशब्देन ब्राह्मणग्रन्थप्रयोगः कथं ग्रहीतुं शक्यत इति प्रश्नस्योत्तरे काशिकाकृताऽभाषि—''मन्त्रग्रहणं तु छन्दस उपलक्षणार्थम्'' [२।४।८०] इति । यदि

१. सर्वत्रोपलब्धव्यानि।

२. '…निष्टर्क्य……' [३।१।१२३] इत्येकं छन्दःपदघटितं सूत्रम् । अस्योदाहरणानि शतपथगोपथ-तैत्तिरीयब्राह्मणेषूपलभ्यन्ते ।

३. 'शेश्छन्दसि' [३।२।१३७] इत्यस्योदाहरणं शाङ्खायनारण्यके दृश्यते ।

४. 'तृतीया च होश्छन्दसि' [२।३।३] इत्यस्योदाहरणं शाङ्खायनश्रौतसूत्रे [३।२।१५] दृश्यते ।

खलु टीकाकारेणत्थमुक्तं स्यात्—"मन्त्रेषु अज्ञतेति प्रयोगो मृग्यः[1]", अथवा "ब्राह्मणेऽप्यस्य प्रयोगो दृश्यते" इति, तर्हीदमसंशयं निर्णीतं स्याद् यन्मन्त्रः=संहिता। उक्तं च पुनर्जयादित्येन—"छन्दस उपलक्षणार्थम्" इति। किं छन्दःपदेन ब्राह्मणमेवेष्टम्, न केवलं मूलसंहिताः? यदि च छन्दःपदेन ब्राह्मणग्रन्थानामपि ग्रहणं स्यादित्यप्यभिधीयते, तथापि तत् पाणिनिसंमतं भविष्यति न वेत्यपि चिन्तनीयं वस्तु विद्यते। यतो हि—'छन्दोब्राह्मणानि च तद्विषयाणि' [४।२।६६] इति सूत्रे छन्दोब्राह्मणपदयोः पृथक्पाठ एव पाणिनिना कृतः। व्याख्याकृतस्तु ४।२।६६ सूत्रव्याख्याने कथयन्ति—"छन्दांसि मन्त्राः" इति। यदीदमेवाभ्युपगतं स्यात्, तर्हि जयादित्यमतेन सह विरोधोऽवश्यंभावी। ये पुनश्छन्दःशब्देन ब्राह्मणान्यपि गणयन्ति, तेऽस्याः समस्यायाः समाधानमित्थं कुर्वन्ति—"ब्राह्मणानि द्विप्रभेदानि—चिरन्तनप्रोक्तानि, अचिरन्तनप्रोक्तानि च। यतो हि छन्दोग्रन्थेषु ब्राह्मणग्रन्था अप्यागच्छन्ति। अतोऽस्मिन् सूत्रे पुनर्ब्राह्मणपदग्रहणेन विज्ञायते—चिरन्तनप्रोक्तब्राह्मणानामेवात्र ग्रहणं भवति, न खलु याज्ञवल्क्यादिप्रणीतानां नूतनानां ब्राह्मणानाम्" [तत्त्वबोधिन्यादयः] इति। यद्यपि काशिकाकारस्यापीदमेव मतम्, तथापि ब्राह्मणविषयकमिदं वचः सत्यं न वेत्यत्र सन्देहो विद्यते। (चिरन्तनाचिरन्तनब्राह्मणग्रन्थविषये "वैदिकवाङ्मय का इतिहास" इति ग्रन्थो भगवद्दत्तप्रणीतः द्रष्टव्यः)।

(ख) विषयेऽस्मिन् वेदविद्याप्रचारजीवनव्रतस्य आचार्यदयानन्दस्वामिनोऽपि मतमालोचनीयम्। तदनुसारेण—"छन्दःशब्देन मन्त्रभागस्य मूलवेदस्य ग्रहणं भवति...." [२।३।६२ सूत्रटीका] इति। परन्त्वस्मिन् मते स्वीकृते सति कश्चित् संशयो भवति। यथा—२।३।६२ सूत्रोदाहरणेषु भाष्यकृता यदुदाहरणं प्रदत्तम् (या खर्वेण पिबति तस्यै खर्वो जायते), तन्मैत्रायणीसंहितायाम् [२।२।६] उपलभ्यते। अस्य दोषस्य दूरीकरणाय

---

१. अष्टाध्याय्यां सन्ति बहूनि लक्षणभूतानि पदानि, येषां लक्ष्यस्थलानि नाद्य दृश्यन्ते। 'केवलमामकभागधेयपापापर....' [४।१।३०] इति सूत्रेण 'आर्यकृति' इति पदं सिध्यति, परन्तु तदुदाहरणे न केनापि वेदवाक्यं प्रदर्शितम्; उक्तं च—"आर्यकृतीति क्वचिद् वेदेऽन्वेषणीयम्" इति। व्याख्यातृभिर्येषु येषु स्थलेष्वेतादृशं वाक्यं (अस्य प्रयोगो मृग्य इत्यादि) भणितं तेषां संकलनं मया क्रियते, येन वेदलुप्तभागविषय आलोकपातः स्यात्।

स्वामिनाऽभिहितम्—"महाभाष्यकारेण छन्दोवन्मत्वा ब्राह्मणानामुदाहरणानि प्रयुक्तानि" [ऋग्वेदादिभाष्यभूमिका] इति ।

अत्रेदं चिन्तनीयम्—यदि छन्दः=मन्त्रभाग एव, तर्हि स्वामिनां मते तस्याद्य यावदविकृतरूपत्वाच्चतुःसंहितारूपत्वाच्च पूर्णं छन्दः प्राप्तमेव । एवं सति छान्दससूत्राणां सर्वाण्युदाहरणानि मन्त्रभागे प्रापणीयान्येव । परन्त्वहो चित्रम् , न सर्वाण्युदाहरणानि मन्त्रभागे लभ्यन्ते । इदमप्यवलोक्यते यद् येषु सूत्रेषु 'मन्त्रे' इति पदं पठितम्, तेषामपि सर्वाण्युदाहरणानि न मूलसंहितासूपलभ्यन्ते । यथा—'मन्त्रे श्वेतवहोक्थशस्....' [३।२।७१] इति, 'अवे यजः [३।२।७२] इति च सूत्रयोरुदाहरणभूते श्वेतवाह-अवयास्पदे न संहितासूपलभ्येते । अपि च 'मन्त्रे वृषेषपचमन.....' [३।३।९६] इति सूत्रसिद्धौ भूतिवित्तिशब्दौ न मूलसंहितासु दृश्येते । अतस्तर्कलाघवत इदं स्वीकरणीयं यत् स्वामिमतानुसारेण यदि मन्त्रशब्दो मूलवेदसंहितावाची स्यात्, तर्हि पाणिनीयदशाऽसमञ्जसताऽपि स्यात् । इदमिह कथञ्चित् समीचीनं भवितुमर्हति, यच्छाखान्तरस्थानां मन्त्राणामपि मन्त्रशब्देन ग्रहणं पाणिनेरिष्टम्, न केवलं मूलवेदस्थानाम् । अतः शाखान्तरे भूत्यादिशब्दसद्भावकल्पनमेव युक्तिसहम् । किञ्च, इदमपि साधु भवितुमर्हति यन्मन्त्रशब्दार्थः खलु व्यापकतर एव (यः खल्वर्थो नास्माभिरद्यापि विज्ञातः) । दृश्यते यच्छ्वेताश्वतरोपनिषच्छंकराचार्येण मन्त्रोपनिषद्रूपेण संमानिता । अतो मन्त्रपदं मूलसंहितावाच्येवेति नाग्रहः करणीयः । स्वयमाचार्येण दयानन्देनापि छन्दःशब्देन शाखीयमन्त्राणामपि ग्रहणं कृतम् [दृश्यतां ३।२।७३ सूत्रटीका] । एतादृशेषु स्थलेषु प्राचीना आचार्याः स्वप्रवृत्त्यनुसारेण द्विधा समाधानं कृतवन्तः । यथा—

१. "मन्त्र इत्यनुवर्तमाने छन्दोग्रहणं स्पष्टार्थम्, छन्दोब्राह्मणानि......इति सूत्रबलेन ब्राह्मणे मुख्यच्छन्दस्त्वस्यानङ्गीकारात्" [३।२।७३ शब्देन्दु०] इति ।

२. "ब्राह्मणसंग्रहार्थं छन्दोग्रहणम्" [जयकृष्णमतम्] ।

(ग) पूर्वोक्तैर्वचनैरिदं सुस्पष्टं विज्ञातं भवति यन्मन्त्रच्छन्दःपदयोरर्थे स्थिरता नास्ति, स्वसिद्धान्तानुसारेण व्याख्यातार इमे पदे विभिन्नेष्वर्थेषु व्यवहृतवन्तः—सामान्यविशेषेषु, व्यापकव्यापकतरार्थेषु च । इदमप्यत्र चिन्तनीयं यद् ये खल्वविच्छिन्नसम्प्रदायानुसारेणाऽष्टाध्यायीं पठितवन्तो हरदत्तादयः, तेऽपि न सम्यगुदाहरणं दातुं समर्था अभवन् ।

यदि तेऽनुपलब्धमूलान्युदाहरणान्यपि दत्तवन्त आसन्, तर्हीदमस्माभिः सिद्धान्तितं स्याद् यदेते प्रकृतमुदाहरणं ज्ञातवन्त आसन् परन्त्वस्माकं दौर्भाग्येनेदमपि न दृश्यते। नेदं मन्तव्यं यल्लक्ष्यमदृष्ट्वाऽपि पाणिनिः सूत्राणि रचयामास, अतो व्याख्यातॄणामध्ययन-ह्रासकल्पनमेव युक्ततरम्।

(घ) छान्दससूत्रविषय इमे प्रश्ना विद्वद्भिरद्यापि नासंशयं निर्णीताः। तथा हि—

१. मन्त्रपदघटितसूत्राणामुदाहरणं ब्राह्मणादिग्रन्थेषूपलभ्यते, किमत्र कारणम्?

२. कस्माद् हेतोः कस्यचित्सत्रस्य सम्यगुदाहरणं न दत्तम्। एतेन पाणिनीयसम्प्र-दायस्य भ्रंशो जात इत्यनुमीयते। यथा पाणिनिप्रचारितोऽनुनासिकपाठ इदानीं परिभ्रष्टः, यथा वाऽधिकारनिर्देशकस्वरितस्वरो विरलप्रचारो जातः; तथैव वैदिकान्युदाहरणान्यपि व्याख्यातृभिर्विस्मृतानीत्यहो कालमहिमा।

३. छन्दोब्राह्मणपदघटितसूत्राणामालोचनेन योऽर्थोऽनयोरसंशयं प्रतिभाति तेन सह निगमादिपदानामर्थोऽप्यालोचनीयः। आलोचनेऽयं प्रबन्धान्तरसाध्या।

४. प्रातिशाख्येन सह स्वरविषये पाणिनेः कियान् भेदः, किं तस्य कारणम्? किं लाघवार्थमेव पाणिनिना सूक्ष्मविषयाः परित्यक्ताः?

(३)

पाणिनेः शब्दव्यवहारविषयेऽस्माभिरिदं चिन्तितं यत् स्वपूर्वाचार्याननुकृत्याप्याचार्येण शब्दानुशासनं विहितम्। किमत्र कारणम्, कानि सूत्राणि प्राक्पाणिनीयानीत्यस्मिन् विषये विस्तरेण लिखितं मयाऽन्यत्र। प्राचार्यस्वीकृतशब्दार्थौ पाणिनिना बहुत्रानुकृतौ, कदाचिच्च समरूपता न रक्षितेत्यपि [1]प्रसिद्धमेव। अर्थनिर्देशमकृत्वाऽप्याङ्संज्ञां पाणिनिर्व्यवहरति। एते-नेदं निर्गलितं भवति यत् प्राक्पाणिनीये व्याकरणे विभिन्नैराचार्यैश्छन्दोमन्त्रादिपदानि व्यवहृतानि। कदाचिदेते शब्दा एकस्मिन्नेवार्थे व्यवहृताः, कदाचित् कथञ्चिद्विलक्षणे-ष्वर्थेषु स्वाभीष्टानुरोधात्। एकस्मिन् व्याकरणशास्त्र एक एव शब्दो व्याकरणान्तरे स्वल्पा-

---

१. कानि पदानि प्राक्पाणिनीयव्याकरणेभ्योऽनुकृतानि, कानि वा स्वल्पार्थान्तरे व्यवहृतानीत्यस्मिन् विषये बहून्युदाहरणानि "टेकनिकल टर्म्स एण्ड टेकनीक ऑफ संस्कृत ग्रामर" इति नामधेये ग्रन्थे द्रष्टुं शक्यानि।

र्थान्तरवाचकोऽपि कदाचिद् भवतीति दृश्यते। पाणिनिस्त्वर्थनिर्देशमकृत्वापि छन्दोमन्त्रादि-शब्दान् व्यवहरति स्म; अतः सर्वेष्वष्टिकासूत्रेषु 'छन्दस्' आदीनि पदानि सर्वत्रैकार्थानीति नाग्रहः कार्यः।

अनेन प्रकारेण यद्यप्यर्थसांकर्यमवश्यंभावि, तथापि प्राचार्यानुकरणपरायणेन पाणिनिना तन्न दोषावहमिति चिन्तितम्, तस्मिन् काले शास्त्राध्येतृषु शब्दार्थज्ञानविषये भ्रमाल्पता-संभवात्। किञ्च, शास्त्रं खलु सर्वदा व्याख्यानाधीनं भवति। न्यायोऽयं शब्दशास्त्रे शास्त्रान्त-रापेक्षयाऽधिकं प्रवर्तते। इदमेव मनसि निधाय प्राचार्यपठितान् भिन्नार्थकशब्दानर्थनिर्देश-मकृत्वापि पाणिनिर्गृहीतवान्। अद्य खल्वनवच्छिन्नपरम्पराभावात् तत्तच्छब्दार्थविषयेऽस्माकं जायते सन्देहः। प्राचार्यानुरोधेन क्वचित् पाणिनिरसमञ्जसतामपि कृतवानिति क्षीरस्वामी बभाषे[1]। मन्त्रपदमष्टाध्याय्यां कस्मिन्नर्थे व्यवहृतमिति स्पष्टं न ज्ञायत इति प्रागेव कथितम्। इदमत्रावगन्तव्यं यद् यद्यपि मन्त्रशब्दो वेदांशविशेष एव रूढः, तथापि क्वचिच्छ्रौतसूत्रप्रयुक्तवाक्यार्थेऽपि प्रयुज्यते [द्र० सत्याषाढश्रौतसूत्रस्य गोपीनाथकृतव्याख्या]। उदाहरणान्तरमपि—वेदपर्यायवाच्याम्नायशब्दः क्वचिन्मनुवचनार्थकोऽपि भवतीति गौतम-धर्मसूत्रटीकाकारो मस्करी आह [१।५।१]। एतेन ज्ञायते यच्छब्दानामर्थे सङ्कोचविकासौ भवतः। क्वचित् सामान्यवाची शब्दो विशेषार्थे प्रयुज्यते, तथैतस्य नियमस्य वैपरीत्यमपि लक्ष्यते। छन्दसादिशब्दानामर्थनिर्धारणाय विषयोऽयमवश्यमवगन्तव्यः।

एकस्यैव शब्दस्य विभिन्नेष्वर्थेषु व्यवहारोऽष्टाध्याय्यां बहुस्थलेषूपलभ्यते। अष्टाध्याय्यां क्रतुशब्दः सामान्यविशेषार्थयोर्व्यवहृतः। अमनुष्यशब्दः २।४।२३ सूत्रे रक्षःपिशाच-वाचकः, ३।२।५३ सूत्रे पुनर्निर्जीवपदार्थवाचकत्वेन प्रयुक्तः। व्याकरणशास्त्र एक एवाऽऽख्यातशब्दः—१. भ्वादिधातुषु, २. तिबादिविभक्तिषु, ३. भवत्यादिपदेषु च प्रयुज्यते। शाकटायनमतेनाऽऽख्यातम्=धातुः (निरुक्तम्), परन्तु यास्कानुसारेण तत्पदं भवत्यादि-पदवाचकम्। यतो हि पाणिनेः कृतौ समेषामाचार्याणां समावेशो विद्यते, अत एकस्यैव

---

१. भ्वादिगणीयचिधातुव्याख्यायां क्षीरस्वामिनोक्तम्—"पादमध्येऽनुदात्तानामुदात्तः कथितः क्वचित्। अनुदात्तोऽप्युदात्तानां पूर्वेषामनुरोधतः॥" इति। प्राचार्यरीतेरनुकरणं खलु पाणिनेरेका शैलीत्यनेन विज्ञायते।

पाणिनीयच्छान्दससूत्रालोचनम्

शब्दस्याचार्यभेदेन विभिन्नार्थकस्यापि प्रयोग उपपद्यते । एक एव शब्दः सूत्रकृता संज्ञात्वेनासंज्ञात्वेन च प्रयुक्तः, यथाऽभ्यासगुणादयः । इदमस्माभिरनुमीयते यत् कस्यचिदाचार्यस्य शब्दशास्त्रे गुणशब्दो वैशेषिकप्रसिद्धेऽर्थे प्रयुक्तः, शास्त्रान्तरे च अदेङ्वाचित्वेन; पाणिनिस्तूभावप्यर्थावभ्युपगतवान् । एक एव शब्दो यदि संज्ञाऽसंज्ञारूपेण प्रयुज्यते, तर्ह्यर्थबोधे सन्देहावसरो जायत एव, तथापि यदि तत् क्रियते तर्हि प्राचार्यान् प्रति ग्रन्थकारस्य श्रद्धातिशय एव कारणमिति कल्पनमुचितमेव । आचार्यकाले बहुव्याकरणसद्भावात्, अध्यापकवर्गाणां बहुश्रुतत्वात्, अनवच्छिन्नपरम्परयैव शब्दार्थज्ञानस्य संपादनीयत्वात् सूत्रकारस्यायं व्यवहारो भूषणाय न तु दूषणायेति मन्यामहे[1] ।

इदमत्रावधेयम्—यथोपनिषत्स्वेक एव शब्दः सामान्यविशेषवाचित्वेन व्यवहृतः, तथैवाष्टिकायामप्येक[2] एव शब्दः सामान्यविशेषवाचित्वेन व्यवहृतः । लक्ष्यस्थलदर्शनं कृत्वैव तेषां शब्दानामर्थनिरूपणं करणीयम् । अत एव—"लक्ष्यलक्षणे व्याकरणम्" इत्युदघोषि पतञ्जलिना । यदि प्राक्पाणिनीयानि व्याकरणशास्त्राण्यद्य सुलभानि भवेयुस्तर्हि बहूनामनवगतार्थकानामष्टाध्यायीस्थपदानामर्थबोधः सुकरः स्यात् । परन्तु तद्ग्रन्थानां नाश एव दृश्यते । आगामिनि काल एतादृशानां शब्दानामर्थनिर्धारणमेव शाब्दिकप्रवराणां मुख्यं कर्म भविष्यतीति निवेद्य विरमामि ॥

---

१. छन्दोऽर्थे पाणिनिरार्षपदमपि प्रयुक्तवान्, 'संबुद्धौ शाकल्यस्येतावनार्षे' [१ । १ । १६] इत्यत्र । इदं संभाव्यते यत् केनचित् प्राक्पाणिनीयेनाचार्येणार्षशब्दो वैदिकप्रयोगार्थे प्रयुक्तः ।

२. अष्टिकाशब्दोऽप्यष्टाध्यायीशब्दस्य पर्याय एव [दृश्यतां बालमनोरमा ७।३।४५ सूत्रस्था] । अष्टकशब्दोऽपि तथैव । पाणिनिसूत्राणां नामग्रहणकाले व्याख्यातृभिर्बहूनि नामानि प्रयुज्यन्त इति दृश्यते । यथा—१. शब्दानुशासनम्, २. पाणिनिलक्षणम्, ३. वृत्तिसूत्रम्, ४. वेदाङ्गमाहेश्वरम् (प्रस्थानभेदः), ५. त्रिमुनिशास्त्रम्, ६–८. पूर्वोक्तानि त्रीणि पदानि च, ९. न्यासकृच्छब्देन क्वचित् पाणिनिरेव लक्षितो भवति [प्रौढमनोरमा १।१।२७], अतोऽस्य ग्रन्थस्य न्यासोऽपि नामान्तरं भवितुमर्हति ।

शब्दब्रह्मविमर्शः

श्रीकृष्णशास्त्री मोकाटे, मारवाड़ीसंस्कृतविद्यालयः, काशी ।

विषयानुक्रमणिका

१. प्रास्ताविकं निवेदनम्

श्रीमदाचार्यभर्तृहरिप्रणीतो वाक्यपदीयाभिधो ग्रन्थो व्याकरणदर्शनस्य तत्त्वं जिज्ञासमानानामखिलानां जनानां स्पृहणीयतरः समुपलभ्यते । एतादृशग्रन्थप्रणेतारः श्रीमदाचार्यभर्तृहरिपादाः ख्रिस्ताब्दानुसारेण षष्ठशतकोत्तरार्द्धे समभूवन्नित्यैतिहासिकाः कथयन्ति । इह पुरा पाणिनीयेऽस्मिन् व्याकरणे व्याडयुपरचितं ग्रन्थलक्षपरिमाणं संग्रहाभिधानं निबन्धन-

मासीत् । तच्च कालवशात् सुकुमारबुद्धीन् वैयाकरणान् प्राप्यास्तमुपागतम् । अथ भगवता पतञ्जलिना साधुत्वज्ञानोपयिकतया धर्मसाधनत्वेनोपजातोपयोगाय व्याकरणस्मृतेरविच्छेदाय च करुणाप्रयुक्तेन वार्त्तिकव्याख्यानपुरःसरं महाभाष्यनिबन्धनमुपरचितम् । महाभाष्यं हि बहुविधविद्यावादबलमार्षं व्यवस्थितम् । ततश्च संग्रहप्रतिपत्तभूतैराचार्यैस्तर्कविद्यामात्रवेदिभिर्बुद्धयपाटवात् परस्परवैमत्यादागमसंज्ञात्यागाच्च तद्विप्लावितमिति यथावस्थितो व्याकरणागमः पतञ्जलिशिष्येभ्यः कालपरिवासाद् भ्रष्टः सन् पाठमात्र एव व्यवस्थितः । अथ कालान्तरेण चन्द्राचार्यवसुरातगुरुप्रभृतिभिरागमं लब्ध्वा तेन चोपायभूतेन सकलानि भाष्यावस्थितानि न्यायबीजानि तान्यनुसृत्य व्याकरणागमः पुनरपि प्रकाशतां नीतः । ततः पुनः सततं शिष्येभ्यो व्याख्याय बहुशाखित्वं नीत इत्यनुश्रूयते । इत्थं चाचार्येण हरिणा वसुरातगुरुनिर्दिष्टाद्भाष्यान्न्यायाविलुप्तये काण्डत्रयक्रमेणाऽयं वाक्यपदीयात्मकः प्रमाणग्रन्थो विरचितः, यस्य वचनानि पदवाक्यप्रमाणपारावारीणैर्भट्टप्रभाकरवाचस्पतिमिश्रप्रभृतिभिः स्वस्वव्याख्यानग्रन्थेषु प्रमाणत्वेनोद्धृतानीत्येतादृशं यस्य ग्रन्थप्रामाण्यं दृश्यते विज्ञैरिति निर्विवादमेव जनैः स्वीक्रियते । तदुपरि हेलाराजः स्वीयव्याख्यानेन यद्यपि हर्याशयं सम्यक् स्पष्टीचकार, तथापि तस्य व्याख्यानस्य प्रायशो बहुषु स्थलेषु मध्यगताः काश्चित् पङ्क्तय एव त्रुटिता यत्र पूर्वापरसंगतिर्न दृश्यते । पठनपाठनसंप्रदायस्य विच्छिन्नत्वेनास्य व्याख्यानस्य दुरवगाहताप्यनुभूयते । साम्प्रतमपि तां दूरीकर्तुं न कोऽपि प्रवृत्तोऽभूदिति महदाश्चर्यमेव । कार्यं चैतदत्यावश्यकमिति सत्यम्, किन्तु ग्रन्थकृन्मनोगतोऽर्थो याथातथ्येन यथा प्रकाशितो भवेत् तथा दुष्करमेव प्रतिभाति । आस्तां तावत्, तथापि मन्देन गुरूपदिष्टेन मया यथाकथञ्चित् शब्दब्रह्मविषयेऽवगतोऽर्थ एवास्मिन्निबन्धे प्रकाश्यते ।

तत्र तावत् प्रथमकाण्डे शब्दब्रह्मणः प्रयोजनसहितं स्वरूपादिकं लेशतो निर्णीतम् । तस्य साधारण्येन वाचकत्वं व्यवस्थापितम् । द्वितीये काण्डे मतभेदेन केषाञ्चित् पदं वाचकमन्येषां वाक्यमिति वाचकात्मनो वाक्यस्य स्वरूपं विस्तरेण प्रतिपादितम् । शिष्टे तु तृतीयेऽस्य ग्रन्थस्य काण्डद्वयनिष्पन्दभूत आदरविशेषेण स्वसिद्धान्तपरसिद्धान्तवर्तिनां न्यायानां विचारणा कृतेति मुख्यतयाऽऽलोच्यमाने व्याकरणस्य सारभूतं प्रातिभदर्शनसिद्धान्तमत्रैव काण्डे प्रकाशयामास भर्तृहरिराचार्यः । अथैवं प्रस्तुते निबन्धे स्वसिद्धान्तमेव युक्तायुक्तविचारपूर्वकं निगद्यते मयेत्यलं निवेदनेन ।

२. प्राणिनां प्रवृत्तिकारणम्

इह हि प्रतिकूलतया वेदनीयत्वेन सर्वैरेव स्वभावतो जिहासितस्य सर्वविधदुःखस्य निवृत्त्यर्थमेव प्राणिमात्रस्य नैसर्गिकी प्रवृत्तिर्दरीदृश्यते । स्वस्वज्ञानशक्त्यनुसारेण क्रियाशक्त्यनुसारेण च दुःखनिवृत्तये प्रयतन्ते सर्वे लोका इति सत्यम् ।

३. आत्मानवबोधस्य सर्वानर्थहेतुत्वम्

सा च निवृत्तिर्नाद्वितीयात्मबोधमन्तरा संभवेत्, यतो हि स्वतः सिद्धाऽद्वितीयात्मानवबोधमात्रोपादानकत्वेन मिथ्याभूतं यद् द्वैतं वस्तु तन्निमित्तको यः शोभनाऽशोभनाध्यासः, तन्निबन्धनरागद्वेषमूलके विहितप्रतिषिद्धकर्मणी सर्वथा दुस्त्यजे । तदुक्तम्—"नहि कश्चित् क्षणमपि जातु तिष्ठत्यकर्मकृत्" इति । ताभ्यां च धर्माधर्मोत्पत्तिरपरिहार्या । पूर्वोपार्जिततादृशधर्माऽधर्मजनितदेहाभिमानैकहेतुर्दुःखमिति परम्परया सर्वानर्थहेतुरात्मस्वरूपस्य सुखस्य च पिधायक आत्मानवबोध एवेति सिद्धम् ।

४. पुरुषार्थप्राप्त्युपायः

आत्मज्ञानेन च तस्य निवृत्तौ सत्यामात्यन्तिकदुःखनिवृत्तिरूपस्य निरतिशयानन्दरूपस्य च पुरुषार्थस्य प्राप्तिर्नियता । तादृशाज्ञानविषयस्यात्मनः प्रत्यक्षादिलौकिकप्रमाणाऽविषयत्वात् तन्निवर्तकं सम्यग्ज्ञानं वेदान्तवाक्यादेव भवेत् । अपि च लौकिकानां लौकिकपदकदम्बश्रवणमविवादमनधिगतार्थविषयकं ज्ञानमुदयमासादयति । तत्र पुंसां लौकिकवाक्याद्वेदान्तागमवाक्याच्च यज्ज्ञानं भवति तस्य निमित्तं किमिति विचारणायामेव प्रकृतप्रतिपाद्यविषयस्य निर्णीतिर्भविष्यति ।

५. तत्त्वं निर्णेतुं श्रुतेस्तर्कस्य वा मुख्यत्वमुत उभयोः ?

अत्रेत्थं विचारणीयम्—जगति मूलतत्त्वमेकमनेकं वेति निर्णये तदनुरोधेन साम्प्रतिकं वस्तु निर्णेतुं शक्यं भवति । मूलतत्त्वान्वेषणे च न प्रत्यक्षप्रमाणस्य गतिरिति प्रसिद्धमेव किन्तु श्रुतिरनुमानं वा तत्र प्रभवति । तत्रापि श्रुतेर्मुख्यत्वमनुमानस्य तत्सहचरत्वमिति चेच्छ्रुतिर्बलीयसी । अथानुमानं मुख्यं तत्सहचरत्वं श्रुतेश्चेच्छ्रुतिर्दुर्बला भवति, तत्र किं युक्तमिति चेत्; उभयमपि मतभेदेन । तथा हि—दर्शनकारा द्विविधाः-श्रौतास्तार्किकाश्च । तत्र श्रुतिरेव मुख्यतया तत्त्वान्वेषणे साधनम् । तामन्तरेण तत्त्वान्वेषणं दुर्लभमित्येवं मन्वानाः श्रुत्येकमात्रशरणाः श्रौताः, एत एव वेदवादिन इति व्यपदिश्यन्ते । जगत्कारणादिष्वतिपरोक्षभूतेष्व-

र्थेषु श्रुत्यनुसारेणैव तेऽर्थं निश्चिन्वन्ति। श्रुतिप्रतिपादितोऽर्थश्चापाततो विरुद्धत्वेन सर्वतोऽसंभवित्वेन वा भासमानोऽपि सत्य एवेति तेषां दृढो निश्चयः। नहि वेदप्रतिपादितेऽर्थेऽनुपपन्ने वैदिकानां बुद्धिः खिद्यते, अपि तु तदुपपादनमार्गमेव विचारयन्तीति हि मीमांसासूत्रकारैर्जैमिन्याचार्यैरुक्तम्—"विरोधे त्वनपेक्षं स्यादसति ह्यनुमानम्" इति। जैमिनिरिव पाणिनिरपि श्रौत एव, यतो हरिणोक्तम्—

न चागमादृते धर्मस्तर्केण व्यवतिष्ठते।
ऋषीणामपि यज्ज्ञानं तदप्यागमपूर्वकम्॥
धर्मस्य चाव्यवच्छिन्नाः पन्थानो ये व्यवस्थिताः।
न तॉंल्लोकप्रसिद्धत्वात्कश्चित्तर्केण बाधते॥
अवस्थादेशकालानां भेदाद् भिन्नासु शक्तिषु।
भावानामनुमानेन प्रसिद्धिरतिदुर्लभा॥
चैतन्यमिव यश्चायमविच्छेदेन वर्तते।
आगमस्तमुपासीनो हेतुवादैर्न बाध्यते॥ इति।

भगवान् बादरायणोऽपि श्रौत एव, तथा च तेन सूत्रितम्—"शास्त्रयोनित्वात्" [१।१।३], "श्रुतेस्तु शब्दमूलत्वात्" [२।१।२७] इत्यादि। महाभारतेऽप्युक्तम्—"अचिन्त्याः खलु ये भावा न तांस्तर्केण योजयेत्" इति। अतस्तादृशे विषये श्रुतिविरुद्धार्थसाधनाय प्रयुक्तो हेतुराभासीभवति। तार्किका अपि हेत्वाभासान् प्रदर्शयन्तः सर्वे सद्धेतव एवेति नैव कथयन्ति। तदित्थं श्रौता दर्शनकारा जैमिनिः, व्याकरणसूत्रकारः पाणिनिः, ब्रह्मसूत्रकारो बादरायणश्चेति त्रयः संप्रतिपन्नाः। अपरे दर्शनकारास्तार्किका इति व्यपदिश्यन्ते, यतो ह्येतेषां तर्क एव मूलतत्त्वान्वेषणे मुख्यं साधनम्। तदित्थं श्रौतानां दर्शने श्रुतेः प्राबल्यम्, अपरेषां दर्शने तर्कस्य प्राबल्यमिति तर्कमात्रैकशरणास्तार्किकाः।

६. तार्किकमतेन निमित्तोपपादनम्

पदकदम्बश्रवणसमनन्तरं जातबोधस्य निमित्तं पारमार्थिकपूर्वपूर्ववर्णपदपदार्थानुभवजनितसहितान्त्यवर्णज्ञानमेवेति वदन्ति। तथा च श्रौतप्रत्येकपदार्थानुभवजन्यसंस्कारेभ्य एकदैव तावन्ति पदानि स्मर्यन्ते। ततो युगपदेव तावतां पदार्थानां स्मृतौ सत्यां वाक्यार्था-

नुभवः । तदुक्तं वात्स्यायनभाष्ये—"वाक्यस्थेषु खलु वर्णेषूच्चरत्सु प्रतिवर्णं तावच्छ्रवणं भवति । श्रुतं वर्णमेकमनेकं वा पदभावेन प्रतिसन्धत्ते, प्रतिसन्धाय पदं व्यवस्यति, पदव्यवसायेन स्मृत्या पदार्थं प्रतिपद्यते, पदसमूहप्रतिसन्धानाच्च वाक्यं व्यवस्यति, संबद्धांश्च पदार्थान् गृहीत्वा वाक्यार्थं प्रतिपद्यते" इति । "तत्त्वमसि" इत्यादिवेदान्तमहावाक्यानां पुरोहितोऽयं राजा संवृत्त इतिवत् तत्सदृशस्त्वमसीत्याद्यर्थपरतया गौणार्थं स्वीकृत्य कथञ्चिद् योजयन्ति च । तेषां मते हि शास्त्रेण लिङ्गज्ञानं तेन मननं तेन निदिध्यासनं निदिध्यासनोत्तरं निदिध्यासनरूपयोगजन्यपुण्यविशेषरूपया योगजधर्मलक्षणेति ख्यातया प्रत्यासत्त्या तत्त्वसाक्षात्कारस्ततो मिथ्याज्ञाननिवृत्तौ मोक्षः, मननादिना च निष्कामकर्मसापेक्षेण तत्त्वसाक्षात्कारो जन्यते । अत एव तदर्थिनः शिष्टास्तादृशकर्मनिष्ठा दृश्यन्ते । अत एव क्वचिन्मननादिनिमग्नमनसामपि तद्विलम्बस्तद्विलम्बादेव भवति । तत्र श्रवणं श्रुतिशिरःसमुद्भूतम् 'आत्मा इतरेभ्यो भिद्यते' इत्याकारकं ज्ञानम् । तच्छायमेवानुमितिरूपं मननं तत्समानशीलमेव स्मरणरूपं निदिध्यासनं तदनुरूप एव प्रत्यक्षप्रमाणजन्यस्तत्त्वसाक्षात्कार इत्येतेषां चतुर्णां परस्परसापेक्षेण मोक्षजनकत्वे मूलभूता प्रमाणान्तरानपेक्षा श्रुतिरेव भगवती साक्षिणीति तु तैरप्यङ्गीक्रियते ।

७. साङ्ख्यमतेन निमित्तोपपादनम्

अथेदानीं सांख्यमतेन विचार्यते—सांख्यसूत्रप्रणेता कपिलोऽपि तार्किकान्तर्गत एव । स ह्येवं मन्यते—जगतो मूलकारणमत्यन्तसूक्ष्मम् । न तत्साध्यं किन्तु सिद्धमेव । सिद्धे च वस्तुन्यस्त्येव प्रमाणान्तरस्यावकाशः । यथा–'देवदत्त आगतः' इत्युक्ते तु तदागमनस्य निष्पन्नत्वात् तत्र प्रत्यक्षेणानुमानेन वा यथायथं तदागमनमवधारयितुं शक्यत एव, तथा जगतो मूलकारणं सिद्धमेवेत्यस्त्यवकाशस्तत्र प्रमाणान्तरस्य । यद्यपि जगत्कारणस्य सूक्ष्मतरत्वान्न तत्र प्रत्यक्षं क्रमते, तथाप्यनुमानस्य तत्र गतिर्न प्रतिहन्यते केनापि । कार्यं प्रत्यक्षमनुभूय तदनुरूपं तत्कारणं कल्पयन्त ईदृशेनैवैतत्कारणेन भवितव्यमिति निश्चिन्वन्ति जनाः । न केवलमत्र जगत्कारणविषयेऽनुमानप्रमाणस्य प्रवेशः, किन्तु तदेवैकं जगतो मूलकारणं ज्ञापयितुं प्रभवति; यतः श्रुतिरप्यनुमानं पुरस्कृत्य जगतो मूलकारणं ज्ञापयितुं प्रवृत्ता। यथा छान्दोग्ये—"नेदममूलं भविष्यति" [६।८।३] इत्येवं दृश्यमानमिदं कार्यभूतं शरीरं कारणं विना नैव स्यादित्युक्त्वा ततस्तस्यान्नं मूलं तदपि कार्यमेवेति तस्य मूलमुदकं तदपि

कार्यमिति तस्यापि मूलं तेज इति। एवं परमं मूलकारणं प्रतिपद्यस्वेति श्रुतिराह। तथा मूलकारणं ज्ञापयितुं प्रवृत्तायाः—"यतो वा इमानि भूतानि जायन्ते" इति श्रुतेरप्ययमेवाभिप्रायः। एवं च परावलम्बिनी श्रुतिर्न स्वातन्त्र्येण मूलकारणं बोधयितुं प्रभवति, किन्त्वनुमानद्वारैव। तथा च जगतो मूलकारणं केवलमनुमानेनैव सिध्यति, तथा च सांख्यानां तार्किकान्तर्गतत्वं निर्विवादमेवेति भूतभौतिककार्यानुसारेण तदनुरूपं त्रिगुणात्मकं प्रधानशब्दवाच्यं जडं सूक्ष्मं वस्तु जगतो मूलमिति सिध्यति। एवं चैतन्मते विवेकज्ञानोपयोगिन्या बुद्धेः सात्त्विको धर्मोऽभ्युदयनिःश्रेयसहेतुः। तत्र यागदानाद्यनुष्ठानजनितो धर्मोऽभ्युदयहेतुः, अष्टाङ्गयोगानुष्ठानजनितश्च निःश्रेयसहेतुः। तथा चाष्टाङ्गयोगानुष्ठानजनितं विवेकज्ञानं हि मोक्षसाधनम्। विवेकश्च भेदः, स च यस्य यस्मात्तयोर्द्वयोर्ज्ञाने सत्येव ज्ञातुं शक्यते, नान्यथा। तद् द्वयं च प्रकृतिपुरुषरूपं तत्त्वशब्देनोच्यते। अत एव तत्त्वज्ञानान्मोक्ष इति प्रवादः। तथा च विवेकज्ञाने प्रतियोगित्वेनानुयोगित्वेन वा यस्य संबन्धस्तत्तत्त्वमिति तत्त्वसामान्यलक्षणम्। तत्र मूलप्रकृतेरत्यन्तसूक्ष्मत्वेन दुर्ज्ञेयतया ततो भेदः पुरुषे पुरुषाद्वा तत्र भेदो दुर्ज्ञेय इति तदर्थं प्रकृतिकार्यज्ञानमावश्यकम्। पुरुषश्च स्वस्मिन् विद्यमानो यः प्रकृतेस्तत्परिणामभूताया बुद्धेश्च सकाशाद् भेदस्तस्याग्रहात् स्वं बुद्धिस्वरूपं मन्यमानो बुद्धिगतं सुखादिकं स्वस्यैवेति जानंस्तन्निवारणाय मोक्षमपेक्षते। तत्कैवल्यं प्रकृतिपुरुषभेदग्रहमूलकमिति तादृशभेदग्रहं विना न संभवतीति मोक्षसाधनीभूतभेदज्ञानाय भेदप्रतियोगिभूतप्रकृत्यपेक्षा पुरुषस्य भवति। प्रधानस्य स्वकर्मकदर्शनार्थं पुरुषापेक्षायां पुरुषस्य च कैवल्यार्थं प्रधानापेक्षायामुभयोः प्रधानपुरुषयोः संयोगो भवति पङ्ग्वन्धवत्। तदुक्तम्—

पुरुषस्य दर्शनार्थं कैवल्यार्थं तथा प्रधानस्य।
पङ्ग्वन्धवदुभयोरपि संबन्धस्तत्कृतः सर्गः॥ [सां० का० २१]

अत्र पुरुषः क्रियारहितत्वात् पङ्गुतुल्यः, प्रधानं चाचेतनत्वादन्धतुल्यम्। एवं च विवेके सति पुरुषस्यात्मानं प्रकाश्य विनिवर्तते प्रकृतिः। यथा भर्त्रा दृष्टदोषा स्वैरिणी भर्तारं पुनर्नोपैति, यथा वा नर्त्तकी प्रेक्षकजनस्य नृत्यं दर्शयित्वा नृत्यान्निवर्तते, तथैव प्रकृतेऽपि। एवं च त्रिविधदुःखस्यैकान्तात्यन्तनिरोध एव स्वभावतः केवलस्यापि पुरुषस्य कैवल्यम्। तत्साधनस्य विवेकज्ञानस्य धर्ममूलकत्वाद्धर्मस्य च वेदान्तवाक्यार्थज्ञानाधीनत्वात्

तस्य च पदार्थज्ञानाधीनत्वादित्यगृहीतशक्तिकस्य शब्दस्य बोधानुपधायकत्वाद् गृहीतशक्तिकस्यैव तत्स्वीकार्यम् । शक्तिग्रहश्चानुमानाधीनः, अनुमानाधीनश्च शब्दस्यार्थेन कश्चन संबन्धोऽस्तीति निश्चिनोति । एवं सामान्येन विशिष्टार्थस्य विशिष्टवाक्येन संबन्धं निश्चित्यानन्तरमावापोद्वापाभ्यां तत्तच्छब्दस्य तत्तदर्थे संबन्धं निश्चिनोति । स एव संबन्धः सांख्यमते शक्तिरित्युच्यते । तज्ज्ञानपूर्वक एव च शब्दार्थव्यवहार इत्येवमर्थे वादिनां नानापक्षाः सन्ति ।

८. शाब्दिकमतेन निमित्तोपपादनम्

ते च नोपपद्यन्ते । अत्र शब्दविदः—वाक्यादेवार्थबोधस्य सर्वानुभवसिद्धत्वेन वाक्यस्यैव वर्णव्यतिरिक्तस्य वाचकत्वं व्यवस्थापयन्ति । तथा हि—वर्णानां प्रत्येकं वाचकत्वे द्वितीयादिवर्णोच्चारणानर्थक्यप्रसङ्गात्समुदायस्य वाचकत्वमुपेयम् । तत्तु न युक्तम्, वर्णानामुत्पत्तिपक्षे यौगपद्येनानुत्पत्त्या, अभिव्यक्तिपक्षे त्वनुविनाशिक्रमिकाभिव्यक्त्या समुदायाभावात्, समुदायत्वं चैकबुद्धिविषयत्वम् । न च पक्षद्वयेऽपि पूर्वपूर्ववर्णानुभवजनितसंस्कारसंहितान्त्यवर्णानुभवहेतुकैकस्मृत्युपारूढवर्णानां वाचकत्वमस्त्विति वाच्यम्; तथा च सति सरो रस इत्यादावर्थप्रतीत्यविशेषप्रसङ्गात् । न च संस्कारवशादव्यवहितोत्तरत्वसंबन्धेन पूर्ववर्णवत्त्वं तदुत्तरवर्णे प्रत्यक्षेण गृह्यते, एवमुपस्थितविशिष्टतद्वर्णवत्त्वं तदुत्तरवर्णे, तथा च सरो रस इत्यादौ विशेषोपपत्तिरिति वाच्यम्; तथापि वर्णसमूहरूपपदस्य कदाप्यसत्त्वेन तत्र शक्तेः कल्पयितुमशक्यत्वात् । न च पूर्वपूर्ववर्णजाः शब्दाः शब्दजशब्दन्यायेन चरमवर्णप्रत्यक्षपर्यन्तं जायमाना एव सन्तीति न काप्यनुपपत्तिरिति वाच्यम्; तथापि गामानयेत्येकं वाक्यं गौरित्येकं पदमिति चाबाधितैकप्रतीतेः सर्वसंमताया विना स्फोटमनिर्वाहात् । न खल्वियमभिन्नवस्तुविषया बुद्धिः परस्परव्यतिरिक्तनानावर्णानेव गोचरयितुमर्हति । न च वनमिति बुद्धेर्वृक्षा इव वाक्यमिति बुद्धेर्वर्णाः पदानि वा विषया भवन्तीति वाच्यम्; तत्रैकदेशस्येवात्रैकबुद्धिविषयत्वादेरनुसन्धानाभावात् । तस्मादेकोऽनवयवो वाक्यस्फोटः शब्दब्रह्मापरनामधेयोऽङ्गीकार्यः । स्फुटत्यर्थोऽस्मादिति स्फोटः । स च वर्णवानिव ध्वनिप्रकाश्यः, यथा पटे नानारञ्जकद्रव्याहितनानावर्णोपरागः क्रमेण तथैकस्मिन्नेव स्फोट उच्चारणक्रमेण क्रमवानिव तत्तद्वर्णस्य रूपानुरागः । स तु विवर्त्ताधिष्ठाने शब्दब्रह्मणि वियदादिरिवाविद्याकल्पितो व्यावहारिकनित्यत्ववानिति न दोषः ।

९. स्फोटस्यैकत्वेऽप्युपाधिभेदेन वैलक्षण्यम्

न च स्फोटस्यैकत्वेन कथमस्मादविलक्षणाद्विलक्षणतत्तदर्थबोध इति शङ्क्यम्; उपाधिभेदेन तस्य वक्तुं शक्यत्वात्। यतो मणिकृपाणदर्पणादौ मुखमभिन्नमपि भिन्नमिव नियतगौरत्वादिवर्णपरिमाणविशेषमप्यनेकविधवर्णपरिमाणमिव यथा प्रतीयते, तथा प्रयत्नभेदभिन्नेषु ध्वनिषु स्फोट एकोऽप्यनेकवर्णात्मेव निरवयवोऽपि सावयव इव प्रतीयते। तदुक्तं हरिणा—

नादस्य क्रमजन्मत्वान्न पूर्वो नापरश्च सः।
अक्रमः क्रमरूपेण भेदवानिव जायते॥
प्रतिबिम्बं यथान्यत्र स्थितं तोयक्रियावशात्।
तत्प्रवृत्तिमिवान्वेति स धर्मः स्फोटनादयोः॥ इति।

तथा चौपाधिकभेदः स्फोटस्येति विलक्षणबोधोपपत्तिः। तत्र प्रतिवाक्यं सङ्केतग्रहासंभवाल्लघूपायेन तदन्वाख्यानाय कल्पनया पदानि विभज्य तेषु प्रकृतिप्रत्ययभागान् कल्पयित्वा कल्पितान्वयव्यतिरेकाभ्यां तत्तदर्थविभागं शास्त्र एव परिकल्पयन्ति स्म। एतदेवाभिप्रेत्य 'विभाषा सुपः' इति सूत्रे कैयटः—"अन्वयव्यतिरेकाभ्यां प्रकृतिप्रत्ययानामिह शास्त्रेऽर्थवत्तापरिकल्पनात्" इत्याह।

१०. बाह्याभ्यन्तरभेदेन स्फोटस्य द्वैविध्यम्

स च स्फोटो द्विविधः—बाह्यः, आभ्यन्तरश्च। बाह्योऽपि जातिव्यक्तिभेदेन द्विविधः। तथा च निरंश एवाभिन्नो व्यक्तिस्फोटो जातिस्फोटो वा बहीरूप आन्तरः शब्दार्थमयो वा बुद्ध्यनुसंहारो वाक्यमिति स एव वाचक उपपन्नः। यस्तु भेदप्रतिभासः स उपाधिकृत एव। तथोपांशु परमोपांशु व्यक्तो व्यक्ततरश्च विलम्बितो विलम्बिततरश्च द्रुतो द्रुततरश्चेत्यादिकाः प्रतिभासा अभिव्यञ्जकध्वनिकृता न पुनः सत्या इति। तस्माद्यः शब्दो व्यक्त उपांशुकृत्वाऽधीयते सोऽभिव्यञ्जकध्वनिकृतात् क्रमात् क्रमवान् नानाविधावस्थायुक्तः प्रतीयते। परमार्थतस्त्वसावक्रम एव स्फोटात्मा प्रतिभासः। "उपाधिवशात्तु तत्र बुद्धिर्विततेवानुगम्यते" इति हेलाराजः। तदुक्तं हरिणा—

अव्यक्तः क्रमवान् शब्द उपांश्वयमधीयते ।
अक्रमस्तु वितत्येव बुद्धिर्यत्रावतिष्ठते ॥ इति ।

इदमेव व्यक्तिस्फोटस्य स्वरूपं बोध्यम् । यथा चित्रं हि रूपमवयविगतमनंशमेकमेव । तस्यैवावयवगतैर्नीलादिभिः पृथग्रूपैरेव समाख्यानं क्रियते । तथैवैकस्य निर्विभागस्य वाक्यस्य सर्वतः परिपूर्णस्य वाक्यान्तरगतैः पदान्तरैरन्वाख्यानं क्रियते। तदुक्तं हरिणा—

चित्रस्यैकस्वरूपस्य यथा भेदनिदर्शनैः ।
नीलादिभिः समाख्यानं क्रियते भिन्नलक्षणैः ॥
तथैवैकस्य वाक्यस्य निराकाङ्क्षस्य सर्वतः ।
शब्दान्तरैः समाख्यानं साकांक्षैरनुगम्यते ॥ इति ।

बालव्युत्पादनाय पदे हि यथा प्रकृतिप्रत्ययविभागोऽसत्य एव, तथैव वाक्ये वाक्यार्थप्रतिपादनायापोद्धारः पदानामुपवर्ण्यत इति बोध्यम् ।

११. जातिस्फोटनिरूपणम्

जातिस्फोटो भिन्नप्रयत्नोदीरितध्वन्यभिव्यक्तो विलक्षण एव । यथा विशिष्टप्रयत्नजनितेन विक्षेपविशेषेणाभिव्यक्ता भ्रमणत्वादिजातिः प्रत्येकं समाप्तापि न गृह्यते, भ्रमणानामन्त्यवृत्तौ तु गृह्यते; एवं जातिस्फोटलक्षणस्य ध्वनिरभिव्यञ्जकः सरूप इव प्रतीयते। अस्य निरंशस्य स्फोटस्य पूर्वापरभाव उपाधिकृतो न स्वतो नित्यत्वात् । तदुक्तं हरिणा द्वितीये काण्डे—

यथाक्षेपविशेषेऽपि कर्मभेदो न गृह्यते ।
आवृत्तौ व्यज्यते जातिः कर्मभिर्भ्रमणादिभिः ॥
वर्णवाक्यपदेष्वेवं तुल्योपव्यञ्जना श्रुतिः ।
अत्यन्तभेदे तत्त्वस्य सरूपेव प्रतीयते ॥

अस्यार्थः—वर्णपदवाक्येषु श्रुतिः=अभिव्यञ्जको ध्वनिरत्यन्तभेदे तत्त्वस्य वर्णपदवाक्यस्फोटलक्षणस्य साभिव्यञ्जिका सरूपेव प्रतीयते । परमार्थतो भिन्नाऽपि सती तुल्यः सदृश उपव्यञ्जनः स्थानकरणाभिघातलक्षणो यस्याः सा तथेति । तेन भिन्नप्रयत्नोदीरितध्वन्यभिव्यक्तोऽयं जातिस्फोटो विलक्षण एवेति बोध्यम् ।

१२. आन्तरस्फोटोपवर्णनम्

एवं तावद् बाह्यं व्यक्तिस्फोटं जातिस्फोटं वा वाचकमाश्रित्य वाक्यं निरूपितम्। आन्तरं त्वनवयवं बोधस्वभावं शब्दार्थमयं निर्विभागं शब्दतत्त्वं यद्गीतं तदेव मुख्यं नादैर्बहिः प्रकाशितं वाक्यमाहुराचार्याः। तदुक्तं हरिणा—

यदन्तः शब्दतत्त्वं तु नादैरेकं प्रकाशितम्।
तदाहुरपरे शब्दं तस्य वाक्ये तथैकता॥

एवं चान्तरस्य स्फोटलक्षणस्य शब्दस्य यथा विभागो नास्ति, तथा तद्वाच्यस्य प्रतिभारूपस्यार्थस्य कुतो भविष्यति। यथा हि चित्ररूपावभासिनी प्रत्यक्षा संविद् अवयवगतनीलादिरूपभेदेऽपि नार्थान्तरगोचरतां जहाति। न ह्यर्थान्तरसमवायि नीलानीलादिमात्रं चित्रम्, अवयविनो द्रव्यस्य नीरूपतयाऽचाक्षुषत्वप्रसङ्गात्। वस्तुस्थित्या तत्र ज्ञान आकारभेदो नास्ति, तथाऽऽभ्यन्तरवाक्यवाक्यार्थयोः स्वरूपं बोध्यम्।

१३. शब्दार्थयोरभेदोपपादनम्

तौ च शब्दार्थावभिन्नावेकस्यान्तरस्य तत्त्वस्य संबन्धिनौ वस्तुतो बहिःस्थितौ भेदाविव प्रतिभासेते। तदुक्तं हरिणा—"एकस्यैवात्मनो भेदौ शब्दार्थावपृथक्स्थितौ" इति। न च शब्दार्थौ वाच्यवाचकाविति प्रसिद्धमतः कथं तयोरभेद इति शङ्कनीयम्; शब्दतत्त्वस्यान्तरस्य ज्योतीरूपस्य भेदप्रतिभासो न विरुध्यते शक्तिभेदात्। तदुक्तं द्वितीयकाण्डे हरिणा—

प्रकाशकप्रकाश्यत्वं कार्यकारणरूपता।
अन्तर्मात्रात्मनस्तस्य शब्दतत्त्वस्य सर्वदा॥
तस्यैवास्तित्वनास्तित्वसामर्थ्ये समवस्थिते।
अक्रमे क्रमनिर्भासे व्यवहारनिबन्धने॥ इति।

एवं च सर्वरूपविकल्पातीतमपि ब्रह्म समाविष्टसर्वशक्तित्वात् सर्वरूपेण च भासमानं कालाख्यस्वातन्त्र्यशक्तिसमाविष्टं मूर्त्तिप्रविभागमारचयति। तथा चाऽप्रविभागमपि देशकालाभ्यां प्रविभक्तमिव चकास्तीति तत्प्रविभागानुसारेण जन्मनाशौ समस्तक्रियाभेदानुयायिनौ व्यावहारिकौ प्रसिद्धौ स्तः।

१४. ब्रह्मणोऽविद्याकालशक्तिकृतभेदावभासः

सर्वमेव विवर्त्तदर्शनेनोपपद्यते, एकस्य हि तत्त्वादप्रच्युतस्य निष्क्रियस्य सक्रमस्येव प्रकाशनं विवर्त्तो ज्योतितिः। इदं तत्त्वम्—आचार्यभर्तृहरिमतेऽद्वयस्य ब्रह्मणोऽनादिसिद्ध-जीवात्मगता शक्तिर्वर्तते, यद्वशात् तिरोधाय तत्त्वं भेदेन क्रमिको व्यवहारो भवति, क्रमेऽपि ब्रह्मणा भेदावभासनमविद्याकृतम्। तत्रैव क्रमाभासनं कालाख्यस्वातन्त्र्यशक्तिकृतमेव। शक्तिश्च न ब्रह्मणो भावात् परमार्थसतो भिन्नेति निरूपयिष्यते। तथा च विश्वात्मैकमेव परं ब्रह्म नानाविधकार्यकारितयाऽनन्तशक्तिमत्, तथा च क्रमिकांश्चक्रभ्रमिवत् परावर्तमानान् जन्मादिषड्भावान् प्रकाशयन् कालयति भूतानीति काल इत्युच्यते स विभुः स्वतन्त्रः। अत एव स्वातन्त्र्यशक्तिः काल इति वाक्यपदीये सिद्धान्तितम्—

अध्याहितकलां यस्य कालशक्तिमुपाश्रिताः।
जन्मादयो विकाराः षड् भावभेदस्य योनयः॥ इत्यत्र।

कालसमुद्देशेऽपि—

प्रतिबन्धाभ्यनुज्ञाभ्यां वृत्तिर्या तस्य शाश्वती।
तथा विभज्यमानोऽसौ भजते क्रमरूपताम्॥
निर्भासोपगमो योऽयं क्रमवानिव दृश्यते।
अक्रमस्यापि विश्वस्य तत्कालस्य विचेष्टितम्॥

इत्युक्तं हरिणा। हेलाराजोऽप्याह—"अक्रमं ब्रह्म विवर्त्तरूपं विश्वं तस्य यदिदं क्रमेणैवावभासनं तत्कालशक्तिकृतप्रतिबन्धाभ्यनुज्ञासामर्थ्यम्, कालाख्या हि ब्रह्मशक्तिरविद्यैव क्रमावभासकारितया जीवात्मसु सफला" इति। एवं च निष्क्रमं हि ब्रह्मतत्त्वं विद्यामयं कालकलितमविद्यावशात् क्रमरूपोपग्रहेण यथायथं विवर्त्तत इति कालानुवेधात् पदार्थानां क्रमेण प्रत्यवभासोऽनादिसिद्धजीवात्मगतः, सर्वस्य च भेदजातस्याऽविद्यामयत्वात्। कालेऽपि दर्शनभेदेन योऽयं विभागः सोऽप्यविद्याविजृम्भित एव। आविर्भूतायां तु विद्यायां सर्वस्य भेदप्रपञ्चस्यानवगमादयमप्यपैति। तदुक्तं वाक्यपदीये—

सर्वशक्त्यात्मभूतत्वमेकस्यैवेति निर्णयः।
भावानामात्मभेदस्य कल्पना स्यादनर्थिका॥ इति।

एकमेव ब्रह्म सर्वशक्तिमदिति प्रमाणेन सिद्धम् । इत्थं चाविद्यापरिकल्पितस्य भावभेदस्यापारमार्थिकत्वात् कार्यनानात्वादुन्नीयमानः शक्तिभेद एवैकस्य युक्तो न तु स्वरूपभेद इति निर्णीतम् ।

१५. अद्वयस्यैव ब्रह्मणो महासत्तास्वरूपत्वम्

एवं चाद्वयं परमार्थसत्यं यत् सैव जातिर्महासत्ताख्या परब्रह्मस्वभावेति व्यवहृतमद्वैतवादिभिराचार्यैः । भेदप्रत्ययेष्वबाध्यमानत्वात् सर्वत्रानुगमाच्च । सर्वत्रानुगमादेव सत्यस्वरूपं व्यवस्थितम् । तस्या एव गोत्वादिजातिभेदेन विवर्त्ते सति व्यवहारः, घटाद्युपहिता घटत्वादिर्जातिः, द्रव्याद्युपहिता द्रव्यत्वादिः, द्रव्यादित्रयोपहिता सत्तेति रीत्यैकस्या अप्युपाधिभेदाद्भेदः । तदुक्तं हरिणा—

संबन्धिभेदात् सत्तैव भिद्यमाना गवादिषु ।
जातिरित्युच्यते तस्यां सर्वे शब्दा व्यवस्थिताः ।।
तां प्रातिपदिकार्थं च धात्वर्थं च प्रचक्षते ।
सा नित्या सा महानात्मा तामाहुस्त्वतलादयः ।। इति ।

आश्रयादिभिः स्वसंबन्धिभिर्भेदात् । संबन्धभेदादिति पाठे तु तत्तद्गवादिव्यक्त्युपहितत्वरूपस्य तावद्व्यक्तितादात्म्यानामन्यतमत्वविशिष्टरूपस्य वा संबन्धस्य भेदात् । उपचरितभेदा गवाश्वादिषु सत्तैव जातिर्गोत्वाश्वादिका नान्या परमार्थभिन्ना सा वर्तते । यथैकमपि मुखं तैलोदकादर्शमणिकृपाणादावनेकरूपमवभासते, एवं व्यञ्जकानां गवादीनां भेदात् सत्ता गोत्वादिरूपतयाऽवभासते । तस्यां सत्ताख्यायां जातौ सर्वे गवादयः शब्दा वाचकत्वेन व्यवस्थिता इति सर्वशब्दविषयत्वं सुस्पष्टमेव । तदेव प्रकटयति—"तां प्रातिपदिकार्थं च" इत्यादिना । सर्वभावाभावेषु सद्रूपस्य सामान्यस्यानुगतत्वात् प्रातिपदिकमात्रवाच्या सा सत्ता । धातुभिरपि कारकाधीनलब्धजन्मसु व्यापारव्यक्तिषु समवेता यथोपाधिभेदेन प्राप्तनानात्वा सत्तैवाभिधीयते । सा च जन्मनाशरहितत्वान्नित्या, सत्प्रत्ययस्य सर्वदानुवृत्तत्वात् । अयमेव च सत्ताद्वैतवादः सांख्यनयेऽपि सम्यग्योजितो हेलाराजेन । तथा हि तेषां प्रक्रियोपपादनपूर्वकमुच्यते—योगिनामष्टस्वणिमादिकेष्वैश्वर्येष्वश्रेयःसु श्रेयोबुद्धिरष्टविधो मोहः । सा चास्मितावृत्तिरुच्यते । तादृशास्मितालक्षणस्य सत्त्वप्रधानस्य श्रवणादिविशेषधर्मशून्यस्याभिमान-

मात्रधर्मकस्याऽहङ्कारस्य बुद्धीन्द्रियाणि श्रवणादिधर्मकाणि पञ्च ज्ञानेन्द्रियाणि, रजःप्रधानस्य तु पञ्च कर्मेन्द्रियाणि। एकादशं मनस्तूभयात्मकं बुद्धीन्द्रियं कर्मेन्द्रियं च। शान्तघोरमूढलक्षण-रहितानामविशेषाणां पञ्चतन्मात्राणां पञ्चभूतानि विशेषा विकारा एव, न तु तत्त्वान्तरप्रकृतयः। एवं च षोडशको विशेषपरिणामः। षडविशेषाः पञ्चतन्मात्राणि षष्ठश्चाविशेषोऽस्मिता-मात्रलक्षणोऽहङ्कार इति। एते सत्तामात्रस्यात्मनो महतत्त्वस्य परिणामाः। सन्मात्रं महत्तत्त्वं प्रकृतेरयमाद्यः परिणामो वास्तवो न तु तद्विवर्त्त इति यावत्। यत्तत्परं विप्रकृष्टकालं महत्त-त्वापेक्षया सन्निकृष्टकालेभ्योऽहङ्कारपञ्चतन्मात्रेभ्यो पूर्वभावि महत्तत्त्वं तल्लिङ्गमात्रम्। तस्मिन्नेते सत्तामात्रे महत्यात्मन्यवस्थाय सत्कार्यसिद्धेर्विवृद्धिकार्यं प्राप्नुवन्ति। एवमुत्पत्ति-क्रममभिधाय प्रलयक्रममाह हेलाराजः—"प्रतिसंसृज्यमानाश्च" इत्यादिना ग्रन्थेन। प्रलीय-मानाश्च स्वात्मनि लीनविशेषाः परिणामास्तस्मिन्नेव सत्तामात्रे महत्यात्मनि निलीय सहैव महता तेऽविशेषा अव्यक्तमन्यत्र लयं न गच्छतीत्यलिङ्गं प्रतियन्ति, तस्यैव विशेषणं निःसत्ता-सत्तमिति यत्तन्निःसत्तासत्तं निःसन्निरसद् अव्यक्तमलिङ्गं प्रधानं तत्प्रतीयन्तीति। अयं भावः—सत्त्वरजस्तमसां सामान्यावस्था न क्वचित् पुरुषार्थ उपयुज्यते इति न सती, नापि गगनारविन्दवत् तुच्छस्वभावा, तेन नासत्यपीति। अत्रेदं शङ्कयते—नहि सतो विनाशो संभवति विनाशे वा न पुनरुत्पादः, नह्यसत उत्पाद इति महदादिसद्भावात् पौरुषेय-भोगापवर्गसंपादनं प्रवर्तेत; तत्कथं निःसत्त्वमव्यक्तमित्यत आह—निःसन्निरसदिति। निष्क्रान्तं कारणं सतः कार्यात्। यद्यपि कारणावस्थायां सदेव शक्त्यात्मना कार्यं तथापि स्वोचिता-मर्थक्रियामकुर्वदसदित्युच्यते। न चैतत्कारणं गगनारविन्दायमानकार्यमित्याह—निरसदिति। निष्क्रान्तमसतस्तुच्छरूपात् कार्यादिति गुणानामेष महत्तत्त्वाख्य आद्यः परिणामो लिङ्गमात्र-मित्युच्यते। निःसत्तासत्तमित्यादिना यः पदार्थः पूर्वमुक्तः सोऽलिङ्गाख्यो गुणपरिणामः। यद्यपि गुणा एव प्रधानशब्दवाच्या भवन्ति, तथापि साम्यावस्थायाः प्रधानशब्दवाच्याया गुणेभ्योऽतिरिक्तत्वात् प्रधानस्य गुणपरिणामत्वमुक्तम्। नैतावता प्रधानस्य महत्तत्त्ववत् प्रकृतिविकृत्यात्मकत्वं बोध्यम्। तदुक्तं सांख्यसूत्रे—"मूले मूलाभावादमूलं मूलम्" इति। स्पष्टं चेदं सर्वं साधनपादे योगसूत्रे १६ भाष्ये। इत्थं च सांख्ये बुद्धितत्त्वं महच्छब्दवाच्यं जगत्कारणं निर्दिष्टमित्यतोऽनन्तरस्य विकारसमूहस्य कारणरूपानुगतात् सत्तारूपत्वमविरुद्धमिति सत्तारूपं सर्वं जगदाख्यातमिति सत्ताद्वैतवादः सांख्यनयेनाभ्युपगतो ज्ञायते।

अत्रार्थे निरुक्तकारस्यापि संमतिस्तदुक्तम्—

सैव भावविकारेषु षडवस्थाः प्रपद्यते ।
क्रमेण शक्तिभिस्ताभिरेवं प्रत्यवभासते ॥ इति ।

सन्मात्रस्य ब्रह्मणोऽभिन्ना अविद्याशक्तिमाहात्म्यात् प्राप्तनानात्वाः काश्चन शक्तयः । ताभिर्भावविकारेषु सा सत्तैव षडवस्थाः प्रपद्यते । तदुक्तं हेलाराजेन—"स्वाभिरेव शक्तिभिरव्यतिरिक्ताभिर्जन्मादिरूपतयाऽविद्यायामाभासते । तदेव ब्रह्म सर्वभावेषु समानरूपं सत्तात्मकम्, अन्यस्य तद्व्यतिरिक्तस्याभावात्" इति । अवभासश्च न युगपत्, किन्तु क्रमेणैव । क्रमाख्यापि कालशक्तिर्ब्रह्मणो जन्मवत्सु पदार्थेषु जन्मादिक्रियाद्वारकमेव पौर्वापर्येणावभासोपगमविधायिनीति—"अध्याहितकलां यस्य" इत्यादिना ब्रह्मकाण्डेऽपि सम्यगुक्तम् । तृतीयकाण्डेऽपि—

आत्मभूतः क्रमोऽप्यस्या यत्रेदं कालदर्शनम् ।
पौर्वापर्यादिरूपेण प्रविभक्तमिव स्थितम् ॥ इत्युक्तं हरिणा ।

१६. शक्तिशक्तिमतोरभेदोपवर्णनम्

तथा चात्मीया एव शक्तयः क्रियेच्छास्वातन्त्र्यवाक्कालाद्यात्मिका ब्रह्मणः सन्ति । तासां च शक्तीनां मिथो भिन्नत्वेनाऽवभासमानत्वेऽप्येकत्वं न विरुद्धयते, शक्तिशक्तिमतोरभेदात् । तदुक्तम्—

एकमेव यदाम्नातं भिन्नं शक्तिव्यपाश्रयात् ।
अपृथक्त्वेऽपि शक्तिभ्यः पृथक्त्वेनेव वर्तते ॥ इति ।

शक्तिभ्यो ब्रह्मणोऽपृथक्त्वेऽप्यारोपितः पृथक्त्वावभासः । "न खलु जातिव्यक्तिवदन्याः शक्तयो ब्रह्मणि विद्यन्ते तत्तत्प्रकाशवत्" इति तदर्थं व्याचख्यौ हेलाराजः । तासां शक्तीनां शक्तिशक्तिमतोरभेदेनैकत्वेऽपि भेदावभासप्रयोजिकाऽविद्यैव । तदुक्तम्—

अध्याहृताः कला यस्य कालशक्तिमुपाश्रिताः ॥
एकस्य सर्वबीजस्य यस्य चेयमनेकधा ।
भोक्तृभोक्तव्यरूपेण भोगरूपेण च स्थितिः ॥ इति ।

यथा चिन्तामणिरर्थिनां यथाशयमाकारनानात्वं दर्शयति, तथानन्तशक्तिसमाविष्टं सन्मात्रं ब्रह्माविद्याविजृम्भितसांसारिकप्रमातृविषये नानारूपं चकास्ति । न तत्त्वमविद्ययाऽऽ-

विलीक्रियते। यथा चावरणादिनेन्द्रियस्यैव प्रकाशशक्तिः प्रतिबध्यते, न विषयो विक्रियते; तथैवानाद्यविद्याप्रकल्पितविभागानां जीवानामेव संवेदनशक्तिर्नियम्यते, येन विच्छिन्नार्थाभिधानेन भेदविषयाण्यभिधानानि प्रयुज्यन्ते। तदुक्तं हरिणा तृतीयकाण्डे—

आकारैश्च व्यवच्छेदात् सार्वार्थ्यमनुरुध्यते।
यथैव चक्षुरादीनां सामर्थ्यं नाडिकादिभिः॥ इति।

अपि च—

न तत्त्वातत्त्वयोर्भेद इति वृद्धेभ्य आगमः।
अतत्त्वमिति मन्यन्ते तत्त्वमेवाविचारितम्॥ इति।

एवं च हरिमते सत्याऽसत्ये द्वे रूपे न स्तः, अद्वैतहानिप्रसङ्गात्; किन्तु पारमार्थिकमेकमेवाद्वयम्। प्रपञ्चोऽतत्त्वमिति व्यवह्रियते। एवं चाविद्यापि प्रकाशस्वरूपैव, न तु प्रकाशाभावस्वरूपा, प्रकाशसामान्याभावस्य निरूपयितुमशक्यत्वात्। तदुक्तं हेलाराजेन—"ततश्च योऽयं भेदप्रकाशः सैवैकघनप्रकाशाभावः, प्रकाशविच्छेदोऽविद्या" इति। हरिमतेऽविद्यायाः प्रकाशरूपत्वाच्चैतन्यात्मकत्वं प्रतिपद्यत इति दर्शनान्तराद्विशेषो वोध्यः। "परास्य शक्तिर्विविधैव श्रूयते" इति श्रुत्या च नानाविधाः शक्तयो ब्रह्मणोऽभिन्नाः सन्ति, शक्तिशक्तिमतोरुपादानोपादेययोरत्यन्ताभेदात्। तथा चोक्तं सौरसंहितायाम्—

ब्रह्मणोऽभिन्नशक्तिस्तु ब्रह्मैव खलु नापरा॥
तथा सति वृथा प्रोक्तं शक्तिरित्यविवेकिभिः।
शक्तिशक्तिमतोर्विद्वन् भेदाभेदस्तु दुर्घटः॥ इति।

कौर्मेऽप्याह—

शक्तिशक्तिमतोर्भेदं वदन्त्यपरमार्थतः।
अभेदं चानुपश्यन्ति योगिनस्तत्त्वचिन्तकाः॥ इति।

ज्ञानवासिष्ठेऽपि—

"सर्वशक्तिपरं ब्रह्म नित्यमापूर्णमव्ययम्" इत्यादि।

भास्कररायेणापि नित्याषोडशिकार्णवव्याख्याने सेतुबन्ध उक्तम्—"'देवात्मशक्तिं स्वगुणैर्निगूढाम्' इत्यादिश्रुतिभिः शक्तिशक्तिमतोरभेदाच्च न ब्रह्मणो निर्धर्मकत्वभङ्गः" इति।

पद्मपादाचार्योऽप्याह—"आनन्दो विषयानुभवो नित्यत्वं चेति सन्ति त्रयो धर्माः, अपृथक्त्वेऽपि चैतन्यात् पृथगिवावभासन्ते" इति।

अत एव तादृशशक्तिविशिष्टमेव परं ब्रह्मेति सिद्धान्तः। तेन शक्तेरपि ब्रह्मकोटावेव निवेशः। संक्षेपशारीरकेऽपि—"चिच्छक्तिः परमेश्वरस्य विमला चैतन्यमेवोच्यते" इत्युक्तं संगच्छते। तस्मात् सूपपद्यते सर्वशक्तिसमाविष्टं परं ब्रह्म शब्दार्थमयमिति सिद्धान्तः।

१७. शब्दार्थमयत्वनिरूपणम्

यथा हि मृद्धर्मसामान्याद् मृद्विवर्त्तं घटं व्यवस्थापयन्ति, तथैवाम्नाये संभृतभोक्तृभोग्य-शक्तेर्वागात्मनो बहुधा करणत्वमाम्नातम्, सर्वत्र शब्दमात्रासमन्वयात्। तदुक्तम्—"छन्दोभ्य एव प्रथममेतद्विश्वं व्यवर्तत" इति। सर्वाप्यर्थजातयः सूक्ष्मरूपेण शब्दब्रह्माधिष्ठानाः। तदुक्तम्—"शब्देष्वेवाश्रिता शक्तिर्विश्वस्यास्य निबन्धनी" इति। यथा वाऽन्तर्यामिणः प्रकाशत्वस्वरूपं चैतन्यं तथा प्रकाशो ज्ञानमपि सर्ववाग्रूपानुगतं प्रत्यवभासयति। तदुक्तं ब्रह्मकाण्डे—

अथेदमान्तरं ज्ञानं सूक्ष्मवागात्मना स्थितम्।
व्यक्तये स्वस्य रूपस्य शब्दत्वेन विवर्त्तते॥ इति।

अनुविद्धमिव ज्ञानं सर्वं शब्देन भासते॥
वाग्रूपता चेदुत्क्रामेदवबोधस्य शाश्वती।
न प्रकाशः प्रकाशेत सा हि प्रत्यवमर्शिनी॥ इति च।

अत एव शारदातिलके—

नित्यानन्दवपुर्निरन्तरगलत्पञ्चाशदर्णैः क्रमाद्
व्याप्तं येन चराचरात्मकमिदं शब्दार्थरूपं जगत्।
शब्दब्रह्म यदूचिरे सुकृतिनश्चैतन्यमन्तर्गतं
तद्वोऽव्यादनिशं शशाङ्कसदनं वाचामधीशं महः॥

इत्युक्तं संगच्छते।

सेतुबन्धेऽपि—"अर्थसृष्टिशब्दसृष्ट्योर्युगपदेवाङ्कुरतच्छाययोरिव परस्परसंपृक्तयो-रुत्पत्तिः, पदार्थमात्रस्य शब्दानुविधत्वात्; "वागर्थाविव सम्पृक्तौ" इत्यभियुक्तोक्तेः। ततश्च सृष्टिकारणे ब्रह्मण्यर्थत्ववच्छब्दत्वमप्यस्तीति वक्तव्यम्" इति भास्करराय:।

सा च वाक् न वैखरीरूपाऽतिस्पष्टस्वरूपा, किन्तु सूक्ष्मतमस्वरूपा। वैखरीतोऽपि सूक्ष्मसूक्ष्मतरसूक्ष्मतमानां मध्यमापश्यन्तीपरारूपाणां त्रिविधानां सत्त्वात्, "गुहा त्रीणि निहिता नेङ्गयन्ति तुरीयं वाचो मनुष्या वदन्ति'' इति श्रुतेः। तेषां च नामानि वैखरी मध्यमा पश्यन्ती परेति। श्रुतौ तुरीयपदस्य वैखर्यर्थः। तदुक्तं हरिणा—

वैखर्या मध्यमायाश्च पश्यन्त्याश्चैतदद्भुतम्।
अनेकतीर्थरूपायास्त्रय्या वाचः परं पदम्॥ इति।

१८. परापश्यन्तीनां स्वरूपम्

स्थानेषु विवृते वायौ कृतवर्णपरिग्रहा।
वैखरी वाक्प्रयोक्तॄणां प्राणवृत्तिनिबन्धिनी॥
केवलं बुद्ध्युपादाना क्रमरूपानुपातिनी।
प्राणवृत्तिमतिक्रम्य मध्यमा वाक्प्रवर्तते॥
अविभागा तु पश्यन्ती सर्वतः संहृतक्रमा।
स्वरूपज्योतिरेवान्तः सूक्ष्मा वागनपायिनी॥
सेयमाकीर्णमाणापि नित्यमागन्तुकैर्मलैः।
अन्त्या कलेव सोमस्य नात्यन्तमभिभूयते॥ इति।

अपि चान्यत्र परादीनां स्वरूपं यथा—

परा वाङ्मूलचक्रस्था पश्यन्ती नाभिसंस्थिता।
हृदिस्था मध्यमा ज्ञेया वैखरी कण्ठदेशगा॥
वैखर्यादिकृतो नादः परश्रवणगोचरः।
मध्यमया कृतो नादः स्फोटव्यञ्जक उच्यते॥

अयमर्थः—पश्यन्तीमध्यमावैखरीणां सविकल्पकज्ञानविषयत्वात् 'त्रय्याः' इति, 'अनेकतीर्थभेदायाः' इति च वाचो विशेषणम्। निर्विकल्पकज्ञानविषयायाः परायास्त्वनेकतीर्थभेदत्वं नास्तीत्यर्थः। हरिरप्याह—

स्वरूपज्योतिरेवान्तः परा वागनपायिनी।
तस्यां दृष्टस्वरूपायामधिकारो निवर्तते॥ इति।

एतेन हरिमते तिस्रो वाचः पश्यन्तीमध्यमावैखर्यः । अत एव हरिणोक्तश्लोके 'त्रय्या वाचः' इत्युक्तमिति केषाञ्चिदाधुनिकानां यन्मतं तदपास्तम् , अपर्यालोच्यैव तद्वादस्य प्रचलितत्वात् ।

तत्र मूलाधारचक्रस्था शब्दब्रह्मरूपा परा वाग् विवक्षोत्पन्नप्रयत्नसहकृतेन पवनेनाभिव्यज्यते । ततस्तेनैव यत्नेन नाभिपर्यन्तमागच्छताऽभिव्यक्ता तत्तदर्थतादात्म्यापन्नतत्तच्छब्दविशेषविवक्षाशालिन्या बुद्धिवृत्त्याऽवच्छिन्ना पश्यन्ती वागुच्यते । इदं च वाग्द्वयं सूक्ष्ममीश्वराधिदैवत्यं केवलयोगिनामेव समाधौ क्रमेण निर्विकल्पकसविकल्पकज्ञानविषयो भवति । ततो हृदयपर्यन्तमागच्छता तेन पवनेनाभिव्यञ्जिता हृद्देशस्थप्राणवृत्त्यनुगतत्वेन तत्तद्वर्णविशेषरूषिता स्फोटाभिव्यञ्जिका परश्रोत्रग्रहणाऽयोग्या बुद्धिमात्रग्राह्या हिरण्यगर्भदैवत्या मध्यमा वागुच्यते । आस्यपर्यन्तमागच्छता पवनेन मूर्द्धानमाहत्य परावृत्य ताल्वादिस्थानेष्वभिव्यञ्जिता परश्रोत्रग्राह्या विराडधिदैवत्या वैखरी वागित्युच्यते । अत एव वरिवस्यारहस्ये—"सृष्टिद्वयमूलभूतसूक्ष्मरूपविशेषात्मकत्वादभिन्नशब्दार्थरूपं शब्दब्रह्मेत्यादिपदनिर्देश्यं परं ब्रह्मैव, तच्च प्रकाशैकस्वरूपम्; घटः स्फुरति पटः स्फुरतीत्यादिप्रत्ययेन पदार्थमात्रे स्फुरणाख्यवस्तुविशेषस्य तत्तदभिन्नानुभवसिद्धत्वात् प्रकाशस्यापि स्फुरणमवश्यं वाच्यम्" इत्युक्तं संगच्छते ।

१९. विवर्त्तपक्षाश्रयेण सिद्धान्तस्थापनम्

तथा चोक्तस्वरूपं शब्दार्थमयं यदिदमान्तरं प्रत्यग्चैतन्यं व्यवहारानुपातिभिर्धर्माधर्मैः सर्वास्ववस्थास्वनाश्रितत्वादेव चानादिनिधनं व्यापकं तदेव ब्रह्म कथ्यते । सर्वशब्दरूपात्मकया सर्वशब्दरूपोपग्राह्यरूपतया पराख्यया शक्त्या समाविष्टं सत् शब्दतत्त्वं शब्दब्रह्मेति गीयते । तदुक्तम्—

अनादिनिधनं ब्रह्म शब्दतत्त्वं यदक्षरम् ।
विवर्त्ततेऽर्थभावेन प्रक्रिया जगतो यतः ॥ इति ।

हेलाराजोऽप्याह—"प्रत्यग्चैतन्यस्य परबोधनाय शक्तिरभिष्यन्दत इति । तथा च श्रुतिः—

सूक्ष्मामर्थेनाऽप्रविभक्ततत्त्वामेकां वाचमभिष्यन्दमानाम् ।
उतान्ये विदुरन्यामिव च पूतां नानारूपामात्मनि संनिविष्टाम् ॥ इति ।

तदिदमुक्तस्वरूपं ब्रह्म—"एकमेवाद्वितीयम्", "प्रणव एवैकस्त्रेधाऽभिव्यज्यत" इत्यादिश्रुतिभिरेकमित्याम्नातम्। तदेव च प्रकाशाख्यशब्दशक्तिसमाविष्टम्। तदुक्तम्—"त्रीणि ज्योतींषि त्रयः प्रकाशा योऽयं जातवेदा यश्च पुरुषेष्वान्तरः प्रकाशो यश्च प्रकाशयोः प्रकाशयिता शब्दाख्यः प्रकाशस्तत्रैतत्सर्वमुपनिबद्धं यावत्स्थास्नु चरिष्णु च" इति।

२०. ओङ्कारस्वरूपस्य ब्रह्मणः सर्वास्पदत्वम्

"ओमित्येतदक्षरमिदं सर्वम्" इति श्रुतिव्याख्याने श्रीशङ्कराचार्यभगवत्पादैः—"यदिदमर्थजातमभिधेयभूतं तस्याभिधानाव्यतिरेकात्। अभिधानस्य चोङ्काराव्यतिरेकादोङ्कार एवेदं सर्वम्" इत्युक्तं संगच्छते। यथा सर्पो रजतमित्यादिविकल्पस्य रज्जुः शुक्तिरित्यादि-रधिष्ठानविशेष आस्पदोऽभ्युपगतस्तथा प्राणादिविकल्पस्य तद्विषयस्य सर्वस्य वाक्प्रपञ्चस्यो-क्तोङ्कारमात्रात्मकस्तदास्पदोऽभ्युपगम्यते। अतो युक्तमोङ्कारस्य सर्वास्पदत्वम्। तस्यैव तत्तद्भोगप्रापकप्राण्यदृष्टवासनावशात् प्राण्यदृष्टैश्च तथा विवर्त्तः।

२१. शब्दब्रह्मण एवोपादानकारणत्वम्

उक्तस्वरूपं शब्दब्रह्म विश्वरूपेण विवर्त्तमानमुपादानकारणमुच्यते। तदुक्तम्—"विवर्त्ततेऽर्थभावेन प्रक्रिया जगतो यतः" इति। एकस्य तत्त्वादप्रच्युतस्य भेदानुकारेणा-सत्याविभक्तान्यरूपोपग्राहिता विवर्त्तः स्वप्नविषयप्रतिभासवदिति विवर्त्तस्वरूपं प्रतिपादयन् हेलाराजोऽपि स्वप्नदृष्टान्तेन च जगतो विभिन्नरूपतया भासमानस्य मिथ्यात्वमेवेति ब्रह्माख्यं शब्दतत्त्वमेवाङ्मनसगोचरमन्यदीयरूपभेदोपग्रहेणान्यथा प्रतीयते। तदुक्तम्—

ज्ञेयेन न विना ज्ञानं व्यवहारेऽवतिष्ठते।
नालब्धक्रमया वाचा कश्चिदर्थोऽभिधीयते॥

इति विवर्त्तवाद एव हर्याशयं व्यक्तीचकार, न तु परिणामवादे।

"शब्दस्य परिणामोऽयम्" इत्यत्रापि परिणामपदेन विवर्त्ताख्यः परिणामविशेष एव गृह्यते। अत एव ततोऽग्रे 'व्यवर्तत' इत्यनेनैकवाक्यतया न विरोधः। तथा च तान्त्रिकनय-वन्नेदं परिणामदर्शनमपि तु विवर्त्तपक्ष इति सर्वव्यपदेशातीतं परं ब्रह्म मूर्त्तिक्रियाविवर्त्तरूप-स्यैव विश्वस्योपादानकारणम्। उपादानकारणत्वं च विवर्त्तोपादानत्वमेव।

२२. विवर्त्तोपादानत्वप्रदर्शनम्

तस्मादेवाविभक्तादेकस्मादेव शब्दाख्याद् ब्रह्मणो जगदाख्या विकाराः समुद्भवन्ति, यथैकस्मादेव मनसः स्वप्ने नानाविरुद्धानि रूपाण्यवभासन्ते तद्वत् । तथा चोक्तम्—

आत्मा परः प्रियो द्वेष्यो वक्ता वाच्यं प्रयोजनम् ।
विरुद्धानि यथैकस्य स्वप्ने रूपाणि चेतसः ।। इति ।

यथा वा समुद्रस्य बुद्बुदवीचितरङ्गाख्या विकारा जायन्ते, ते च विकारा उदकात्मनः समुद्राद्वस्तुतो न भिद्यन्ते; तथैव जगदिदमविद्यावशाद्भेदेनावभासमानं ब्रह्मणो न भिद्यते । तथा चोक्तम्—

अभेदिनो निर्विकृतेरनेकमृषास्वरूपान्तरदर्शकत्वम् ।
विवर्त्तशब्दार्थ इह प्रसिद्धस्तरङ्गभेदादिव चन्द्रभेदः ।।

अत्र 'निर्विकृतेः' इत्यनेन पूर्वरूपपरित्यागलक्षणो विकारो निषिध्यते । कारणस्य पूर्वरूपापरित्यागेनाभिन्नं रूपान्तरं विवर्त्त इति विवर्त्तमानतया ब्रह्म जगत्कारणम् , अविद्यायास्तु निमितत्वमात्रत्वं युज्यत एव ।

२३. अविद्याया निमित्तत्वमात्रत्वम्

केवलं नामरूपाभ्यां विभिन्नरूपाभ्यां प्रतिभासमात्रं स्वाप्नप्रतिभासवत् , तत्रैव चाविद्याया निमित्तत्वमात्रत्वं न तूपादानत्वम् , अन्यथा व्यवहारानुपपत्तेः । तदुक्तं धातुसमुद्देशे—

शुद्धतत्त्वं प्रपञ्चस्य न हेतुरनिवृत्तितः ।
ज्ञानज्ञेयादिरूपस्य मायैव जननी ततः ॥ इति ।

जननीत्यस्य निमित्तमात्रमित्यर्थः ।

२४. विवर्त्तस्वरूपप्रदर्शनम्

दोषवशाद्विलक्षणाकारेण भासमानमधिष्ठानमेव विवर्त्त इत्युच्यते—

तथा विकाररूपाणां तत्त्वेऽत्यन्तमसंभवः ।
तदात्मैव च तत्तत्त्वमत्यन्तमतदात्मकम् ।।
सत्यमाकृतिसंहारे यदन्तेऽवतिष्ठते ।
तन्नित्यं शब्दवाच्यं तच्छब्दतत्त्वं न भिद्यते ।।

सत्यासत्यौ तु यौ भागौ प्रतिभावं व्यवस्थितौ।
विकल्परूपं भजते तत्त्वमेवाविकल्पितम् ॥
यत्र द्रष्टा च दृश्यं च दर्शनं वा विकल्पितम्।
तस्यैवार्थस्य सत्यत्वं श्रितास्त्रय्यन्तवेदिनः ॥

इत्यादिहरिवचनानुरोधात्।

२५. परिणामवादखण्डनम्

द्वैतस्य ब्रह्मातिरिक्तस्य निषिद्धत्वम्, "नेह नानास्ति" इत्यादिश्रुतेः। नहि यन्नास्ति तत् कस्यचित् परिणामः संभवति, यथा नरशृङ्गम्। न च दृष्टिरेव परिणामोऽस्तु तदतिरिक्तस्य दृश्याभावादिति वाच्यम्, दृष्टेः फलरूपाया आत्मरूपान्तर्भावेन तत्परिणामत्वानुपपत्तेः। नहि स्वयं स्वस्य परिणामः संभवति, कात्स्न्यैकदेशविकल्पेन परिणामपक्षानुपपत्तेश्च। विवर्त्तपक्षे तु न दोषः, अधिष्ठानस्वरूपातिरिक्तं विवर्त्तो नाम किञ्चिद् वस्तु नास्ति, यदाश्रित्य कात्स्न्यैकदेशविकल्पावतारः स्यात्। किन्त्वधिष्ठानमेव दोषवशाद्विलक्षणाकारेण भासमानं विवर्त्त इत्युच्यते। स एव विलक्षणाकारः कस्येति चेत्, वस्तुतो न कस्यापि; अधिष्ठाने तस्य बाधादन्यत्राप्रतीतेरिति दृष्टिरेव सृष्टिरिति परमसिद्धान्तं दर्शयामास हरिः।

२६. व्याकरणस्य मोक्षोपायत्वप्रदर्शनम्

उक्तमेव परमसिद्धान्तं मनसि निधाय व्यवस्थितसाधुभावे शब्दतत्त्वे संस्क्रियमाणेऽभ्युदयलक्षणो धर्मविशेषो नियमेनाविर्भवति। ततोऽभ्यासाच्च शब्दपूर्वकं योगमधिगम्य ममाहमित्यहङ्कारग्रन्थीन् समतिक्रम्य महता देवेन परेण शब्दब्रह्मणाऽत्यन्तं संसृज्यन्ते वाग्योगविदः। तदुक्तम्—

प्राणवृत्तिमनुक्रान्ते वाचस्तत्त्वे व्यवस्थितः।
क्रमसंहारयोगेन संहृत्यात्मानमात्मनि ॥
वाचः संस्कारमाधाय वाचः स्थाने निवेश्य च।
विभज्य बन्धनान्यस्याः कृत्वा तां छिन्नबन्धनाम् ॥

ज्योतिरान्तरमासाद्य छिन्नग्रन्थिपरिग्रहम् ।
परेण ज्योतिषैकत्वं छित्वा ग्रन्थीन् प्रपद्यते ॥ इति ।

तदनेन पश्यन्तीरूपप्रतिभातत्त्वजन्यां भावग्रामप्रकृतिसत्तां सकलशक्तियुक्तां सम्यगवबुध्य नियतं कैवल्यमाप्नोतीत्येवमुपदिशतो भर्तृहरेराचार्यस्य परमदार्शनिकत्वं युक्ततममेवेति बोध्यम् । किञ्च—

यस्मिन् संमुखतां प्रयाति रुचिरं कोऽप्यन्तरुज्जृम्भते ।
नेदीयान् महिमा मनस्यभिनवः पुंसः प्रकाशात्मनः ॥
तृप्तिं यत् परमां तनोति विषयास्वादं विना शाश्वतीं ।
धामानन्दसुधामयोर्जितवपुस्तत्प्रातिभं संस्तुमः ॥

इति तृतीयकाण्डारम्भे मङ्गलश्लोके हेलाराजेनापि पश्यन्तीरूपप्रतिभातत्त्वसाक्षात्कारेण सच्चिदानन्दरूपतामाप्नोतीत्यभिहितं संगच्छते ।

तथा चायं निर्गलितोऽर्थः—सकलोपाध्यतीतः परमात्मैव वस्तुतो वर्णाश्रमादिरहितः स्वाभिन्नानाद्यविद्यया शक्त्या जीवेशादिविभागेन स्वस्वोचितानि कर्माणि कुर्वन् प्रतिदेहमहमहमिकया बद्ध इव शास्त्रजन्यज्ञानेन मुक्त इव भवति न वस्तुतो बन्धमोक्षवान्; बन्धनिमित्ताया अविद्याया ब्रह्मव्यतिरेकेणाभावात् । परमात्मैवाविद्यासहकारेण जीवजगद्भावादिना व्यवह्रियमाणं वस्तु नान्यत्, श्रुतियुक्तिविरोधात् । अतो द्वैततत्सत्यत्ववादो मूढानामज्ञानविजृम्भित एवेति शिवम् ॥

वादत्रयविमर्शः[1]

श्रीरघुनाथशर्मा, राजकीयसंस्कृतमहाविद्यालयः, काशी।

जन्माद्यस्य यतोऽन्वयादितरतश्चार्थेष्वभिज्ञः स्वराट्
तेने ब्रह्म हृदा य आदिकवये मुह्यन्ति यत्सूरयः।
तेजोवारिमृदां यथा विनिमयो यत्र त्रिसर्गो मृषा
धाम्ना स्वेन सदा निरस्तकुहकं सत्यं परं धीमहि॥

अद्वैतवाद आक्षेपाः

अथेदं वादत्रयं विमृश्यते—विज्ञानवादः, शून्यवादः, अद्वैतवादश्चेति। किमेषु गतानुगतिकत्वेन सामान्यं वैषम्यं वेति। तत्र केचिदाहुः—"अद्वैतवादो विज्ञानवादशून्यवादयोः शब्दान्तरप्रच्छन्नं रूपम्" इति। तथा हि सांख्यप्रवचनभाष्ये विज्ञानभिक्षुः—"यत्तु वेदान्तिब्रुवाणामाधुनिकस्य मायावादस्यात्र लिङ्गं दृश्यते तत्तेषामपि विज्ञानवाद्येकदेशितया युक्तमेव, "मायावादमसच्छास्त्रं प्रच्छन्नं बौद्धमेव च। मयैव कथितं देवि कलौ ब्राह्मणरूपिणा॥" इत्यादिपद्मपुराणस्थशिववाक्यपरम्पराभ्यः। न तु तद्वेदान्तमतम्, "वेदार्थवन्महाशास्त्रं मायावादमवैदिकम्" इति तद्वाक्यशेषादिति। मायावादिनोऽत्र च न साक्षात्प्रतिवादित्वम्, विजातीयेति विशेषणवैयर्थ्यात्; मायावादे सजातीयाद्वैतस्याप्यनभ्युपगमादिति। तस्मादत्र प्रकरणे विज्ञानवादिनां बन्धहेतुव्यवस्थैव साक्षान्निराक्रियते" [सां० सू० १।२२] इति।

माध्वा अपि शून्यवादानुगामित्वमाहुरद्वैतवादस्य। तथा हि श्रीजयतीर्थकृतवादावलीव्याख्यायां भावदीपिकायां मिथ्यात्वानुमानस्य श्रुतिविरोधोपपादनावसरे श्रीराघवेन्द्रयतिः—"शून्यवादिमतेऽप्यर्थक्रियाकारित्वादिना शशशृङ्गादिवैलक्षण्यसत्त्वात्। प्रतिपन्नोपाधौ निषेधप्रतियोगित्वेन तद्वैलक्षण्यस्याद्वैतिमत एवाभावाद् व्यावहारिकसत्त्वस्य च तन्मतेऽपि भावात्,

---

१. अखिलभारतीयप्राच्यविद्यामहापरिषदः षोडशाधिवेशनावसरे पठितोऽयं निबन्धः—सम्पादकः।

वादत्रयविमर्शः

''द्वे सत्ये समुपाश्रित्य बुद्धानां धर्मदेशना। लोके संवृतिसत्यं च सत्यं च परमार्थतः॥ सत्यं तु द्विविधं प्रोक्तं सांवृतं पारमार्थिकम्। सांवृतं व्यावहार्यं स्यान्निवृत्तौ पारमार्थिकम्॥'' इति बौद्धोक्तेः। अत एवोक्तं भगवत्पादैः—''न च शून्यवादिनः सकाशाद् वैलक्षण्यं मायावादिनः'' इति।

साम्प्रतिका अपि केचन पाश्चात्त्यविद्वांसस्तदनुगामिनो भारतीयाश्चाद्वैतमतं बौद्धमतप्रभावभावितं मन्यन्ते। ते हि वदन्ति—''बौद्धदर्शनप्रसिद्धा बुद्धसंवृतिधर्माग्रयाणचतुष्कोट्यादिशब्दा गौडपादीये कारिकाग्रन्थे व्यवहृताः सन्ति। कतिपयानां बौद्धदर्शनकारिकाणामानुपूर्वीसाम्यं च तत्र दृश्यते'' इति। पराक्रान्तं चानुपूर्वीसाम्यप्रदर्शनविषये बौद्धदर्शनप्रयुक्तशब्दानां प्रयोगविषये च सुबहुशो गौडपादीयकारिकाव्याख्यायां[1] श्रीविधुशेखरभट्टाचार्यैः।

किञ्च—''अस्ति नास्त्यस्ति नास्तीति नास्ति नास्तीति वा पुनः। चलस्थिरोभयाभावैरावृणोत्येव बालिशः॥ कोट्यश्चतस्र एतास्तु ग्रहैर्यासां सदावृतः। भगवानाभिरस्पृष्टो येन दृष्टः स सर्वदृक्॥'' [माण्डूक्यका० अलात० ८३–८४] इति कारिकयोः, शून्यतावादिमतप्रतिपादिकायाः—''न सन्नासन्न सदसन्न चाप्यनुभयात्मकम्। चतुष्कोटिविनिर्मुक्तं तत्त्वं माध्यमिका विदुः॥'' इति कारिकायाश्चैकार्थकत्वं दृश्यते। अतः प्राप्तं बौद्धपथानुगामित्वमद्वैतवेदान्तस्येति।

तत्रैतत्पक्षपराक्रियातः प्राग् वादत्रयस्य पार्थक्येन स्वरूपप्रदर्शनमावश्यकम्। अन्यथा हि गभीरे तमसि निविष्टं महद्वैषम्यं न भासेत, येनायं विभ्रमः प्रसृतः।

विज्ञानवादस्वरूपम्

तत्र विज्ञानवादस्वरूपमेव पूर्वं प्रदर्श्यते लाघवेन बुद्ध्यारोहाय। दुरधिगमो हि शून्यवादः। तत्र विज्ञानमेवैकं तत्त्वं ग्राह्यग्राहकोभयाकारम्, नास्ति विज्ञानात् पृथग् बहिरर्थवर्गः। तथा चोक्तम्—

विज्ञप्तिमात्रमेवैतदसदर्थावभासनात्।
यथा तैमिरिकस्यासत्केशचन्द्रादिदर्शनम्॥ [विंशतिका० १]

---

१. ''गौडपादीयं दर्शनम्'' इत्याख्ये निबन्धे ''सुषमायां'' प्रकाशितेऽस्माभिर्विस्तरेण भट्टाचार्यमतं समालोचितम् [द्रष्टव्यम्— व० ८, पृ० ३२४]

विज्ञानं च द्विविधम्—आत्मप्रज्ञप्तिरूपमालयविज्ञानम्, धर्मप्रज्ञप्तिरूपं च विषयविज्ञानं प्रवृत्तिविज्ञानाख्यम्। सोऽयं द्विप्रकारोऽपि विज्ञानपरिणाम एव। एवं च सर्वं विज्ञेयं परिकल्पितस्वभावत्वाद्वस्तुतो न विद्यते, विज्ञानं पुनः प्रतीत्यसमुत्पन्नत्वाद् द्रव्यतोऽस्तीत्यभ्युपेयम्।

विज्ञानवादे नास्ति परलोको नापि जन्मान्तरसंबन्धी आत्मा। तथा च तत्त्वसंग्रहे शान्तरक्षितवचस उद्धारः—

तदत्र परलोकोऽयं नान्यः कश्चन विद्यते।
उपादानतदादेयभूतज्ञानादिसन्ततेः ॥

विज्ञाने विषयावभास एव बन्धः, विषयावभासशून्यत्वरूपं कैवल्यमेव विज्ञानस्य मोक्षः। तदुक्तम्—

यदा त्वालम्बनं ज्ञानं नैवोपलभते तदा।
स्थितो विज्ञानमात्रत्वे ग्राह्याभावे तदग्रहात् ॥
अचित्तोऽनुपलम्भोऽसौ ज्ञानं लोकोत्तरं च तत्।
स एवानास्रवो धातुरचिन्त्यः कुशलो ध्रुवः ॥
सुखो विमुक्तिकायोऽसौ धर्माख्योऽयं महामुनेः।

[त्रिंशिकाविज्ञप्तिभाष्ये, २८–३०]

तादृशविज्ञानस्य सुखरूपत्वं त्वशेषदुःखनिवृत्तिरूपतया।

वस्तुतो बाह्यार्थाभावेऽपि पूर्वपूर्वप्रत्ययविज्ञानीयानुशय(वासना)वशाच्चोत्तरोत्तरविज्ञानेष्वात्मादिनिर्भासरूपो रूपादिनिर्भासरूपश्च विषयावभासः, तत्प्रयुक्त उपचारश्च। एतच्च वर्णितं त्रिंशिकाविज्ञप्तिभाष्ये—आत्मधर्मोपचारो हि विविधो यः प्रवर्तते। विज्ञानपरिणामोऽसौ" इति प्रथमकारिकाव्याख्यानावसरे।

पञ्चानां चक्षुरादिविज्ञानानां तदनुचरमनोविज्ञानसहितानां बीजाश्रयत्वाज्जन्मोपादानाच्चालयविज्ञानं मूलविज्ञानमित्युच्यते।

पञ्चानां मूलविज्ञाने यथाप्रत्ययमुद्भवः।
विज्ञानानां सह न वा तरङ्गाणां यथा जले ॥

[त्रिंशिकाविज्ञप्तिभाष्ये, १५]

सह न वेति—युगपत् क्रमेण वेत्यर्थः ।

विज्ञानवादिमते सर्वमपि ज्ञानमात्मादिनिर्भासं वा रूपादिनिर्भासं वा सविकल्पकं स्वलक्षणमात्रगोचरं वा निर्विकल्पकं विज्ञानातिरिक्तविषयाभावेऽपि तदुल्लेखितया भ्रान्तमेव । लौकिकस्तु प्रमाणाप्रमाणव्यवहारस्तात्कालिकबाधाबाधाभ्यां कल्पितः । विज्ञानस्य स्वप्रकाशत्वमप्येतन्मत एकस्मिन्नपि विज्ञानात्मके वस्तुनि कल्पिताकारभेदेन कर्मकर्तृभावाभ्युपगमेन । सर्वेषां च विज्ञानानां क्षणिकत्वम्, यत्सत् तत्क्षणिकमिति स्थितेः ।

शून्यवादस्वरूपम्

शून्यवादिनो माध्यमिकास्तु विज्ञानस्याप्यभावं संगिरन्ते । तथा हि सर्वदर्शनसंग्रहे माधवीये—"ते च माध्यमिकयोगाचारसौत्रान्तिकवैभाषिकसंज्ञाभिः प्रसिद्धा बौद्धा यथाक्रमं सर्वशून्यत्वबाह्यार्थशून्यत्वबाह्यार्थानुमेयत्वबाह्यार्थप्रत्यक्षत्ववादानातिष्ठन्ते" इति ।

तत्रार्थशून्यं विज्ञानं योगाचाराः समाश्रिताः ।
तस्याप्यभावमिच्छन्ति ये माध्यमिकवादिनः ॥ [श्लोकवार्त्तिके]

"ज्ञानापह्नववादिनोऽपि प्रथममर्थपह्नुत्य निर्विषयज्ञानानुपपत्तेर्ज्ञानमपह्नुवते" इति तत्रत्यन्यायरत्नाकरे ।

इति बहिर्विषयप्रतिपादनान्न तदभावकृतामतिसंवृतिः ।
उभयतत्त्वविदां परमार्थतः क्षममिदं धुरि धर्मविचारणे ॥
[शून्यवादान्तस्थश्लोकवार्त्तिके]

संवृतिः परमार्थश्च सत्यद्वयमिदं स्थितम् ।
बुद्धेरगोचरस्तत्त्वं बुद्धिः संवृतिरुच्यते ॥
[बोधिचर्यावतारे, ६ परिच्छेदे]

व्याख्यातं चैतत्तत्रैव—संव्रियते आव्रियतेऽनयेति संवृतिरविद्या । सा द्विधा—तथ्यसंवृतिर्मिथ्यासंवृतिश्चेति । तत्र संवृतिसत्यमदोषवदिन्द्रियैरुपलब्धं नीलादिकम्, मिथ्यासंवृतिसत्यं च दोषवदिन्द्रियोपलब्धं मायामरीचिप्रतिबिम्बादि । परम उत्तमोऽर्थः परमार्थः=अकृत्रिमं वस्तुरूपम्, यदधिगमात् सर्वावृतिवासनानुसन्धिक्लेशप्रहाणं भवति । सर्वधर्माणां निःस्वभावता

शून्यता तथतेत्यादयः पर्यायाः । सर्वस्य हि प्रतीत्यसमुत्पन्नस्य परायत्तात्मलाभस्य प्रतिबिम्बस्येव कुतः सत्स्वभावता । यद्वक्ष्यति—

मायया निर्मितं यच्च हेतुभिर्यच्च निर्मितम् ।
याति [चेत्] तत्कुतः कुत्र याति चेति निरूप्यताम् ॥
यदन्यसन्निधानेन दृष्टं न तदभावतः ।
प्रतिबिम्बसमे तस्मिन् कृत्रिमे सत्यता कथम् ॥

अपि च—

न स्वतो नापि परतो न द्वाभ्यां नाप्यहेतुतः ।
उत्पन्ना जातु विद्यन्ते भावाः क्वचन केचन ॥ इति ।

मूले कारिकायां चकारः सत्यद्वयस्यातुल्यबलतां समुच्चिनोति । तत्र संवृतिसत्यमवितथंरूपं लोकस्य परमार्थसत्यं च विसंवादकं तत्त्वमार्याणामिति शेषः । सर्वभावेष्वेतत्स्वभावद्वयं वर्तते । यदाह—

सम्यग्मृषादर्शनलम्बभावं रूपद्वयं बिभ्रति सर्वभावाः ।
सम्यग्दृशां यो विषयः स तत्त्वं मृषादृशां संवृतिसत्यमुक्तम् ॥

अपि च—

द्वे सत्ये समुपाश्रित्य बुद्धानां धर्मदेशना ।
लोके संवृतिसत्यं च सत्यं च परमार्थतः ॥

सांवृतस्य सत्यत्वोक्तिस्तु लोकानुरोधेन । वस्तुतस्तु परमार्थ एवैकं सत्यम्, अतो न क्षतिः ।

परमार्थसतो रूपमाह—बुद्धेरगोचरस्तत्त्वम् । बुद्धेः सर्वज्ञानानामगोचरः सर्वप्रपञ्चनिर्मुक्तस्वभावः परमार्थसत्यं कथमिव प्रतिपाद्यम् । तथापि श्रोतॄणामनुग्रहाय संवृत्या निदर्शनेन किञ्चिदभिधीयते । यथा तिमिरप्रभावात्तैमिरिकः सर्वमाकाशदेशं केशोण्डुकमण्डितमितस्ततो मुखं विक्षिपन्नपि पश्यति, तं तथां कुर्वन्तमवलोक्यातैमिरिकस्तत्समीपमुपसृत्यापि न किञ्चित् पश्यति तस्मै यथाभूतमसौ वदति नात्र केशाः सन्तीति । न च तेन तथा प्रतिपादयताऽपि कस्यचित्प्रतिषेधः कृतो भवति, विधानं वा; तच्च केशानां तत्त्वं यत्तैमिरिकः पश्यति नातैमिरिकः ।

तदेवमविद्योपघाताद् बाला यदेतत्स्कन्धधात्वायतनादिस्वरूपमुपलभन्ते तदेषां सांवृतं रूपम्, तानेव स्कन्धान् येन स्वभावेन निरस्तसमस्ताविद्यावासना बुद्धा न पश्यन्ति तदेषां परमार्थसत्यम् । सा च शून्यता न भावाद् व्यतिरिक्ता, भावस्यैव तत्स्वभावत्वात् ।

यदा न भावो नाभावो मतेः संतिष्ठते पुरः ।
तदान्यगत्यभावेन निरालम्बा प्रशाम्यति ॥

[बोधिचर्यावतारे ६।३५]

अत्रार्थद्वयासत्त्वभावनायां दृढायां निर्विषयस्य विज्ञानस्यापि प्रशमो वर्णितः । सर्वशून्यतायां त्रासमाशङ्क्य समाहितं तत्रैव—

यद्दुःखजननं वस्तु त्रासस्तस्मात्प्रजायताम् ।
शून्यता दुःखशमनी ततः किं जायते भयम् ॥
यतस्ततो वाऽस्तु भयं यद्यहं नाम किञ्चन ।
अहमेव न किञ्चिच्चेद् भयं कस्य भविष्यति ॥ इति ।

तस्मात्कल्पनामात्रमेतद् यदहमर्थः । शून्यमेवाऽऽभातीति निश्चितम् ।

दुःखहेतुरहङ्कार आत्ममोहात्तु वर्द्धते ।
ततोऽपि न निवर्त्यश्चेद्वरं नैरात्म्यभावना ॥

[अभिसमयालङ्कारे, ६२ पृ०]

"ननु यदालम्ब्यते तन्नास्ति यथा द्विचन्द्रादि । सर्वधर्मशून्यताऽपि चेदालम्ब्यमाना तथैव नास्तीति सर्वधर्मास्तित्वमापद्यत इति चेददोष एषः । यस्मान्न देवदत्तप्रख्यस्याभावस्यापवादान्तस्य हन्तरि यज्ञदत्तप्रख्ये स्वभावे समारोपान्ते तच्छून्यतया हते प्रादुर्भावः" [तत्रैव ३६० पृ०] इति । तथा चार्यदेवो विज्ञानरूपस्य पुंसोऽपि शून्यत्वमाह—

दृश्यते सर्वगः कैश्चित् कैश्चित्कायमितः पुमान् ।
दृश्यतेऽणुमितः कैश्चित् प्राज्ञैर्नास्तीति गम्यते ॥ [माध्यमिकवृत्तौ]

तत्रैव—

यद्यशून्यं भवेत् किञ्चित् स्याच्छून्यमपि किञ्चन ।
न किञ्चिदस्त्यशून्यं च कुतः शून्यं भविष्यति ॥ [मा० वृ०]

इति सर्वशून्यत्वस्यापि सत्त्वं न स्वीचकार ।

प्रज्ञापारमितायामपि निर्वाणं मायोपमं वदामीत्युक्तम्—

सर्वं फेनप्रतीकाशमसारं बुद्बुदोपमम् ।
निरात्मकमनित्यं च मायामरीचिकासमम् ।। [मा० वृ०]

"तस्मादशून्येन विना शून्यं न भवति तेन विना च शून्यं नाम न किञ्चिदस्तीति सिद्धम्" इत्यार्यदेवः ।

अद्वैतवादस्वरूपम्

विज्ञानमेवैकं तत्त्वम् । साधितं च विज्ञानस्यैकत्वं नित्यत्वं स्वप्रकाशत्वं च पञ्चदश्यामारम्भ एव तत्त्वविवेकप्रकरणे सप्तभिः पद्यैः । ततस्त्रिभिः पद्यैरानन्दरूपत्वं प्रसाध्य तस्य सच्चिदानन्दात्मरूपस्य जीवब्रह्मभेदकल्पनायामपि—"अयमात्मा ब्रह्म", "प्रज्ञानं ब्रह्म", "अहं ब्रह्मास्मि" इत्यादिमहावाक्यैरैक्यमेवोपदिश्यत इत्युक्तम् । अद्वैतिमते विज्ञानस्य स्वप्रकाशत्वं च परप्रकाश्यत्वाभावेन, न तु स्वस्मिन् कर्मकर्तृभावाभ्युपगमेन । लोके कर्मत्वकर्तृत्वयारेकस्मिन् विरोधदर्शनात् । न हि लोके चैत्रः स्वं गच्छतीति व्यवह्रियते । ज्ञेयानां चोत्पादविनाशशालिनां बाह्यानां न विज्ञानाकारता, विज्ञानस्य नित्यत्वेन सर्वविधविकारशून्यत्वात् ; एकस्मिन् ग्राह्यग्राहकभावानुपपत्तेश्च । किन्तु सर्वे भावा विज्ञानात्मनो भिन्नत्वाभिन्नत्वाभ्यां सत्त्वासत्त्वाभ्यां चानिर्वाच्याः, अत एव मिथ्येत्यद्वैतवादे व्यवह्रियन्ते । उक्तं चाध्यासभाष्ये भामत्याम्—"मिथ्याशब्दोऽयमनिर्वचनीयतावचनः" इति । ते च तथाभूताः सर्व एव भावा बाह्या मायया ईशसृष्टा आन्तराश्च मनोमया अविद्यया जीवसृष्टाः । माया च त्रिगुणात्मिकाऽनिर्वाच्या ईशोपाधिः । अविद्या च तत्कार्यभूता तत्स्वभावैव जीवोपाधिः । तत्रेशो मायाध्यक्षः स्वतन्त्रः । तदुक्तं पञ्चदश्यां तत्त्वविवेकप्रकरणे—

"चिदानन्दमयब्रह्मप्रतिबिम्बसमन्विता ।
रजस्तमःसत्त्वगुणा प्रकृतिर्द्विविधा च सा ।।
सत्त्वशुद्ध्यविशुद्धिभ्यां मायाविद्ये च ते मते ।
मायाबिम्बो वशीकृत्य तां स्यात्सर्वज्ञ ईश्वरः ।।
अविद्यावशगस्त्वन्यः" इति ।

"ते ध्यानयोगानुगता अपश्यन् देवात्मशक्तिं स्वगुणैर्निगूढाम्" [श्वेता०] इति, "इन्द्रो मायाभिः पुरुरूप ईयते" इति च श्रुतिः ; "दैवी ह्येषा गुणमयी मम माया दुरत्यया",

"मायया ऽपहृतज्ञानाः", "संभवाम्यात्ममायया" इत्यादीनि च गीतावाक्यान्युदाहृताश्च श्रुतयश्चित्रदीपप्रकरणे पञ्चदश्यां टीकायामत्र द्रष्टव्यानि ।

गौडपादा अपि जगतो मायामयत्वमनिर्वाच्यत्वं च वदन्ति । तथा हि—

स्वप्नमाये यथादृष्टे गन्धर्वनगरं यथा ।
तथा विश्वमिदं दृष्टं वेदान्तेषु विचक्षणैः ॥ [२।३१]
विपर्यासाद्यथा जाग्रदचिन्त्यान् भूतवत्स्पृजेत् ।
तथा स्वप्ने विपर्यासाद्धर्मांस्तत्रैव पश्यति ॥ [४।४१]
न निर्गतास्ते विज्ञानाद् द्रव्यत्वाभावयोगतः ।
कार्यकारणताभावाद्यतोऽचिन्त्याः सदैव ते ॥ [४।५२]
उभे ह्यन्योन्यं दृश्येते किं तदस्तीति नोच्यते ।
लक्षणाशून्यमुभयं तन्मतेनैव गृह्यते ॥ [४।६७]

सैषा उपनिषत्सु तत्र तत्र तुच्छानृततमआदिशब्दैरपि व्यवह्रियते । तदुक्तं पञ्चदश्याम्—

तुच्छाऽनिर्वचनीया च वास्तवी चेत्यसौ त्रिधा ।
ज्ञेया माया त्रिभिर्बोधैः श्रौतयौक्तिकलौकिकैः ॥
स्पष्टं भाति जगच्चेदमशक्यं तन्निरूपणम् ।
मायामयं जगत्तस्मादीक्षस्वापक्षपाततः ॥ [चित्रदीपप्रकरणे]
इत्थं लौकिकदृष्ट्यैतत्सर्वैरप्यनुभूयते ।
युक्तिदृष्ट्या त्वनिर्वाच्यं नासदासीदिति श्रुतेः ॥
नासदासीद् विभातत्वान्नो सदासीच्च बाधनात् ।
विद्यादृष्ट्या श्रुतं तुच्छं तस्य नित्यनिवृत्तितः ॥

श्रुतौ च—"तम आसीत्तमसा गूढमग्रे", "अनृतेन प्रत्यूढाः" इत्यादौ मायायास्तमानृतादिशब्दैर्व्यवहारः ।

तत्र जीवसृष्टं मनोमयं द्वैतमेव बन्धः स्त्रीपुत्रमातृपित्रादिरूपः । ईशसृष्टं तु साधारणत्वान्न बन्धरूपम् ।

ज्ञानस्वरूप आत्मनि सत्यत्वज्ञानत्वानन्दत्वादयो धर्माः कल्पिता एव, बाध्यत्वाभावजडत्वाभावदुःखाभावरूपा वाऽधिष्ठानस्वरूपाः; एतन्मतेऽभावस्याधिकरणस्वरूपत्वात् । ननु

वास्तवाः, तैरेव द्वैतापत्तेः; ब्रह्मणोऽसङ्गत्वाच्च। ज्ञानेऽद्वैतं तु स्वगतसजातीयविजातीयभेदशून्यत्वरूपम्। "एकमेवाद्वितीयम्" इति श्रुतौ पदत्रयेण यथायथं भेदत्रयस्य ब्रह्मणि प्रतिषेधात्।

वृक्षस्य स्वगतो भेदः पत्रपुष्पफलादिभिः।
वृक्षान्तरात्सजातीयो विजातीयः शिलादितः॥

इत्युदाहृतं भेदत्रयं ब्रह्मणि प्रतिषिध्यते श्रुतिस्थैकाद्वितीयावधारणार्थकैवकारपदैः। मानसं तु परिणामरूपमैन्द्रियकं ज्ञानं सर्वं क्षणिकं मनसो जडत्वेन जडम्। चिदाभाससंबन्धात्तप्तायःपिण्डे दग्धृत्ववत् प्रकाशकम्। वृत्तिरूपे ज्ञान एव क्षणिकविज्ञानात्मबुद्धिर्विज्ञानवादिनाम्। वस्तुतस्तु तज्जडम्, अहं जानामीत्यनुभवरूपसाक्षिभास्यं च। सर्वप्राणभृदात्मभूतं ब्रह्मस्वरूपं विज्ञानं तु नित्यापरोक्षम्, "यत्साक्षादपरोक्षाद् ब्रह्म" इति श्रुतेः। अस्ति च मायायाः शक्तिद्वयम्—आवरणशक्तिः, विक्षेपशक्तिरिति च। तत्रावरणशक्तिर्द्विधा—असत्त्वापादकत्वाभानापादकत्वभेदेन, याभ्यां नास्त्यौपनिषद आत्मा, न भाति चेत्यनुभूयते। विक्षेपशक्त्या तु विविधं जगत् सृज्यते। सा च मायाऽज्ञानं भावरूपा तमोवन्न त्वभावरूपा, अभावस्य भावरूपसर्वजगदुपादानत्वानुपपत्तेः। आत्मनस्तु विवर्त्तभूतः संसारः, परिणामस्तु मायायाः। अतत्त्वतोऽन्यथाभावो विवर्त्तः। तत्त्वतोऽन्यथाभावः परिणामः। माया चात्माश्रयाऽऽत्मविषया च। तदुक्तं संक्षेपशारीरके—

आश्रयत्वविषयत्वभागिनी निर्विभागचितिरेव केवला।
पूर्वसिद्धतमसो हि पश्चिमो नाश्रयो भवति नापि गोचरः॥

तस्याश्च न स्वरूपभूतज्ञानेन विरोधः, 'अहमज्ञः' इत्याद्यनुभवेन तस्य तत्साधकत्वात्; किन्तु वृत्तिरूपज्ञानेनाधिष्ठानसाक्षात्काररूपेण। "ब्रह्मविद् ब्रह्मैव भवति", "तमेव विदित्वाऽतिमृत्युमेति नान्यः पन्था विद्यतेऽयनाय", "तत्र को मोहः कः शोक एकत्वमनुपश्यतः", "आत्मानं चेद् विजानीयादयमस्तीति पूरुषः। किमिच्छन् कस्य कामाय शरीरमनुसंज्वरेत्", "भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्वसंशयाः। क्षीयन्ते चास्य कर्माणि तस्मिन् दृष्टे परावरे॥" इत्यादिश्रुतिशतेभ्यः, युक्तेश्च। तथा हि—यथा शुक्त्यज्ञानकल्पितं रजतं शुक्तिसाक्षात्कारे जाते निवर्तते, तथैवात्माज्ञानकल्पितं जगत्तस्मिन् साक्षात्कृते निवर्तत इति युक्तम्। न चासङ्गस्य

निर्धर्मकस्य कथं साक्षात्कारगोचरता, तथाऽदृष्टत्वादिति वाच्यम्; जडवच्चिदाभासविषयत्वानङ्गीकारेऽपि वृत्तिविषयत्वाङ्गीकारात्।

ब्रह्मण्यज्ञाननाशाय वृत्तिव्याप्तिरपेक्षिता।
फलव्याप्यत्वमेवास्य शास्त्रकृद्भिर्निवारितम्॥ [पञ्चदशी]

अत्र फलपदेन चिदाभासः, आत्मनः साक्षात्काररूपत्वेन साक्षात्कारानपेक्षणाच्च।

स चात्मसाक्षात्कारः श्रवणमनननिदिध्यासनैरपि तत्तद्वर्णाश्रमोचितनित्यनैमित्तिककर्मानुष्ठानसभक्तिकसगुणब्रह्मशीलनसंस्कृतचेतसामेव जायत इति सर्वेषां कर्मादिपथानामात्मसाक्षात्कार एवारादुपकारकत्वम्। तथा च श्रुतिः—

सर्वे वेदा यत्पदमामनन्ति तपांसि सर्वाणि च यद्वदन्ति।
यदिच्छन्तो ब्रह्मचर्यं चरन्ति तत्ते पदं संग्रहेण प्रवक्ष्ये॥ ओमित्येतत्।

अन्यथाऽऽलस्येनाश्रद्धया वा कर्मत्यागे—

अकुर्वन् विहितं कर्म निन्दितं च समाचरन्।
प्रसजँश्चेन्द्रियार्थेषु नरः पतनमृच्छति॥

इत्यादिस्मृतिबोधितः प्रत्यवायः प्राप्नोत्येव।

त्रिविधं च सत्त्वं व्यावहारिकं प्रातिभासिकं पारमार्थिकं चाद्वैतवादे स्वीक्रियते। तथा वस्त्वपि त्रिविधम्। यद्वैकैव सत्ताऽधिष्ठानानुगता सर्वत्र भासत इति न सत्तात्रैविध्यम्। अद्वैते बुद्ध्यवताराय च बह्वयः प्रक्रियास्तत्र तत्राद्वैतिभिः समाश्रिताः। तत्र न प्रक्रियायामादरः,

अभीष्टसिद्धावपि खण्डनानामखण्डि राज्ञामिव नैवमाज्ञा।
तत् किं न तान्येव यथाभिलाषं सैद्धान्तिकेऽप्यध्वनि योजयध्वम्॥

इति खण्डनकृदुक्तेः।

यया यया भवेत्पुंसां व्युत्पत्तिः प्रत्यगात्मनि।
सा सेह प्रक्रिया साध्वी विपरीता ततोऽन्यथा॥

इति वार्त्तिककृदुक्तेश्च। अतो न परस्परं प्रक्रियाविरोधोऽद्वैतवादिनाम्।

यद्यपि श्रुतावपि तत्र तत्र सृष्ट्याद्युपन्यासमुखेन "द्वा सुपर्णा" इत्यादिरीत्या च द्वैतमुपन्यस्यते, तथाप्युपक्रमोपसंहारादितात्पर्यनिर्णायकप्रमाणपर्यालोचनेनाद्वैत एव श्रुतीनां

तात्पर्यम्, अद्वैतस्य प्रमाणान्तराप्राप्तत्वेन विधेयत्वात्; द्वैतस्य तु पांशुलपादेन हालिकेनापि विदितस्याविधेयत्वात् । तदुक्तम्—

अध्यारोपापवादाभ्यां निष्प्रपञ्चं प्रपञ्च्यते ॥ इति,
उपायः सोऽवताराय नास्ति भेदः कथञ्चन ॥ इति च ।

अद्वैतवादिनां मोक्षस्तु मोहनिवृत्तिविज्ञातत्वाभ्यामुपलक्षित आत्मैव । तथा च वार्त्तिकम्—"निवृत्तिरात्मा मोहस्य ज्ञातत्वेनोपलक्षितः" इति, मोहनिवृत्तेरधिष्ठानमात्रस्वरूपत्वात् । "अधिष्ठानावशेषो हि नाशः कल्पितवस्तुनः" इति तदीयसिद्धान्तात् । तथा च प्रकाशमानानन्दात्मरूपो मोक्षोऽद्वैतवादे । प्रसाधितं चैतदद्वैतसिद्धिमङ्गलपद्यव्याख्यावसरे श्रीगौडब्रह्मानन्दस्वामिभिः । साक्षात्कारे जातेऽपि प्रारब्धकर्मशेषेण विदेहकैवल्याभावे जीवन्मुक्तिरपि तैः स्वीक्रियत एव, "तस्य तावदेव चिरं यावन्न विमोक्ष्येऽथ संपत्स्ये" इत्यादिश्रुतिभ्यो जनकाद्युपाख्यानेभ्यश्च ।

अद्वैतवादिमतं च बोधिचर्यावतारपञ्जिकायां नवमपरिच्छेदे षष्टितमकारिकाव्याख्यानशेष एवमुपन्यस्तम्—

"उपनिषद्वादिनस्तु समस्तप्राणिसंतानान्तर्गतमेकमेव व्यापि नित्यं च ज्ञानमिच्छन्ति । तद्विवर्त्तरूपतया सकलमिदं क्षितिजलपवनहुताशनादिकं जगदवभासते । तत्स्वभाव एव चात्मा । न बाह्यं किमप्यवयविपरमाणवादिकं ग्राह्यं प्रमाणप्रसिद्धमस्ति" इति । आह च—

नित्यज्ञानविवर्त्तोऽयं क्षितितेजोजलादिकः ।
आत्मा तदात्मकश्चेति संगिरन्तेऽपरे पुनः ॥
ग्राह्यलक्षसंयुक्तं न किञ्चिदिह विद्यते ।
विज्ञानपरिणामोऽयं तस्मात्सर्वं परीक्ष्यते ॥ इति ।

अत्र 'अपरे' इत्युत्तरान्वयि, विज्ञानवादिबौद्धाभिप्रायेण; विज्ञानपरिणामस्य ग्राह्यस्य तेनैवाभ्युपगमात् । एतत्पञ्जिकादर्शनेनाद्वैतिनामौपनिषदत्वं वादिनोऽपि स्वीकुर्वत इत्यायाति ।

आक्षेपपरिहारः

एवं वादत्रयस्वरूपव्याक्रिययैव यद्यपि तेषां परस्परं भेदव्याक्रिया जातैव, तथापि दुर्बोधत्वेन सुविशदं प्रदर्श्यते । तत्र पूर्वं यदुक्तं श्रीविज्ञानभिक्षुणा सांख्यप्रवचनभाष्ये मायावादिनो

विज्ञानवाद्येकदेशित्वं प्रच्छन्नबौद्धत्वं च, तत्र विज्ञानवाद्येकदेशित्वप्रवादं विज्ञानवादाद्वैतवादयोः स्वरूपभेदप्रदर्शनावसरे पराकरिष्ये। अधुना तु प्रच्छन्नबौद्धत्वप्रवादः—"मायावादमसच्छास्त्रम्" इत्यादिवचनावलम्बेन कुतो निराक्रियते। तत्रानन्दाश्रममुद्रितपद्मपुराणस्थटिप्पण्याम्—"मायावादमसच्छास्त्रं प्रच्छन्नं बौद्धमेव च" इत्यादिवचनानां क०ज०झ०फ०पुस्तकस्थत्वकथनादसर्वगतत्वेन प्रक्षिप्तत्वम्। किञ्च—"मायावादं प्रच्छन्नं बौद्धं मयैव कथितम्" इत्युक्तौ सच्छास्त्रस्यापि मायावादस्यौपनिषदस्य परिग्रहः स्यादिति तत्परिहारायासच्छास्त्रमिति तद्विशेषणमुक्तम्। तथा चात्रासच्छास्त्रमायावादोद्देशेन प्रच्छन्नबौद्धत्वं विधीयते, न तु मायावादोद्देशेनासच्छास्त्रत्वं प्रच्छन्नबौद्धत्वम्, वाक्यभेदात्। प्रच्छन्नबौद्धत्वविधानेनैनासच्छास्त्रत्वसिद्धौ तद्विधानासंभवाच्च, अप्राप्ते हि शास्त्रमर्थवदिति न्यायात्। दृश्यते चान्योऽपि कश्चन मायावादः। यथा ज्ञानसंहितायां २१ तमेऽध्याये—

असृजच्च महातेजाः पुरुषं स्वात्मसम्भवम्।
मायिमायामयं तेषां धर्मविघ्नार्थमच्युतः॥

विष्णुरुवाच—

मायिन् मायामयं शास्त्रं षोडशाख्यसहस्रकम्।
श्रौतस्मार्तविरुद्धं च वर्णाश्रमविवर्जितम्॥
एतच्छास्त्रं त्वया ग्राह्यं विस्तारं तद्गमिष्यति।
पाषण्डः स्थापितस्तेन विष्णुना विश्वयोनिना॥ इति।

तस्मादद्वैतवादविद्वेषमूलक एवैष श्रीभिक्षोर्विभ्रमः। अन्यथा नित्यविज्ञानविवर्त्तो बाह्यार्थोऽद्वैतवादे, क्षणिकविज्ञानपरिणामो बाह्यार्थो विज्ञानवाद इति महत्यन्तरे पूर्वोदाहृतशान्तरक्षितवचःप्रतिपादिते जाग्रत्यप्ययावधिलोकैर्वन्दितं वादिभिश्चोदयनादिभिः समादृतमनिर्वचनीयख्यातिपक्षं ब्रुवाणं लोकशङ्करं शङ्करं विज्ञानवाद्येकदेशित्वेन प्रच्छन्नबौद्धत्वेन वेदान्तिब्रुवत्वेन च कथमधिक्षिपेत। तथा ह्युदयन आत्मतत्त्वविवेके शून्यवादिना सह विवादे—"स्वतः सिद्धश्चेत्, आयातोऽसि मार्गेण" इत्युपक्रम्यानिर्वचनीयख्यातिपक्षं सम्यक् प्रदर्श्य—"तदास्तां तावत्, किमार्द्रकवणिजो वहित्रचिन्तया" इति ब्रुवन् स्वं च परं चार्द्रकवणिक्समम् अनिर्वचनीयख्यातिवादिनं च श्रेष्ठिसमं ब्रूते, अग्रे च—"प्रविश वानिर्वचनीयख्यातिकुक्षिम्, तिष्ठ वा मतिकर्दममपहाय न्यायनयानुसारेण नीलादीनां पारमार्थिकत्वे। तस्मात्—

न ग्राह्यभेदमवधूय धियोऽस्ति वृत्तिस्तद्बाधने बलिनि वेदनये जयश्रीः ।
नो चेदनिन्द्यमिदमीदृशमेव विश्वं तथ्यं तथागतमतस्य तु कोऽवकाशः ॥"

इति प्राह । तत्र 'बलिनि वेदनये' इत्युक्त्या बलवत्त्वं वैदिकत्वं चानिर्वचनीयख्यातिपक्षस्याभिधत्ते । द्वादशदर्शनीकान्तारकेसरी वाचस्पतिरपि भामतीमङ्गलपद्येऽपूतस्य स्ववचस आचार्यकृतिनिवेशनेन जाह्नवीजलेनेव पूतत्वमाशंसतीत्यलमारोपिताचार्यनिन्दानिरसनप्रयासेन ।

विज्ञानवादाद्वैतवादयोस्तुलना

साम्प्रतं विज्ञानवादाद्वैतवादयोर्भेदाः सप्रमाणं[1] प्रदर्श्यन्ते । तथा हि—

१. विज्ञानवादी विज्ञानस्य क्षणिकत्वं ब्रूते, यत्सत् तत्क्षणिकमिति स्थितेः । अद्वैती तु नित्यत्वम् । साधितं चैतत्पञ्चदश्यामारम्भ एव । उक्तं च तत्र तत्रोपनिषत्सु गीताभाष्यादिषु च ।

२. प्रथमो विज्ञानस्यानेकत्वम्, क्षणिकत्वेन । अद्वयत्वं तु समानकालिकसजातीयानेकमूलविज्ञानसत्त्वाभावाभिप्रायेण । आलयविज्ञानानि प्रवृत्तिविज्ञानानि च भिद्यन्ते, तेषामुपादानभूतं मूलविज्ञानं त्वेकमेवेति सिद्धान्तात् । समाधिदशायां मोक्षदशायां च ग्राह्यग्राहकाकारद्वयशून्यत्वेन च । तदुक्तम्—

द्वयग्राहविसंयुक्तं लोकोत्तरमनुत्तमम् ।
निर्विकल्पं मलापेतं ज्ञानं स लभते पुनः ॥ इति ।

[महायानसूत्रालङ्कारे, २८]

द्वितीयः कूटस्थनित्यत्वेनैकत्वम्, "एकमेवाद्वितीयम्" इत्यादिश्रुतेर्बहुशो भाष्यादिषु श्रुतत्वात् ।

३. प्रथमो विज्ञानस्य परिणामम् । स च परिणामो न सांख्यानामिव सान्वयः, किन्तु निरन्वयः । तथा च विज्ञप्तिमात्रतासिद्धिप्रथमकरिकाव्याख्याने परिणामलक्षणम्—"कारणक्षणनिरोधसमकालः कारणक्षणविलक्षणः कार्यस्यात्मलाभः परिणामः", "एवं च सर्वं विज्ञेयं

---

१. अत्रानुक्तानि च मानानि तत्तद्वादस्वरूपनिर्देशप्रकरणतः प्रागुक्ताद् द्रष्टव्यानि ।

परिकल्पितस्वभावत्वाद् वस्तुतो न विद्यते। विज्ञानं पुनः प्रतीत्यसमुत्पन्नत्वाद् द्रव्यतोऽस्तीत्यभ्युपेयम्। प्रतीत्यसमुत्पन्नत्वं पुनर्विज्ञानस्य परिणामशब्देन ज्ञापितम्'' इति।

द्वितीयो विवर्त्तम्। अतात्त्विकोऽन्यथाभावरूपो विवर्त्तस्तु भामतीमङ्गलपद्ये शारीरकभाष्ये सुबहुशः श्रुत इति न तत्र प्रयस्यते।

४. प्रथमो विज्ञानस्यार्थाकारः परिणाम इति ब्रूते, द्वितीयस्त्वन्तःकरणस्यार्थाकारः परिणामो वृत्तिरूप इति।

५. प्रथमो बाह्यार्थसत्तां न स्वीकुरुते, द्वितीयस्तु वृत्तिहेतुतया तत्सत्तामभ्युपैति। तदुक्तं द्वैतविवेकप्रकरणे पञ्चदश्याम्—

विज्ञानवादो बाह्यार्थवैयर्थ्यात् स्यादिहेति चेत्।
न ह्याकारमाधातुं बाह्यस्यापेक्षितत्त्वतः॥
वैयर्थ्यमस्तु वा बाह्यं न वारयितुमीश्महे।
प्रयोजनमपेक्षन्ते न मानानीति हि स्थितिः॥

६. प्रथमो विज्ञानपरिणामस्य ग्राह्यार्थस्य मायोपमत्वम्। तदुक्तं महायानसूत्रालंकारे—''मायोपमान् पश्यति लोकधातून्'', ''मायोपमान् वीक्ष्य स सर्वधर्मान्'' इति।

द्वितीयो मायापरिणामत्वेन मायामयत्वम्, ''तद्धेदं तर्ह्यव्याकृतमासीत्तन्नामरूपाभ्यामेव व्याक्रियत'' इत्यादिश्रुतीनां सुबहुशः समुल्लेखात्।

७. प्रथम एकस्मिन् ग्राह्यग्राहकभावाभ्युपगमेन स्वप्रकाशत्वम्। द्वितीयः परप्रकाश्यत्वाभावेन प्रकाशरूपत्वेन च स्वप्रकाशत्वम्।

८. विज्ञानवादे विज्ञानस्य ग्राह्यग्राहकाकारपरिणामनिवृत्तिर्मोक्षः। अद्वैतवादे नित्यनिवृत्तस्याविद्याप्राप्तस्य च प्रपञ्चस्य निवृत्तिज्ञानमात्रम्।

९. आद्यो बाह्यार्थस्य सांवृतं सत्त्वं मन्यते। संवृतिश्च भ्रान्तिधीरेवानिर्वाच्या, वक्ष्यमाणलङ्कावतारसूत्रोक्तरीत्या। द्वितीयस्तु व्यावहारिकं प्रातिभासिकं च सत्त्वम्, तत्प्रयोजकं चानिर्वाच्यमविद्याद्वितयम्, मूलतूलभेदेन।

१०. आद्यमते विज्ञानस्य वासनासहकारेण स्वाकारजगत्स्रष्टृत्वम्।

द्वितीयमते मायासहकारेणाविद्यासहकारेण च। ईशजीवयोः स्वातिरिक्तजगद्विवर्त्तोपादानत्वम्। तत्रेशशक्तिर्माया व्यावहारिकजगदुपादानम्, अविद्या च जीवात्मशक्तिः। सा तु मनोमयप्रातिभासिकजगदुपादानम्।

११. आद्यमते सर्वं विज्ञानं स्वलक्षणमात्रविषयकं निर्विकल्पकम्, अपोहादिविषयकं सविकल्पकं वा भ्रान्तम्; असदर्थावभासमानात्।

द्वितीयमत औपनिषदं तत्त्वमस्यादिवाक्योत्थमखण्डब्रह्मविषयकं निर्विकल्पकं स्वार्थाबाधेन सर्वथा प्रमाणम्।

१२. प्रथमो भ्रान्तिमेवाविद्यां भावत्वेनाभावत्वेन चानिर्वाच्यामनादिपरम्परासिद्धत्वेन नित्यां च मन्यते। तदुक्तं लङ्कावतारे—"नित्यशब्दः पुनर्भगवन् क्व अभिहितः। भगवानाह—भ्रान्तौ महामते। कथं पुनर्महामते भावाभावविवर्जिता भ्रान्तिः..........एतस्मात् कारणात् शाश्वता भ्रान्तिः" [द्वितीये परिवर्ते] इति।

द्वितीयस्तु—"भ्रमात्संस्कारतोऽप्यन्या मण्डूकमृदुदाहृतेः। अविद्याऽनादिभावात्मा मता वाचस्पतेरिह॥" [कल्पतरौ] इति वदन् भ्रमसंस्कारोभयभिन्नाऽनिर्वाच्याऽऽत्मशक्तिरनादिभावरूपाऽविद्येति मन्यते।

१३. योगाचारमतम्—"आत्मैवेदं सर्वम्" इत्यादिश्रुत्योपक्रान्तम्।

अद्वैतमतं तु—"अगन्धमरसम्" इत्यादिनोपसंहृतं सिद्धान्तभूतम्। तथा चात्मतत्त्वविवेकान्त उदयनाचार्यैः—"अथार्थाकारः, यमाश्रित्य त्रैदण्डिकमतोपसंहारः, योगाचारसमुत्थानं च; तत्प्रतिपादनार्थम्—'आत्मैवेदं सर्वम्' इत्यादि, तद्धानार्थम्—'अगन्धमरसम्' इत्यादि" इति।

शून्यवादाद्वैतवादयोस्तुलना

अथ शून्यवादाद्वैतवादयोर्भेदाः सोपपत्तिकं निरूप्यन्ते। तेनैव शून्यवादमायावादयोर्वैलक्षण्याभाव इति मध्वमाध्ववचसोः पराक्रिया भविष्यतीति न पृथक् तत्र प्रयत्यते।

१. शून्यवादे परमार्थतत्त्वं शून्यत्वम्। तच्च सत्त्वादिनाऽनिर्वाच्यं सर्वेषां भावानां परमार्थरूपम्। द्विविधं हि वस्तूनां तत्त्वम्—सत्त्वमसत्त्वं च। तदुक्तमध्यासभामत्याम्—"बाह्या अप्याहुः—स्वरूपपररूपाभ्यां नित्यं सदसदात्मके। वस्तुनि ज्ञायते किञ्चित् कैश्चिद्रूपं कदा-

चन ॥" इति। तत्र सत्त्वं तेषां सांवृतं रूपम्, तच्चानिर्वाच्यं बाध्यं च; भावाभावविलक्षण-भ्रान्तिरूपसंवृतिप्रयुक्तत्वेन तत्स्वभावत्वात्। शून्यत्वरूपमसत्त्वं तु तेषां पारमार्थिकम्; यथा घटस्य स्वरूपेण भावरूपता, पटाद्यभावरूपेणाभावरूपता। यद्यपि शून्यत्वमनिर्वाच्यत्वेन नासत्त्व-रूपं तथापि सत्त्वाभावरूपतयाऽसत्त्वं व्यवह्रियते। यथाऽनिर्वाच्यमायाया अभावविलक्षणतया भावरूपत्वं क्वचिदौपनिषदैर्व्यवह्रियते। तदुक्तम्—

न सन्नासन्न सदसन्न चाप्यनुभयात्मकम्।
चतुष्कोटिविनिर्मुक्तं तत्त्वं माध्यमिका विदुः॥ इति।

किञ्च, माध्यमिककारिकासु पञ्चविंशे प्रकरणे—

अप्रहीणमसंप्राप्तमनुच्छिन्नमशाश्वतम्।
अनिरुद्धमनुत्पन्नमेवं निर्वाणमुच्यते॥

इत्युपक्रम्य कारिकाष्टादशकेन कुलकेन भावाभावविलक्षणत्वं शून्यत्वरूपस्य निर्वाणस्य वर्णितम्। न च तत्रैव षड्विंशे प्रकरणे—"यः प्रतीत्यसमुत्पादः शून्यतां तां प्रचक्ष्महे" इति प्रतीत्यसमुत्पादरूपं शून्यत्वमुक्तम्, तेन विरोध इति वाच्यम्; भावितस्य प्रतीत्यसमुत्पादस्य प्रागु-क्तरूपशून्यत्वज्ञापकत्वेन शून्यत्वरूपत्वोक्तेः। अत एवाग्रे—"यः प्रतीत्यसमुत्पादं पश्यतीदं स पश्यति" इति तत्रैवोक्तम्।

तच्च शून्यत्वरूपं भावानामसत्त्वमनिर्वाच्यत्वेऽपि न बाध्यम्, किन्तु परमार्थभूतम्; नैरात्म्यभावनापर्यन्तायाः सर्वशून्यत्वभावनाया गोचरीभूतस्य शून्यत्वस्य बाधकाभावेनाबाधात्। न च शून्यत्वं पारमार्थिकमपि विज्ञानरूपम्, "ओं शून्यताज्ञानवज्रस्वभावात्मकोऽहमित्यधि-तिष्ठेत्" इति साधनमालावचनात्, "केवलाद्वयविज्ञप्तिलक्षणामनन्तां पश्येत्" इति रत्ना-करशान्तिपादोक्तेश्च; इति न शून्यवादाद्वैतवादयोर्भेद इति वाच्यम्; शून्यत्वस्य परमार्थिक-त्वेऽपि तदुद्दृष्टेर्विधेयत्वेनापारमार्थिकत्वात्। अत एव 'पश्येत्', 'अधितिष्ठेत्' इति लिङ्-प्रयोगः। तदुक्तम्—

नेष्टं तदपि धीराणां विज्ञानं पारमार्थिकम्।
एकानेकस्वभावेन विरोधाद् वियदब्जवत्॥ इति।

एतेन गौडपादीयकारिकाभिनववृत्तिकृदुक्तं शून्यत्वस्य ज्ञानरूपत्वं प्रत्युक्तम्। तत्र प्रमाणानि च व्याख्यातानि। शून्यत्वदृष्टेः पारमार्थिकत्वं तु विषयपारमार्थिकत्वेन। यदि शून्यत्वं ज्ञानरूपमेव स्यात्तदा विज्ञानवादशून्यवादयोर्भेदो दुरुपपादः स्यात्।

अद्वैतवादे परमार्थतत्त्वं सच्चिदानन्दरूपं ब्रह्म नित्यविज्ञानस्वरूपम्, निरधिष्ठानिकाया ग्राह्यकल्पनायाः शून्यत्वकल्पनाया वाऽसम्भवात्। एषां मते सर्वे विज्ञानातिरिक्ता भावा अनिर्वाच्यमायाकार्यत्वेनानिर्वाच्या। विज्ञानं तु सद्रूपतया निर्वाच्यम्। अत एवाध्यासभामत्याम्—"प्रत्यक्पदमनिर्वाच्यदेहेन्द्रियादिप्रतिकूलत्वेन सत्त्वेन निर्वाच्यतयाऽऽत्मनि प्रयुज्यते" इत्युक्तम्। एतन्मते भावानां सत्त्वमनिर्वाच्यं बाध्यं च। तदुक्तं खण्डने—"एवं सति सौगतब्रह्मवादिनोरयं विशेषो यदादिमः सर्वमेवानिर्वचनीयं वर्णयति। तदुक्तं भगवता लङ्कावतारे—"बुद्धया विविच्यमानानां स्वभावो नावधार्यते। अतो निरभिलाप्यास्ते निस्स्वभावाश्च देशिताः॥" इति। विज्ञानव्यतिरिक्तं पुनरिदं विश्वं सदसद्भ्यां विलक्षणं ब्रह्मवादिनः संगिरन्ते" इति।

२. शून्यवादे ग्राह्यग्राहकयोर्द्वयोरपि सांवृतं सत्त्वम्।

अद्वैतवादे तु ग्राहकस्य पारमार्थिकं सत्त्वं ग्राह्यस्य तु व्यावहारिकं प्रातिभासिकं च।

३. शून्यवादिमते शून्यत्वस्य सत्त्वादिनाऽनिर्वाच्यत्वेन निरधिष्ठानैव सर्वा कल्पना। यद्यपि सा न दृष्टचरी, तथापि युक्तिबलात् सर्वशून्यत्वसिद्धौ स्वीकर्तव्या भवतीति।

अद्वैतिमते सत्त्वेन निर्वाच्यस्य विज्ञानस्य कल्पनाधिष्ठानत्वम्, कल्पनायाः सदधिष्ठानिकाया एव दृष्टत्वात्।

४. शून्यवादिमते प्रागुक्तानिर्वाच्यसर्वशून्यत्वरूप एव मोक्षः। अद्वैतिमते तु मोदनिवृत्त्युपलक्षितः प्रकाशमानानन्दरूपविज्ञानात्मरूपः।

५. सर्वशून्यत्ववादे नैरात्म्यभावना मोक्षोपायः। अद्वैतवादिमते त्वैकात्म्यभावनेति भेदः।

६. सौगतयोरपि प्रागुक्तयोर्निरीश्वरवादः। अद्वैतवादे तु व्यावहारिकमीश्वरसत्त्वम्।

७. शून्यवादोऽसत्कारणतावादत्वेन श्रुतौ श्रुतः—"तद्धैक आहुरसदेवेदमग्र आसीदिति। कथं नु खलु सोम्यासतः सज्जायेत" इति। तथा चात्मतत्त्वविवेकान्त उदयनाचार्यः—

वादत्रयविमर्शः

"अथार्थाभावः, यमाश्रित्य वेदान्तद्वारमात्रोपसंहारः शून्यत्वनैरात्म्यसमुत्थानं च; तत्प्रतिपादनार्थम्—'असदेवेदमग्र आसीत्' इत्यादि। तद्धानाय—'अन्धं तमः प्रविशन्ति ये के चात्महनो जनाः' इत्यादि" इति।

अद्वैतवादस्तु सत्कारणतावादत्वेन—"सदेव सौम्येदमग्र आसीदेकमेवाद्वितीयम्" इत्यादिश्रुतिषु श्रुतः।

सौगतब्रह्मवादयोः पार्थक्यम्

तदित्थं सौगतब्रह्मवादिनोर्भेदे सुमहति सिद्धे यत्तयोरैक्यप्रसाधनाय कारिकाचयमुपन्यस्यन्ति—"अस्ति नास्त्यस्ति नास्तीति नास्ति नास्तीति वा पुनः। चलस्थिरोभयाभावैरावृणोत्येव बालिशः॥ कोटयश्चतस्र एतास्तु ग्रहैर्यासां सदाऽऽवृतः। भगवानाभिरस्पृष्टो येन दृष्टः स एव सः॥ [माण्डू० अलात० ८२–८३], न सन्नासन्न सदसन्न चाप्यनुभयात्मकम्। चतुष्कोटिविनिर्मुक्तं तत्त्वं माध्यमिका विदुः॥ [माध्य० का०] चतुष्कोटिविनिर्मुक्तमद्वैतिनां विज्ञानम्, तादृशमेव माध्यमिकानां शून्यत्वमिति न कोऽपि भेदः" इति; तदपि तात्पर्यद्वयानवबोधात्। तथा हि—अस्ति नास्तीत्यादि प्रागुक्तकारिकाद्वयात्प्राक्—

अजमनिद्रमस्वप्नं प्रभातं भवति स्वयम्।
सकृद् विभातो ह्येवैष धर्मो धातुस्वभावतः॥

सुखमाव्रियते नित्यं दुःखं विव्रियते सदा।
यस्य कस्य च धर्मस्य ग्रहेण भगवानसौ॥

इति कारिमाद्वयं वर्तते। तथा च नित्यस्वप्रकाशरूप आत्मा प्रकृतः च स चलस्थिरोभयाभावैः; अस्तीति, नास्तीति, अस्ति नास्तीति, नास्ति नास्तीति वा कोटिचतुष्टयैरावृतत्वात् सुखरूपेण न गृह्यते, किन्तु दुःखरूपेण गृह्यत इति कारिकाचतुष्टयस्य समानार्थः। सर्वाः कल्पना नित्यस्वप्रकाशसुखरूपस्यात्मन आवरणभूता इति तात्पर्यम्। न त्वात्मनोऽनिर्वाच्यत्वम्, सद्रूपत्वाभ्युपगमात्। इदं च तद्भाष्यदर्शनेन सुग्रहमिति तत एव ज्ञेयम्। "न सन्नासन्" इत्यादिमाध्यमिककारिकायास्तु चतुष्कोटिविनिर्मुक्तस्य शून्यत्वस्यानिर्वाच्यत्वे तात्पर्यमिति भेदः। शून्यत्वस्य यथा न ज्ञानरूपत्वं तथा प्रागेवोपपादितम्।

शून्यवादखण्डनम्

गौडपादकारिकासु च शून्यवादिमतं प्रत्याख्यातमपि—

सतो हि मायया जन्म युज्यते न तु तत्त्वतः।
तत्त्वतो जायते यस्य जातं तस्य हि जायते ॥
असतो मायया जन्म तत्त्वतो नैव युज्यते।
वन्ध्यापुत्रो न तत्त्वेन मायया वाऽपि जायते ॥
[अद्वैतप्रकरण० २७–२८]

व्याख्यातं च भाष्यकृद्भिः—"असद्वादिनामसतो भावस्य मायया तत्त्वतो वा न कथञ्चन जन्म युज्यते, अदृष्टत्वात्। न हि वन्ध्यापुत्रो मायया तत्त्वतो वा जायते, तस्मादत्रासद्वादो दूरत एवानुपपन्न इत्यर्थः" इति। शून्यवादे कार्यकारणभावो नोपपद्यत इति विवर्त्तवाद एव सदधिष्ठानककल्पनारूप आश्रयणीय इति तत्तात्पर्यम्।

तत् सिद्धं शून्यवादविज्ञानवादाभ्यां विलक्षण एवाद्वैतवाद औपनिषद इति कृतं पल्लवितेन।

दुर्दर्शमतिगम्भीरमजं साम्यं विशारदम्।
विचार्यपदमद्वैतं नमस्कुर्मो यथाबलम् ॥

स्थविरधर्मपर्यायः

श्रीशान्तिभिक्षुशास्त्री, शान्तिनिकेतनम् ।

तथागतस्य देशितं तस्य शिष्यगणस्यानुदेशितं च हीनयानमहायानभेदेन भिन्ना निकायाः स्वस्वत्रिपिटके समाम्नासिषुः । तत्र चरित्रपर्यालोचनया विज्ञायते यद् बौद्धधर्मस्य प्रत्नतमं रूपं स्थविराणां निकाये विद्यते । वैराग्यप्रवणो हि परमादिमो बौद्धधर्मो गच्छता कालेनानुरागप्रवणो जातः । संसारवैमुख्यं सत्त्वानुरागे परिणतम् । सहजानि सरलानि धर्मवचनानि लालित्ये निगूहितानि विद्यमानान्यपि दृष्टिपथाद् विप्रकृष्टानि संजातानि । इमं रुचिपरिवर्तनं मनसि कृत्यैवोक्तम्—"भविष्यन्ति भिक्षवोऽनागतेऽध्वनि ये ते सूत्रान्तास्तथागतभाषिता (तान्) न शुश्रूषिष्यन्ति । ये पुनस्ते सूत्रान्ताः कविकृताः काव्यमयाश्चित्राक्षराश्चित्रव्यञ्जना बाह्याः श्रावकभाषितास्तेषु भाष्यमाणेषु शुश्रूषिष्यन्ति । एवं सूत्राणां तथागतभाषितानामन्तर्धानं भविष्यति" [संयुत्तनिकाय, २।२६७][1] इति । स्थविराणां कृते वयं परमं कृतवेदिनो यत्ते लालित्यविमुखाः सन्तः प्रत्नतरं बौद्धवाङ्मयं विनैव सुबहुप्रक्षेपं साम्प्रतमपि परिपालयन्ति ।

पूर्वं स्थविरैरेव नागसेनप्रमुखैः प्रबलैर्यत्नैः सिद्धान्तानां पद्धतिकरणं समारब्धम् । तत्र स्थविराणां दर्शने धर्मे च यानि प्रमुखानि तत्त्वानि, तेषां हृदयोपस्थापनायात्र यत्नः क्रियते । प्रत्नतरे बौद्धधर्मदर्शनतत्त्वे विज्ञाते क्रमेण विपरिणतं रूपं विज्ञातुं सुकरं भविष्यति ।

विषयप्रतिपादनमिह सर्वत्रागमस्य वा प्राचार्याणां वचनानां वानुवादमुखेन विधीयते । न क्वचिदप्यत्र खण्डनमण्डलमारोच्यते । न हि स्वमोकः प्रहायानिकेतचारिणां ग्रामेऽ-

---

१. इह येषां ग्रन्थानामुद्धरणानि ते पालिटेक्स्टसोसायटीमुद्रिता विज्ञेयाः । परम् अभिधम्मत्थसंगह इति ग्रन्थः कोसम्बी-संस्कृतो महाबोधिसोसायटी (सारनाथ) मुद्रितो विज्ञातव्यः । अस्य निर्देशे दण्डतः पूर्वं परिच्छेदाङ्कः परतश्चानुच्छेदाङ्को विज्ञेयः । धम्मपदस्य गाथाक्रमाङ्क एव निर्दिष्टः ।
क्लिष्टास्मिन्निबन्धे बहुतरोंऽशः पालिच्छायारूपः । छायाकरणे वाक्यसन्धिर्बहुत्र नादृतः । गाथानां छायासु छन्दोलक्षणानुसरणं यदनायासेन जातं तर्हि कृतम्, अन्यथा माध्यस्थ्यमवलम्बितम् ।

संस्तवमकुर्वाणानां कामैर्विरक्तानामनागताध्वचिन्तया विप्रमुक्तानां मुनीनां तत्त्वचर्चायामस्ति क्वापि विगृह्य कथाया अवसरः। तत्रेह प्रतिपिपादयिषितस्य विषयस्यायं मातृकोद्देशः— १. सर्वधर्मनिर्देशः—मूलतत्त्वानि निर्वाणं च, २. सर्वधर्मलक्षणम्—पुद्गलनैरात्म्यम्, ३. सर्वसंस्कृतधर्मलक्षणम्—अनित्यता-दुःखता-अनात्मता, ४. निर्वाणलक्षणम्, ५. कालः आकाशं च, ६. चित्तसन्ततिः, ७. नामरूपप्रतिसन्धानम्, ८. गतिभेदः, ९. संसारस्वरूपम्, १०. निःसरणम्, ११. शरणं चेति। एकादशभिर्मातृकाभिर्विषयं निरूप्य पश्चात् सिंहावलोकितन्यायेन विषयसमीक्षणमप्यारोचयिष्यामः।

१. सर्वधर्मनिर्देशः—मूलतत्त्वानि निर्वाणं च

सर्वाणीमानि भूतानि न किमप्येकं तत्त्वं प्रतीत्य जायन्ते प्रत्युत बहूनि तत्त्वानि प्रतीत्य जायन्ते। तेषामेतेषां बहूनां तत्त्वानां पञ्च राशयः पञ्च स्कन्धा नाम। तद्यथा, रूपस्कन्धः— पृथिव्यप्तेजवायूनां चतुर्णां भूतानां प्रपञ्चः। वेदनास्कन्धः—सुखानुभवस्य, दुःखानुभवस्य, अदुःखासुखानुभवस्य च प्रपञ्चः। संज्ञास्कन्धः—सविकल्पकज्ञानप्रपञ्चः। संस्कारस्कन्धः— चैतसिकधर्मप्रपञ्चः। विज्ञानस्कन्धः—चित्तप्रपञ्चः। स्कन्धेभ्यो व्यतिरिक्तं निर्वाणम्। षड्भिरेतैर्वर्गैः सर्वतत्त्वसंग्रहः।

अथवा चतुर्भिरेव सर्वसंग्रहः। तद्यथा—चित्तं चैतसिकं रूपं निर्वाणं च। वेदनास्कन्धस्य संज्ञास्कन्धस्य चात्र चैतसिकेष्वन्तर्भावो वेदितव्यः[1]।

अथवा त्रिभिरेव सर्वसंग्रहः। तद्यथा—चित्तं स्थूलरूपं (=पञ्चेन्द्रियाणि, पञ्चार्थाश्च) धर्मधातुश्च। धर्मधातौ सूक्ष्मरूपचैतसिकधर्मनिर्वाणानामन्तर्भावो वेदितव्यः[2]। यथा वा— रूपम्, अरूपम्, निर्वाणं चेति।

अथवा द्वाभ्यामेव संग्रहः। असंकृतं (=निर्वाणं) संस्कृतं (=स्कन्धप्रपञ्चः) च। अथवैकेनैव धर्मा इति पदेन सर्वं निर्देष्टुं शक्यते।

२. सर्वधर्मलक्षणं—पुद्गलनैरात्म्यम्

सर्वे धर्मा अनात्मानः[3]। अत्र नास्ति कश्चिदात्मा सत्त्वो वा। "यथेषां च प्रतीत्य, अक्षं च प्रतीत्य, चक्राणि च प्रतीत्य, रथपञ्जरं च प्रतीत्य रथ इति''''व्यवहारः।''''एवमेव''''

---

१. अभिधम्मत्थसंगह १।१। २. अभिधम्मत्थसंगह ७।४१। ३. धम्मपद २७६।

रूपं च प्रतीत्य, वेदनां च प्रतीत्य, संज्ञां च प्रतीत्य, संस्कारांश्च प्रतीत्य विज्ञानं च प्रतीत्य.... [आत्मा] इति व्यवहारः। परमार्थतः पुनरत्र पुद्गलः (= आत्मा) नोपलभ्यते[1]।" स्कन्धाश्रय एव सोऽयं व्यवहारो यदिदम् 'आत्मा' इति, 'सत्त्व' इति। तथा चागमः—

यथा हि अङ्गसंभारा होति सद्दो रथो इति।
एवं खन्धेसु सन्तेसु होति सत्तो ति सम्मुति[2]॥
[यथा ह्यङ्गसंभाराद् भवति शब्दो रथ इति।
एवं स्कन्धेषु सत्सु भवति सत्त्व इति संवृतिः॥]

तदिदं पुद्गलनैरात्म्यं (= अनात्मत्वं) सर्वधर्मानुगतमेकं लक्षणम्।

३. सर्वसंस्कृतधर्मलक्षणम्—अनित्यता-दुःखता-अनात्मता

सर्वे संस्कृतधर्मा नाम पञ्च स्कन्धाः। तेऽनित्या दुःखा अनात्मानः। संस्कृतधर्माणामनित्यतायां तारतम्यमपि भवति। "तत्रोत्पादस्थितिभङ्गवशेन क्षणत्रयमेकचित्तक्षणं नाम। सप्तदश चित्तक्षणानि रूपधर्माणामायुः[3]।" तथा च महद्धि रूपक्षणं यस्मिन् सप्तदश चित्तक्षणान्युत्पद्य निरुध्यन्ते। एतत्क्षणतारतम्यमागमानुसारमाचार्यैर्व्यवस्थापितम्। विद्यते चागमे प्रतिपाद्यते चागमे चित्तापेक्षया रूपतत्त्वस्य स्थिरता। तथा हि—"वरम्....अश्रुतवान् पृथग्जन इमं चातुर्महाभूतिकं कायमात्मत उपगच्छेत्। न त्वेव चित्तम्। तत्कस्य हेतोः? दृश्यतेऽयं....काय एकमपि वर्षं तिष्ठन्....वर्षशतमपि तिष्ठन् भूयोऽपि तिष्ठन्। यच्च खल्वेतद्....उच्यते चित्तमिति विज्ञानमिति तद् रात्र्याश्च दिवसस्य चान्यदेवोत्पद्यतेऽन्यदेव निरुध्यते[4]।"

४. निर्वाणलक्षणम्

"निर्वाणं पुनर्लोकोत्तरसंख्यातं चतुर्मार्गज्ञानेन साक्षात्कर्तव्यं मार्गफलानामालम्बनभूतं वानसंख्यातायास्तृष्णाया निष्क्रान्तत्वान्निर्वाणमिति प्रोच्यते। तदेतत् स्वभावत एकविधमपि

---

१. मिलिन्दपन्ह, पृष्ठ २८।

२. संयुत्तनिकाय, १।१३१; इदं मिलिन्दप्रश्नेऽपि [२८ तमे पृष्ठे] उद्धृतम्।

३. अभिधम्मत्थसंगह ४।८।

४. संयुत्तनिकाय, २।९४–९५।

सोपादिशेषनिर्वाणधातुः, निरुपादिशेषनिर्वाणधातुश्चेति द्विविधं भवति कारणपर्यायेण। तथा शून्यम्, अनिमित्तम्, अप्रणिहितं चेति त्रिविधं भवत्याकारभेदेन।

[1]पदमच्युतमत्यन्तमसंस्कृतमनुत्तरम्।
निर्वाणमिति भाषन्ते वानमुक्ता महर्षयः॥

तत्र पृथग्जनः (=साधारणो लोकः) संयोजनबद्धो भवति। संयोजनानि नाम रागादयः क्लेशाः। आर्यः संयोजनमुक्तो भवति। तत्राप्यस्ति तारतम्यम्। तथा हि—दृष्टि-विचिकित्साप्रहाणेन स्रोतआपन्नो भवति। रागद्वेषमोहानां तनूकरणेन सकृदागामी भवति। कामरागव्यापादयोरनवशेषप्रहाणेनानागामी भवति[2]। स्रोतआपन्नस्य भवे नाष्टमं जन्म भवति। सप्तकृत्व एव स जायते[3]। सकृदागामिनः केवलमिहैकवारं जन्म भवति न द्वितीयम्। अनागामी नेह मनुष्येषूत्पद्यते। स शुद्धावासदेवेषूत्पद्य तत एव निर्वाति। अनवशेषक्लेश-प्रहाणेनार्हन् नाम भवति क्षीणास्रवो लोकेऽग्रदक्षिणीयः[4]। एतेषां चतुर्णां पुद्गलानां भेदेन चत्वारो मार्गाः—स्रोतआपत्तिमार्गः, सकृदागामिमार्गः, अनागामिमार्गः, अर्हन्मार्गश्चेत्यु-च्यन्ते। तेषामेव भावनया निर्वाणं साक्षात्कर्तव्यं भवति।

निर्वाणं निरोधरूपं तृष्णाया अनवशेषनिरोध एव। तस्य द्वौ भेदौ। प्रथमं जीवन-मुक्तिरूपं यत् सोपादिशेषनिर्वाणधातुरित्युच्यते। यतस्तस्मिन् उपादेः शेषोऽवशेषस्तिष्ठति। उपादीयते कर्मणा—इत्युपादिः। स्कन्धपञ्चकस्य नामान्तरमेवोपादिः। द्वितीयं शरीरपाते यत् पुनर्जन्माभावः। तस्यैव सेयमाख्या निरुपादिशेषनिर्वाणधातुरिति। यतो न तस्मिन् उपादेः (=पञ्चस्कन्धानाम्) विद्यमानता।

निर्वाणाधिगमाय मार्गः स्रोतआपत्त्यादिरूपो लब्धव्यो भवति। स यद्यनात्मानुपश्यनया लभ्यते तर्हि तत्साक्षात्कृतं निर्वाणं शून्यमित्युच्यते, रागादिभिः शून्यत्वात्। स यद्यनित्यतानुप-श्यनया लभ्यते तर्हि तत्साक्षात्कृतं निर्वाणमनिमित्तमित्युच्यते, रागादिनिमित्ताभावात्। स यदि दुःखानुपश्यनया लभ्यते तर्हि तत्साक्षात्कृतं निर्वाणमप्रणिहितमित्युच्यते, रागादि-प्रणिधिविरहितत्वात्।

---

१. अभिधम्मत्थसंगह ६।३०, ३१।
२. अभिधम्मत्थसंगह ६।३६–४१।
३. सुत्तनिपात, रतनसुत्त, गाथा ६।
४. अभिधम्मत्थसंगह ६।४२।

५. कालः, आकाशं च

आकाशं वस्तुभूतं नास्ति । तत् केवलं परिच्छेदरूपं नाम[1] । इदं रूपाणां परिच्छेद-दर्शनमात्रेण ज्ञायते ।

काल इति अध्वा इति नार्थान्तरम् । सोऽयमतीतानागतप्रत्युत्पन्नभेदेन भिद्यते । "कश्चिद्……अध्वास्ति कश्चिद् नास्ति । ……ये……संस्कारा अतीता विगता निरुद्धा विपरिणता सोऽध्वा नास्ति । ये धर्मा विपाका ये च विपाकधर्मधर्मा ये चान्यत्र प्रतिसन्धिं ददति, सोऽध्वास्ति । ये सत्त्वा कालकृता अन्यत्रानुत्पन्नाः, सोऽध्वा नास्ति । ये च सत्त्वाः परिनिर्वृताः, स चाध्वा नास्ति परिनिर्वृतत्वात् ।" तथा च धर्माणां त्रिकालास्तिता नास्ति ।

"अतीतस्याध्वनोऽनागतस्य चाध्वनः प्रत्युत्पन्नस्य चाध्वनोऽविद्या मूलम् । अविद्या-प्रत्ययात् संस्काराः, संस्कारप्रत्ययाद् विज्ञानम्, विज्ञानप्रत्ययाद् नामरूपम्, नामरूपप्रत्ययात् षडायतनम् , षडायतनप्रत्ययात् स्पर्शः, स्पर्शप्रत्ययाद् वेदना, वेदनाप्रत्ययात् तृष्णा, तृष्णा-प्रत्ययाद् उपादानम् , उपादानप्रत्ययाद् भवः, भवप्रत्ययाद् जातिः, जातिप्रत्ययाद् जराकरण-शोकपरिदेवदुःखदौर्मनस्योपायासाः संभवन्ति । एवमेतस्य केवलस्याध्वनः पूर्वा कोटिर्न प्रज्ञायते ।"[2]

"यः खल्वतीतोऽध्वा, एषा पूर्वा कोटिः ।………इतः पूर्वं…सर्वेण सर्वं सर्वथा सर्वम् अविद्या नाभवदिति, एषा पूर्वा कोटिर्न प्रज्ञायते । यच्च अभूत्वा संभवति भूत्वा प्रतिविगच्छति, एषा पूर्वा कोटिः प्रज्ञायते ।"[3] तथा च सर्वेषां धर्माणां जायमानानामविद्यैव पूर्वा कोटिः । अविद्यायाः पूर्वा कोटिस्तु न ज्ञायते । "धर्मसन्ततिः सन्दधाति, अन्य उत्पद्यते, अन्यो निरुध्यते ।"[4]

६. चित्तसन्ततिः

धर्मेषु हेयोपादेयप्रवणतया चित्तं प्रधानम् । चित्तं मनो विज्ञानमिति पर्यायाः । सर्वे धर्माः खलु "मनः पूर्वंगमा………मनःश्रेष्ठा मनोमयाः ।"[5] तस्यैतस्य मनसो वा चित्तस्य वा चतस्रोऽवस्थाः । तद्यथा—कस्मिंश्चिदपि भवे यत्प्रथमं चित्तं तत्प्रतिसन्धिचित्तं नाम । यत्

१. अभिधम्मत्थसंगह ६।५ । २. मिलिन्दपञ्ह, पृष्ठ ४९–५० ।
३. मिलिन्दपञ्ह, पृष्ठ ५१ । ४. मिलिन्दपञ्ह, पृष्ठ ४१ । ५. धम्मपद १ ।

इदं भवेन भवं प्रति सन्दधाति तत इदं प्रतिसन्धिचित्तमित्युच्यते। कस्मिंश्चिदपि भवे यत् चरमं चित्तं तत् च्युतिचित्तं नाम। प्रतिसन्धिच्युतिचित्तयोरन्तरे तस्य तस्य भवस्याङ्गभावेन यावदायुः प्रवर्तमानं चित्तं भवाङ्गचित्तमित्युच्यते। एतस्य भवाङ्गचित्तस्य तत्तदालम्बने यत् प्रवर्तनं तद् वीथीचित्तं नाम।

प्रतिसन्धिभवाङ्गवीथयश्च्युतिरत्र तथा भवान्तरे।
पुनः सन्धिर्भवाङ्गमितीयं परिवर्तते चित्तसन्ततिः ॥[1]

चित्तस्य प्राधान्यमङ्गीकृत्योच्यते चित्तस्य प्रतिसन्धिः, चित्तस्य च्युतिरित्यादि। वस्तुतस्तु नामरूपं प्रतिसन्दधाति। "तत्र कतमद् नाम कतमद् रूपं। यत्तत्र........औदारिकं (= स्थूलं) एतद्रूपम्, ये तत्र सूक्ष्माश्चित्तचैतसिका धर्मा एतद् नाम।........केन कारणेन नामैव न प्रतिसन्दधाति, रूपमेव वा। अन्योन्योपनिश्रिता........इमे धर्मा एकत एवोपपद्यन्ते........[2] एवमेतद् दीर्घाध्वनां सन्धावितम्!"[3]

७. नामरूपप्रतिसन्धानम्

"नामरूपं....प्रतिसन्दधाति। किम् एतदेव नामरूपं प्रतिसन्दधाति। न खलु........एतदेव नामरूपं प्रतिसन्दधाति। अनेन पुनः........नामरूपेण कर्म करोति शोभनं वा पापकं वा, तेन कर्मणा [निर्वृत्तं] अन्यद् नामरूपं प्रतिसन्दधाति।........अन्यद् मरणान्तिकं नामरूपम्, अन्यत् प्रतिसन्धौ नामरूपम्। अपि च तत एव तद् निर्वृत्तम् ॥"[4]

८. गतिभेदः

गर्भे एके उत्पद्यन्ते निरयं पापकर्मिणः।
स्वर्गं सुगतिनो यन्ति परिनिर्वान्ति अनास्रवा ॥[5]

तथा च दुर्गतिः सुगतिश्चेति कर्मिणां द्वे गती। तयोः प्रपञ्चः सर्वस्त्रैधातुको[6] भवति संसारः। सर्वा गतिः सास्रवा रागद्वेषमोहक्लेशसहिता। निर्वाणं नाम न गतिः, तत्र क्लेशाभावात्। अत एव तदनास्रवमित्युच्यते।

---

१. अभिधम्मत्थसंगह ५।४१। २. सहैवोत्पद्यन्ते—इत्यर्थः। ३. मिलिन्दपञ्ह, पृष्ठ ४६।
४. मिलिन्दपञ्ह, पृष्ठ ४६, ४८। ५. धम्मपद १२६।
६. त्रैधातुसंसारविवेचनार्थं द्रष्टव्यम् [अभिधम्मत्थसंगह ५।३–८]।

स्थविरधर्मपर्यायः

१. संसारस्वरूपम्

त्रयाणां.......सन्निपाताद् गर्भस्यावक्रान्तिर्भवति। इह मातापितरौ च सन्निपतितौ भवतः। माता च ऋतुमती भवति। गन्धर्वः (=अन्तराभवः = मृत्यूपपत्तिभवयोरन्तरे प्रवर्तमानः स्कन्धसन्तानः) च प्रत्युपस्थितो भवति।.......तमेनं माता नव वा दश वा मासान् गर्भं कुक्षिणा परिभरति महता संशयेन गुरुं भारम्। नवानां वा दशानां वा मासानामत्ययेन विजायते.......तमेनं जातं समानं स्वकेन लोहितेन पोषयति। लोहितं ह्येतद्....... आर्यस्य विनये यदिदं मातुः स्तन्यम्।

स खलु कुमारो वृद्धिमन्वेत्य इन्द्रियाणां परिपाकमन्वेत्य पञ्चभिः कामगुणैः समर्पितः समङ्गीभूतः परिचारयति चक्षुर्विज्ञेयै रूपैरिष्टैः कान्तैः मनापैः प्रियरूपैः कामोपसंहितै रञ्जनीयैः, श्रोत्रविज्ञेयैः शब्दैः, घ्राणविज्ञेयैर्गन्धैः, जिह्वाविज्ञेयै रसैः, कायविज्ञेयैः स्प्रष्टव्यैः [मनोविज्ञेयैर्धर्मैश्च]।

स चक्षुषा रूपं दृष्ट्वा प्रियरूपे संरज्यति, अप्रियरूपे व्यापद्यते। श्रोत्रेण शब्दं श्रुत्वा, घ्राणेन गन्धं घ्रात्वा, जिह्वया रसमशित्वा, कायेन स्प्रष्टव्यं स्पृष्ट्वा, मनसा धर्मं विज्ञाय, प्रियरूपे संरज्यति, अप्रियरूपे व्यापद्यते। अनुपस्थितकायस्मृतिश्च विहरति परित्तचेताः। तां च चेतोविमुक्तिं प्रज्ञाविमुक्तिं यथाभूतां न प्रजानाति यथास्य ते पापका अकुशला धर्मा अपरिशेषा निरुध्यन्ते। स एवमनुरोधविरोधं समापन्नो यां काञ्चन वेदनां वेदयते सुखां वा दुःखां वा अदुःखासुखां वा, स तां वेदनामभिनन्दति, अभिवदति, अध्यवस्य तिष्ठति। तस्य तां वेदनामभिनन्दतोऽभिवदतोऽध्यवस्य तिष्ठत उत्पद्यते नन्दी। या वेदनासु नन्दी तदुपादानम्।

तस्योपादानप्रत्ययाद् भवः, भवप्रत्ययाज्जातिः, जातिप्रत्ययाद् जरामरणं शोकपरिदेवदुःखदौर्मनस्योपायासाः संभवन्ति, एवमेतस्य केवलस्य दुःखस्कन्धस्य समुदयो भवति।

उपादानं हि क्लेशः। भवः कर्मः। जातिजरामरणादिफलं दुःखरूपम्। तथा च दुःखं कर्मजम्। कर्म क्लेशजम्। क्लेशस्यैवाभिधानं यदिदम् 'अविद्या' इति, 'तृष्णा' इति। कर्मण एवैतदभिधानं यदिदं 'संस्काराः' इति, 'भवः' इति। दुःखमेवेदं सर्वं यदिदमुच्यते जातिजरामरणादिकम्। तस्यैव प्रपञ्चो यदिदमुच्यते विज्ञानं नामरूपं षडायतनं स्पर्शो वेदना चेति। एवं क्लेशकर्मदुःखानां चक्रं प्रवर्तते।

१०. निःसरणम्

शीलसमाधिप्रज्ञाभिः क्लेशान् विशोधयति। विशुद्धेषु यत् कर्म भवति तदक्लिष्टं नाम, न च तत् कुशलाकुशलशुभाशुभपुण्यापुण्यदुःखसुखरूपं विपाकं दातुं प्रभवति। तथा च दुःखात् सत्त्वो निःसरति। तदेतत्सर्वं क्लेशादिशोधनं कथं संपद्यते। [1]अत्रागमः—"इह···· तथागतो लोके उत्पद्यते अर्हन् सम्यक्सम्बुद्धो विद्याचरणसम्पन्नः सुगतो लोकविद् अनुत्तरः पुरुषदम्यसारथिः शास्ता देवमनुष्याणां बुद्धो भगवान्। ·······स धर्मं देशयति आदिकल्याणं मध्येकल्याणं पर्यवसानकल्याणं सदर्थं सव्यञ्जनं केवलपरिपूर्णं परिशुद्धं ब्रह्मचर्यं प्रकाशयति। तं धर्मं शृणोति गृहपतिर्वा गृहपतिपुत्रो वाऽन्यतरस्मिन् वा कुले प्रत्याजातः। स तं धर्मं श्रुत्वा तथागते श्रद्धां प्रतिलभते। स तेन श्रद्धाप्रतिलाभेन समन्वागत इति [2]प्रतिसञ्चिक्षति (मनसि विमर्शं करोति) संबाधो गृहावासो रजःपथोऽभ्यवकाशः प्रव्रज्या। नेदं सुकरमागारमध्या-वसता एकान्तपरिपूर्णमेकान्तपरिशुद्धं शङ्खलिखितं ब्रह्मचर्यं चरितुम्। यद्नूनमहं केश श्मश्रूण्यवहार्य, काषायाणि वस्त्राण्याच्छाद्य, अगारादनागारिकं प्रव्रजेयमिति। सोऽपरेण समयेनाल्पं भोगस्कन्धं प्रहाय महान्तं वा भोगस्कन्धं प्रहायाल्पं वा ज्ञातिपरिवर्तं प्रहाय महान्तं वा ज्ञातिपरिवर्तं प्रहाय·······प्रव्रजति। स एवं प्रव्रजितः समानो भिक्षूणां शिक्षासाजीवसमापन्नः····

१—प्राणातिपातात् प्रतिविरतो भवति। छेदन-वध-बन्धन-विपदामोष (=डकैती) आलोप (= जबरदस्ती)-सहसाकारात् प्रतिविरतो भवति। बीजग्रामभूतग्रामसमालम्भात् प्रतिविरतो भवति। दयमानः सर्वभूतानुकम्पी विहरति।

२—अदत्तादानात् प्रतिविरतो भवति। दत्तादायी दत्तप्रतिकांक्षी अस्तेनेन शुचिभूतेनात्मना विहरति।

३—ब्रह्मचारी भवति विरतो·······ग्राम्यधर्मात्।

४—मृषावादात्प्रतिविरतो भवति सत्यवादी सत्यसन्धः स्थाता प्रत्यायकोऽविसंवादको लोकस्य।

५—पैशुन्यवाचः प्रतिविरतो भवति—(क) इतः श्रुत्वा नामुत्राख्याता एषां भेदाय, (ख)

---

१. मज्झिमनिकाय (महातण्हसंखयसुत्त, सङ्ख्या ३८) १।२५६–२५७।

२. प्रतिसञ्चिक्षति—इदं बौद्धसंस्कृतप्रयोगानुकरणम्। एवमनुपश्यनादयोऽपि ज्ञातव्याः।

अमुत्र वा श्रुत्वा नैषामाख्याताऽमीषां भेदाय। इति भिन्नानां वा सन्धाता, संहितानां वाऽनुप्रदाता, समग्रारामः समग्ररतः समग्रनन्दी समग्रकरणीं वाचं भाषिता भवति।

६—परुषाया वाचः प्रतिविरतो भवति।

७—संभिन्नप्रलापात् प्रतिविरतो भवति कालवादी भूतवादी अर्थवादी धर्मवादी विनयवादी।

८—(क) एकभक्तकः, रात्रोपरतः, विरतो विकालभोजनात्।

(ख) नृत्यगीतवादित्रविशूकदर्शनात् प्रतिविरतो भवति।

(ग) मालागन्धविलेपनधारणमण्डनविभूषणस्थानात् प्रतिविरतो भवति।

(घ) उच्चैःशयनमहाशयनात् प्रतिविरतो भवति। [एवं भिक्षुजीवनं तपःपरमित्युक्तम्]।

९—(क) १. जातरूपरजत - २. आमकधान्य - ३. आमकमांस - ४. स्त्रीकुमारिका - ५. दासीदास - ६. अजेडक - ७. कुक्कुटशूकर - ८. हस्तिगवाश्वबडवा - ९. क्षेत्रवस्तुप्रतिग्रहणात् प्रतिविरतो भवति। [अर्थात् केवलं धर्मसंग्रहं करोति, अर्थसंग्रहं न करोति]।

(ख) दौत्यप्रहितगमनानुयोगात् प्रतिविरतो भवति [अर्थात् राजनीतौ न लिप्तो भवति]।

(ग) क्रयविक्रयात्, तुलाकूटकांस्यकूटमानकूटात्, उत्कोटन (=कुटिलवृत्ति)-वञ्चन-निकृति (=छल) साचियोगात् प्रतिविरतो भवति। [अर्थात् वाणिज्यवृत्तिं न करोति]।

[एवं भिक्षोः क्षत्रियवैश्यवृत्त्या जीवनं प्रतिषिद्धम्। परिग्रहराहित्यं च प्रतिपादितम्]

१०—स संतुष्टो भवति। तद्यथापि वा पक्षी शकुनो येन येनैव (= यत्र यत्रैव) डयते सपत्रभार एव डयते। एवं भिक्षुः कायपरिहारिकेण चीवरेण कुक्षिपरिहारिकेण पिण्डपातेन येन येनैव प्रक्राम्यति समादायैव प्रक्राम्यति।

सोऽनेनार्येण शीलस्कन्धेन समन्वागतोऽध्यात्ममनवद्यसुखं प्रतिसंवेदयते।

स चक्षुषा रूपम्, श्रोत्रेण शब्दम्, घ्राणेन गन्धम्, जिह्वया रसम्, कायेन स्प्रष्टव्यम्, मनसा धर्मं विज्ञाय न निमित्तग्राही भवति, नानुव्यञ्जनग्राही[1]। सोऽभिक्रान्ते प्रतिक्रान्ते, आलो-

---

१. एतेन इन्द्रियसंवरः प्रोक्तः।

किते विलोकिते, संमिञ्जिते प्रसारिते, अशिते पीते खादिते स्वदिते, उच्चारस्त्रावकर्मणि, गते स्थिते निषण्णे सुप्ते जागरिते भाषिते तूष्णींभावे च संप्रजानकारी भवति[1]। विविक्तं शयनासनं भजति, अरण्यं वृक्षमूलं पर्वतं कन्दरां गिरिगुहां श्मशानं वनप्रस्थमभ्यवकाशं पलालपुञ्जम्[2]। स पश्चाद्भक्तं पिण्डपातप्रतिक्रान्तो निषीदति पर्यङ्कमाभुज्य, ऋजुं कायं प्रणिधाय, परिमुखीं स्मृतिमुपस्थाप्य[3]। सोऽभिध्यायाः, व्यापाददोषात्, स्त्यानमिद्धात्, औद्धत्यकौकृत्यात्, कुशलेषु धर्मेषु विचिकित्सायाश्च चित्तं परिशोधयति[4]। इमानि पञ्च नीवरणानि प्रहाय विविक्तं कामैरकुशलैश्च धर्मैः"""ध्यानमुपसंपद्य विहरति[5]। """स रूपे शब्दे गन्धे रसे स्प्रष्टव्ये धर्मे प्रियरूपे न संरज्यति, अप्रियरूपे न व्यापद्यते। उपस्थितकायस्मृतिश्च विहरत्यप्रमाणचेताः। तां च चेतोविमुक्तिं प्रज्ञाविमुक्तिं यथाभूतां प्रजानाति। यथास्य ते पापका अकुशला धर्मा अपरिशेषा निरुध्यन्ते। स एवमनुरोधविरोधपरिहीणो यां काचिद् वेदनां वेदयते सुखां वा, दुःखां वा, अदुःखासुखां वा, स तां वेदनां नाभिनन्दति नाभिवदति नाध्यवस्य तिष्ठति। तस्य तां वेदनामनभिनन्दतोऽनभिवदतोऽनध्यवस्य तिष्ठतो या वेदनासु नन्दी सा निरुध्यते। तस्य नन्दीनिरोधादुपादाननिरोधः, उपादाननिरोदाद् भवनिरोधः, भवनिरोधाज्जातिनिरोधः, जातिनिरोधाच्छोकपरिदेवदुःखदौर्मनस्योपायासा निरुध्यन्ते। एवं केवलस्य दुःखस्कन्धस्य निरोधो भवति।"

११. शरणम्

बहु वै शरणं यान्ति पर्वतांश्च वनानि च।
आरामवृक्षचैत्यानि मनुष्या भयतर्जिताः॥
नैतत्खलु शरणं क्षेमं नैतच्छरणमुत्तमम्।
नैतच्छरणमागम्य सर्वदुःखात् प्रमुच्यते॥
यश्च बुद्धं च धर्मं च सङ्घं च शरणं गतः।
चत्वारि चार्यसत्यानि सम्यक् पश्यति प्रज्ञया॥

---

१. एतेन स्मृतिसंप्रजन्यः प्रोक्तः।
२. एतेन विवेकः (एकान्तवासः) प्रोक्तः।
३. एतेन योगाभ्यासस्य कालः, आसनं चोपदिष्टे।
४. क्रमेण पञ्च नीवरणप्रहाणोपदेशः।
५. ध्यानप्रपञ्चस्तु नात्र निर्दिश्यते बहु विस्तृतत्वात्।

दुःखं दुःखसमुत्पादं दुःखस्य च अतिक्रमम् ।
आर्यं चाष्टाङ्गिकं मार्गं दुःखोपशमगामिनम् ॥
एतत्खलु शरणं क्षेममेतच्छरणमुत्तमम् ।
एतच्छरणमागम्य सर्वदुःखात् प्रमुच्यते ॥ [धम्मपद १८८–१९२]

यो धर्मं पश्यति स मां (=बुद्धं) पश्यति[1] । यः प्रतीत्यसमुत्पादं पश्यति स धर्मं पश्यति[2] । तथा च "धर्मस्य शास्ता" इति कृत्वा बुद्धस्य पूजा न तु बुद्धस्तां पूजां गृह्णातीति कृत्वा तस्य पूजा । तथा चाह शारिपुत्रः—

पूज्यमाना असमसमाः सदेवमानुषैश्च ते ।
नासादयन्ति सत्कारं बुद्धानामेष धर्मता ॥

बोधिवृक्षमूल एव तथागतस्य सादना (=परिग्रहभावः[3]) प्रहीणा । किं पुनः परिनिर्वृतस्य[4] । यथा मनुष्या उष्णाभितप्ताः परिदाहपीडितास्तालवृन्तेन......वातं निर्वर्त्योष्णं निर्वापयन्ति परिदाहमुपशमयन्ति, एवमेव देवमनुष्यास्तथागतस्य परिनिर्वृतस्य [पूजादिकम्] अनासाद्यमानस्यैव धातुं च ज्ञानरत्नं च पूजयित्वा कुशलं निर्वर्त्य तेन कुशलेन त्रिविधाग्निसंतापपरिदाहं निर्वापयन्ति, उपशमयन्ति[5] । एवं परिनिर्वृतस्य तथागतस्य पूजादिकं चित्तप्रसादनहेतुकत्वादेव सफलं भवति । बुद्धपरिनिर्वाणानन्तरं बुद्धस्य प्रतिनिधिभूतो धर्म एव । तथा च भगवानेवाह—"यो मया धर्मश्च विनयश्च देशितः प्रज्ञप्तः स ममात्यये शास्ता—इति[6] ।

धर्मस्य प्रतिनिधिभूतस्तत्त्वं प्रतीत्यसमुत्पादः । स च—"अस्मिन् सतीदं भवति । अस्योत्पादादिदमुत्पद्यते । अस्मिन्नसतीदं न भवति । अस्य निरोधादिदं निरुध्यते[1] ।" इत्येवं रूपः । इदमेवाश्वजिद्गाथायामप्युक्तम्—

ये धर्मा हेतुप्रभवा हेतुं तेषां तथागतो ह्यवदत् ।
तेषां च यो निरोध एवंवादी महाश्रमणः ॥[7]

तथा च प्रतीत्यसमुत्पन्ना धर्मा एव मूलतत्त्वानि । येषां द्वादशाङ्गान्युक्तपूर्वाणि । तेषां प्रवृत्तिः संसारः । निवृत्तिर्निर्वाणम् ।

---

१. संयुत्तनिकाय, ३।१२० । २. मज्झिमनिकाय, १।१९१ । ३. मिलिन्दपञ्ह, पृ० ९५ ।
४. तत्रैव, पृ० ९८ । ५. तत्रैव, पृ० ९९ । ६. मज्झिमनिकाय, ३।६३ ।
७. विनयपिटक, महावग्ग, पृ० ४० ।

संघस्तु बुद्धधर्मस्य आगम (=ग्रन्थ) रूपेण प्रवर्तकः । अधिगम (=तत्त्वसाक्षात्कार) रूपेण च साक्षीति पूजार्हः । तस्य जीवनं सर्वथा निवृत्तिरूपः । तथा चाहुः—

संस्तवतो भयं जातं निकेताज्जायते रजः ।
अनिकेतमसंस्तवमेतद् वै मुनिदर्शनम् ॥[1]

यश्च नाधिगमाय न चागमप्रवर्तनाय रतः स च नादर्शभूतः । न चागमाधिगमाभ्यां हीनानां तथागतश्रावकाणां कार्यान्तरैः किमपि धर्मप्रयोजनं सिद्ध्यति ।

मार्गस्तु अष्टभिरङ्गैर्विभक्तः । स संक्षेपेण त्रिभिरङ्गैर्विभक्तुं शक्यम् । तथा हि—सम्यग्दृष्टिः सम्यक्संकल्पश्चेति प्रथमद्वितीयाङ्गे प्रज्ञायामन्तर्भवतः । सम्यग्वाक्, सम्यक्कर्म, सम्यगाजीवश्चेति तृतीयचतुर्थपञ्चमाङ्गानि शीलेऽन्तर्भवन्ति । सम्यग्व्यायामः, सम्यक्स्मृतिः, सम्यक्समाधिश्चेति षष्ठसप्तमाष्टमाङ्गानि समाधावन्तर्भवन्ति । इमे शीलसमाधिप्रज्ञारूपा धर्मस्कन्धाः । तत्र शीलं बहुतरं व्याकृतम् । समाधिर्न तत्त्वचर्चायामुपयोगी । प्रतीत्यसमुत्पादेन, अनित्यदुःखानात्मदर्शनैश्च प्रज्ञैवात्र निरूपिता, तस्या एव तत्त्वचर्चायां प्राधान्यात् । अष्टाङ्गमार्गस्य नामान्तरं मध्यमा प्रतिपदिति ।

शीलसमाधिप्रज्ञावतो बुद्धपुत्रस्य स्त्रीभिः कथं प्रतिपत्तव्यम् ? अत्रास्त्यानन्दतथागतयोः संवादः । तथा हि—

(आनन्दः)—कथं वयं भदन्त मातृग्रामे प्रतिपद्यामहे ।
(तथागतः)—अदर्शनमानन्द !
(आनन्दः)—दर्शने.......सति कथं प्रतिपत्तव्यम् ।
(तथागतः)—अनालापः.......।
(आनन्दः)—आलपता पुनः.......कथं प्रतिपत्तव्यम् ।
(तथागतः)—स्मृतिः.......उपस्थापयितव्या[2] ।

एवं कामार्थविमुखेन बुद्धपुत्रेण खड्गविषाणवत् सर्वथा निसंगताप्रवणेन भवितव्यम् । तथा चात्र गाथाः—

---

१. सुत्तनिपात, मुनिसुत्त; मिलिन्दपञ्ह, पृ० २११ ।
२. दीघनिकाय, महापरिनिब्बानसुत्त ।

स्थविरधर्मपर्यायः

संसर्गजातस्य भवन्ति स्नेहाः स्नेहान्वयं जायते दुःखमेतत् ।
आदीनवं स्नेहजं प्रेक्षमाण एकश्चरेत् खड्गविषाणकल्पः ॥
मित्रे सुहृद्ये अनुकम्पमानो हापयत्यर्थं प्रतिबद्धचित्तः ।
एतद्भयं संस्तवे प्रेक्षमाण एकश्चरेत् खड्गविषाणकल्पः ॥
पुत्रं च दारान् पितरं च मातरं धनानि धान्यानि च बान्धवांश्च ।
हित्वाथ कामान् यथावधिकांश्च एकश्चरेत् खड्गविषाणकल्पः ॥
मैत्रीमुपेक्षां करुणां विमुक्तिमासेवमानो मुदितां च काले ।
सर्वेण लोकेन अविरुध्यमान एकश्चरेत् खड्गविषाणकल्पः ॥
भजन्ति सेवन्ते च कारणार्था निष्कारणा दुर्लभा अद्य मित्रा[1] ।
आत्मार्थप्रज्ञा अशुचयो मनुष्या एकश्चरेत् खड्गविषाणकल्पः[2] ॥
आत्मार्थं हि परार्थेन बहुनापि न हापयेत् ।
आत्मार्थं समभिज्ञाय सदर्थप्रसितो भवेत्[3] ॥

बुद्धपुत्रा भवन्ति—"आत्मशरणा अनन्यशरणा धर्मशरणा अनन्यशरणाः"[4] । न तैर्द्वावन्तौ सेवितव्यौ । कतमौ द्वौ ? "यश्चायं कामसुखल्लिकानुयोगः, यश्चायमात्मक्लमथानुयोगः[5] ।"

समीक्षणम्

संसारविमुखस्य मुक्तिनिर्वाणाद्यभिधानस्यात्मार्थस्यानुधाविनो बुद्धपुत्रस्य निःसङ्गता लौकिकार्थपरायणानां मनसि न कथमपि प्रीतिं जनयितुमलम् । अत एव केचन लौकिकार्थपरायणास्तत्त्वचिन्तका आहुः—"अर्हत्स्वरूपस्यादर्शस्य विगतस्नेहता वीतरागता च नाश्वासं जनयतः ।.........न हि जगदिदं मठीयितुं शक्यम् । न च सर्वेषां स्त्रीबालवयस्कानां विविक्तायतनेषु प्रवेशो भवितुमर्हत्यविनाभूतः । न वा मानवजीवनस्थिरांशस्य केवलः प्रतिनिधिभूतो निर्वेदः । न च जगतो द्वन्द्वेषु माध्यस्थ्यं मुनिवृत्तिः प्रत्युत कर्माकुलजीवनसमारम्भेषु प्रशम-

---

१. मित्रा=मित्राणि; वैदिकरूपमिदम् । २. सुत्तनिपातखग्गविसाणसुत्त ।
३. धम्मपद, १६६ । ४. महापरिनिब्बानसुत्त । ५. धम्मचक्कपवत्तनसुत्त ।

वृत्तिः सा। इति तुमुलनादिनो जगतः कोलाहले यथात्मा न विचलितः स्यात्तथास्माभिरध्यात्मप्रवणैर्भवितव्यम्।[1]" किञ्च—"अर्हत्त्वादर्शः परिपूर्णमात्मानुविधायी परेषां कृते निष्प्रयोजनः कारुणिकस्य लोकवत्सलस्य तथागतस्य न सत्यानुवर्ती[1]। तथापि अर्हत्त्वपरमो हीनयाननिकायगणः "समधिकनिष्ठया तथागतस्यैतिहासिकपरम्पराप्रतिपादको भवति[2]।" यश्च समधिकनिष्ठया तथागतस्यैतिहासिकपरम्परानिरूपको भवति स भवितव्यस्तस्य भूयसानुवर्ती। यो हि नेदिष्ठं तथागतं स्पृशति स एव तथागतं प्रति सत्यो भवितव्यः। विरागप्रवणो हि तथागतधर्मं इति ये नाभ्युपगच्छन्ति, विरागप्रवणता येषां समाश्वासनाय न प्रभवति, येषां मनसि युद्धप्रवणता विद्यते, ये स्वात्मानं विजयिनं परान् विजितान् द्रष्टुमिच्छन्ति, द्वन्द्वारमतैव परं सुखमिति भवति येषां संस्कारस्तेषां लौकिकार्थपरायणानां कृते विरागप्रवणो धर्मो न विद्यते। तत एव द्विविधे श्रुतिस्मृती। अन्ये कामार्थपरायणानां कृते, अपरे धर्ममोक्षपरायणानां कृते। अन्यो हि व्यवहारार्थः, अन्यो हि परमार्थः। तथा चाह तथागतः—

अन्या हि लाभोपनिषद् अन्या निर्वाणगामिनी।
एवमेतदभिज्ञाय भिक्षुर्बुद्धस्य श्रावकः।
सत्कारं नाभिनन्देत विवेकमनुबृंहयेत् ॥ [धम्मपद, ७५]

अपरैरप्युक्तम्—

अर्थकामेष्वसक्तानां धर्मज्ञानं विधीयते ॥ [मनु०, २।१३]

तस्माल्लौकिकार्थदृष्ट्या धर्मस्य समीक्षा नैव प्रवर्तयितव्या। अथवा लौकिकार्थमेव प्रधानं मत्वा धर्मः समीक्षणीयः। तथा च कुर्वन्तु नाम नैकविधमभ्याख्यानं विरागप्रवणस्य धर्मस्य। न तत्प्रतिपक्षे किमपि ब्रूमः। यस्मात् सकललोकशान्तये विरागप्रवणं धर्मं विहाय नास्ति किञ्चिदुपायान्तरं तस्माद् विविधद्वन्द्वपरिश्रान्तस्य लोकस्य कृते स आवश्यक एव। न चैवं सर्वलोकः श्रमणविहारो भविष्यतीति मन्तव्यम्। अथवा भवतु सर्वलोकः श्रमणविहारः का तेन क्षतिः। तथा सत्यपि लोकयात्रार्थं यावती कर्मप्रवृत्तिरनिवार्या तावती भविष्यत्येव।

---

१. डा० एस० राधाकृष्णन् : इण्डियन फिलॉसफी, भा० १, पृ० ५८७–५८८।
२. तत्रैव, पृ० ५८६। ३. तत्रैव, पृ० ५८९।

स्थविरधर्मपर्यायः

आगम एव प्रवृत्तिपरायणानां महामङ्गलं दिशति—

मातापित्रोरुपस्थानं पुत्रदारस्य संग्रहः।
अनाकुलाश्च कर्मान्ता एतन्मङ्गलमुत्तम्॥
क्षान्तिश्च सौवचस्यता श्रमणानां च दर्शनम्।
कालेन धर्मसांकथ्या एतन्मङ्गलमुत्तमम्॥

[खुद्दकपाठ, मङ्गलसुत्त]

स एव निवृत्तिपरायणानुद्दिश्याह—

न ह्यात्महेतोर्न परस्य हेतोर्न पुत्रमिच्छेन्न धनं न राष्ट्रम्।
नेच्छेदधर्मेण समृद्धिमात्मनः स शीलवान् प्रज्ञावान् धार्मिको भवेत्॥

[धम्मपद, ८४]

तस्माद् विरागो नास्ति निष्ठुरता। अन्यथा हन्तरि च, अर्हति च भेदो न स्यात्। सर्वथैव वीतरागोऽप्यर्हन् ''बहुजनहिताय'' चरत्येव॥

अत्र ते कीर्तयिष्यामि वर्षं भारत भारतम्

डा० वासुदेवशरणोऽग्रवालः, हिन्दूविश्वविद्यालयः, काशी ।

[षष्ठवर्षतृतीयचतुर्थाङ्कतोऽनुवृत्तम्]

पञ्चनदप्रदेशानन्तरं भारतस्यातिविश्रुतो मध्यप्रदेशनामा भूभागोऽवभासते । [1]सरस्वतीदृषद्वत्योरन्तरालवर्ती ब्रह्मावर्तप्रदेशो मनूक्तदिशा परमपावनतया मन्यते स्म । तदनन्तरं शूरसेन-मत्स्य-कुरुपञ्चालजनपदानामेकीभूतं क्षेत्रं '[2]ब्रह्मर्षिदेश' इति संज्ञामलभत । कुरुपञ्चालसंबन्धिन इतिहासस्यानेका महत्त्वशालिन्यो घटना अस्यामेव भूमौ समघटन्त । ब्रह्मर्षिदेशस्येमे सीमानः क्रमशो महत्त्वपूर्णं कोसलजनपदं स्वस्मिन्नुपसंहरमाणाः प्रयागपर्यन्तं विस्तृता अभवन् । ततोऽयं भूभागो [3]मध्यदेश इति व्यपदेशं लेभे । विन्ध्याचलहिमाचलपारियात्राणां पूर्वपश्चिमसमुद्रयोश्च मध्यवर्ती सम्पूर्णो भूखण्ड आर्यावर्तनाम्ना व्यवहारं प्रपेदे । अस्यामवस्थायां सिन्धु-सौवीर-कच्छानर्तप्रभृतिरङ्ग-बङ्ग-कामरूप-कलिङ्गपर्यन्ता समग्रा पृथिवी आर्यसन्निवेशेऽन्तर्गता समजायत । [4]मनुना महता कण्ठेनार्यावर्तस्येयं परिभाषा निश्चिता । शक-यवनानामाक्रमणात् साम्राज्यसंस्थापनाच्च प्रागार्यावर्तस्य नूनमेतावान् विस्तार आसीत् ।

तदेदृशी मान्यताऽऽसीत् यत्पुण्यभूमिरिति ख्यापिते क्षेत्र एव तीर्थाः कल्प्यन्ते । मध्ये राजस्थानं सपुष्करं शाकम्भरीस्थानं विशिष्टतीर्थत्वेन कल्पितम् । राजस्थानक्षेत्रस्य दक्षिणस्यां दिशि अर्बुदाचलो नाम पर्वतो भारतीयानामतिचिरन्तनं तीर्थस्थानमासीत् । अत्रैव गिरिशृङ्गे ऋषिवशिष्ठस्याश्रममासीत् । अस्मिन् स्थाने या प्राचीना मातृदेवी, या च नागदेवता,

---

१. सरस्वतीदृषद्वत्योर्देवनद्योर्यदन्तरम् । तं देवनिर्मितं देशं ब्रह्मावर्तं प्रचक्षते ॥ [मनु० २।१७] ।

२. कुरुक्षेत्रं च मत्स्याश्च पञ्चालाः शूरसेनकाः । एष ब्रह्मर्षिदेशो वै ब्रह्मावर्तादनन्तरः ॥ [मनु० २।१९] ।

३. हिमवद्विन्ध्ययोर्मध्यं यत्प्राग्विनशनादपि । प्रत्यगेव प्रयागाच्च मध्यदेशः प्रकीर्तितः ॥ [मनु० २।२१] ।

४. आ समुद्रात्तु वै पूर्वादा समुद्रात्तु पश्चिमात् । तयोरेवान्तरं गिर्योरार्यावर्तं विदुर्बुधाः ॥ [मनु० २।२२] ।

।सादद्वयं
अस्माक-
ह्नत्रियाणां
ःणपह्लव-
चलसंपा-
गोत्राख्या

ङ्गमः, ते
ायकपर्वा-
परनाम्नो
चोल्लेखो
ो वृष्णयो

यद्गङ्गा-
। कृता ।
स्थितस्य
रे स्थितः
ाऽधुनापि

ानि सर्व-
ो विपरि-
विमुई)-
अरुणा-
नदी-
ास्य पूर्व-
रे तामेव

स्वतीदृष
न्तरं श
कुरुपञ्चा
ब्रह्मर्षिदे
पर्यन्तं वि
पारियात्र
अस्यामव
आर्यसन्नि
शक-यव

र

राजस्थानं
दिशि अ
ऋषिवशि

---

१. सरस्व
२. कुरुक्षे
३. हिमव
४. आ स

उभयेषामत्र पूजाचत्वरं बभूव । अस्मिन् स्थलेऽम्बादेव्या अर्बुदनागस्य च प्रासादद्वयं गुप्तकालात्प्रागेव स्थापितमासीत् । गुप्तकालपर्यन्तं तयोरस्तित्वमक्षुण्णं वर्तते स्म । अस्माकमितिहासे यशस्यतमः श्रीवसिष्ठस्य ऋषेर्महान् यज्ञोऽर्बुदशिखर एव तेने, यतः क्षत्रियाणां षट्त्रिंशद्राजकुलानि प्रादुर्भूतानि । इदं तथ्यमितिहासविद्भिरेवं व्याख्यायते यच्छकहूणपह्लवप्रभृतीनां देशान्तरादागतानां वृषलानामेतद्देशीयसामाजिकव्यवस्थायामन्तर्भावोऽर्बुदाचलसंपादितवसिष्ठाध्वरक्रमेणैव सुनिष्ठितोऽभूत् । तदनन्तरं तेषां क्षत्रबन्धूनामग्निकुलत्वेन गोत्राख्या प्रथिता सञ्जाता ।

प्रतीच्यां दिशि सौवीरजनपदे यद् हिंगुलातीर्थम् , दक्षिणस्यां च सिन्धुसागरसङ्गमः, ते उभे आर्यावर्तस्य पुण्यक्षेत्रस्य समुद्रपर्यन्तविस्तारितसीमानं सूचयतः । महाभारतीयारण्यकपर्वान्तर्गततीर्थयात्रापर्वणि सुराष्ट्र (दक्षिण काठियावाड़) प्रदेशस्य उज्जयन्तेत्यपरनाम्नो रैवतकपर्वतस्य (वर्तमान गिरनार), प्रभासेत्यपरनाम दधतः सोमनाथतीर्थस्य चोल्लेखो विद्यते । द्वारावती (द्वारका) चानर्तदेशस्य राजधान्यासीत् । तत्रैव श्रीकृष्णस्य नेतृत्वे वृष्णयो मथुराक्षेत्रात् पश्चिमस्यां दिशि प्रवासं कृत्वा स्वराज्यं स्थापितवन्तः ।

पूर्वस्यां दिश्यार्यावर्तस्य सीमानः पूर्वसमुद्रपर्यन्तं विस्तारिताः, तस्मात्सूच्यते यद्गङ्गासागरसंगमावधिकं क्षेत्रमार्यक्षेत्रं मन्यते । अत एवैकाधिकपुण्यतीर्थानां कल्पना तत्र कृता । कामरूपस्यासमप्रदेशस्य वा पूर्वदिग्भागे ब्रह्मपुत्रनदस्य लोहित्यनदस्य च संगमे स्थितस्य संवेद्यातीर्थस्य (आधुनिक सदिया) उल्लेखस्तीर्थयात्रापर्वण्युपलभ्यते । गोहाटीनगरे स्थितः कामाक्षातीर्थोऽप्यतिप्राचीनः । अत्र किरातानां शबराणां च या मातृपूजा, साऽधुनापि प्रचलति । अत एव कालिकापुराणेऽसौ कैरातधर्म इत्यभिधीयते ।

भूपरिचयस्याङ्गभूतानि नदीनामानि विशेषतो महत्त्वपूर्णानि भवन्ति, यतस्तानि सर्वतोऽधिकस्थास्नूनि भवन्ति । यदान्यविधानि नामानि परिवर्तन्ते तदापि नदीनामानि नो विपरिवर्तन्ते । गङ्गा-यमुना-कालिन्दी-रामगङ्गा(रथस्था) - गोमती-तमसा-वेदश्रुतिः(विसुई)-स्यन्दिका(सई) - इरावती(राप्ती) - गण्डकी(नारायणी) - कौशिकी(कोसी) - अरुणाताम्रा-करतोया-त्रिस्रोतसा-आत्रेयी-ब्रह्मपुत्र-लोहित्य-सूरमस(सूरमा) - पद्माप्रभृतीनि नदीनामानि शुद्धसंस्कृतभाषायाः परम्परां प्रकटयन्ति, धर्मभाषात्वेन यस्या विस्तारो भारतस्य पूर्वसीमानं यावदभूत् । एतद्व्यतिरिक्ता विन्ध्यपारियात्रपर्वतप्रान्ताभ्यामागन्तुका नद्योऽपि तामेव

परम्परां प्रत्याययन्ति। यथा—पर्णाशा (बनास), चर्मण्वती (चम्बल), कुमारी (कुवाँरी), वेत्रवती (बेतवा), दशार्णः (धसान), तमसा (टोंस), शोणः (हिरण्यबाहुः), शोणस्य शाखानदी ज्योतीरथा (जोहिला) च। अन्या अप्यनेका लघुनद्यः प्रदेशेऽस्मिन् वहन्ति। तीर्थयात्रापर्वणि गङ्गाद्रोणीषु प्रवहन्तीनां नदीनां संख्या ५०० पञ्चशती प्रत्यपादि, यासां जलान्याहृत्य गङ्गा समुद्रं प्रविशति[1]। गङ्गासागरसंगमतीर्थे स्नानस्य तावदेव फलं यावदुक्त-निखिलनदीस्नानस्य संभवति। गुप्तसाम्राज्यसन्निकटसमयरचिते पञ्चतन्त्रे गङ्गोद्गतानां सरितां संख्या ९०० नवशती[2] निरदेशि। इयं संख्या प्राचीनभारतीयभूगोलविदां भौगोलिकतत्त्वसूक्ष्मे-क्षिकां परिचाययति।

पुराणान्तर्वर्तिभुवनकोषसंज्ञकप्रकरणे भारतीयानां नदीनां जनपदानां च सूची समु-पलभ्यते। विशेषतस्तस्या अध्ययनमावश्यकं समेषामपि। तदनुसारमस्य देशस्येमे विभागाः सन्ति—मध्यदेशः, उदीच्यः, प्राच्यः, दक्षिणापथः, अपरान्तः, विन्ध्यपृष्ठम्, पर्वताश्रयी च। इमे विभागाः सर्वथा मौलिका व्यावहारिकाश्च विज्ञायन्ते। एतदनुसारं मध्यदेशप्राच्यदेशयो-र्जनपदा इत्थं संख्यायन्ते—कुरुपञ्चालः, साल्वः (उत्तरं राजस्थानम्), जाङ्गलः (उत्तरपूर्वं राजस्थानम्), शूरसेनः, मत्स्यः, काशी, कोसलः, मगधश्च। एतदन्येषामपि लघुजनपदानां नामानि सन्ति, येषामस्यां सूच्यां निर्देशो नास्ति। यथा वत्सनाम्नो (कौशा-म्बीराजधानीकस्य) जनपदस्य दक्षिणपूर्वस्यां दिशि करूषजनपदः, अङ्गाः (चम्पाख्यो भागलपुराख्यो वा प्रदेशः), वङ्गाः, मुद्गाः (मुद्गगिरिनामा मुङ्गेरनामा वा), अन्त-र्गिरिबहिर्गिरिनामानौ जनपदौ च।

हिमालयस्योच्चशिखरघटितभागः (१८०००–२०००० फुट) अन्तर्गिरिनाम्ना महाहिम-वन्नाम्ना वा कथ्यते। यत्र बदरी-केदार-नन्दादेवी-त्रिशूल-धवलगिरि-काञ्चनजङ्घा-गौरीशङ्कर-

---

१. स सागरं समासाद्य गङ्गायाः संगमे नृप।
नदीशतानां पञ्चानां मध्ये चक्रे समाप्लवम्॥

[महा० वन० ११४/२ पूना सं०]

२. भोः कान्त! दत्र जाह्नवी नवनदीशतानि गृहीत्वा नित्यमेव प्रविशति तथा सिन्धुश्च। तत्कथं त्वमष्टादश-नदीशतैः पूर्यमाणं तं समुद्रं विप्रुषवाहिन्या चञ्च्वा शोषयिष्यसि। [पञ्चतन्त्र, १।३५८]।

प्रभृतीनि शृङ्गाणि सन्ति । हिमालयस्य पञ्चषसहस्रतो दशसहस्र'फुट'प्रमाणकोच्चशिखरप्रदेशो बहिर्गिरिनाम्ना (पालीभाषायां चुल्लहिमवन्तनाम्ना) व्यपदिश्यते स्म । तत्र धर्मशाला-शिमला - मंसूरी - नैनीताल - रानीखेतप्रभृतिस्थानविशिष्टो हिमालयभागः संमिलितस्तिष्ठति । एतदधस्तनसमतलप्रदेशे विस्तृतो हिमगिरेस्तृतीयभागोऽद्यत्वे भाभरतराईप्रदेश उच्यते । हरद्वारतो देहरादूनपर्यन्तयात्रायां क्रमश उच्छ्रितभावं प्राप्नुवन्तीयमेव भूमिर्हिमालयस्य तृतीयोपत्यका वर्तते, या प्राग् 'उपगिरि' इत्यभिधीयते स्म । पाणिनिना—'गिरेश्च सेनकस्य' [५।४।११२] इति सूत्रेऽन्तर्गिरिशब्द उपगिरिशब्दश्च व्युत्पादितौ । सभापर्वणि [२७।३] अर्जुनस्य दिग्विजययात्रां वर्णयता भगवता व्यासेन अन्तर्गिरि-बहिर्गिरि-उपगिरिवर्तिदेशानां विजयस्तेन कृत इति वर्णितम् ।

हिमालयस्य भूगोलवर्णनप्रसङ्ग इदमवगन्तव्यं यद् भारतीयभौगोलिकविद्वद्भिरत्यन्त-सूक्ष्मेक्षिकया हिमगिरेः शृङ्गाणि, निर्झराः, सरोवराः, नद्यश्च सर्वेक्षिताः । स्थूलरूपेण हिमालयस्य खण्डद्वयं विद्यते—बदरीकेदारखण्डं कैलाशमानसखण्डं च । एतदुभयं तीर्थ-यात्राप्रकरणेऽसकृत्परिगणितम् । कैलासमानससरोवराभिमुखगामी मार्गः क्रौञ्चरन्ध्रेण गच्छ-न्नासीत् । तदेव क्रौञ्चरन्ध्रं कालिदासेन मेघदूते—"हंसद्वारं भृगुपतियशोवर्त्म यत्क्रौञ्चरन्ध्रम्" [१।५७] इत्थं वर्णितम् । हिमवतोऽद्रितटादनन्तरं कैलासाभिमुखगमनार्थमिदं कञ्चन पर्व-तीयं द्वारं संभवति, येन द्वारेण भारतीयसमतलप्रदेशेभ्य उड्डीय गगनगामिनो हंसाः प्रतिवर्षं वर्षारम्भे मानससरोवराभिमुखं प्रयान्ति, शरदृतोरारम्भे पुनस्ततोऽन्तर्वेद्यभिमुखं प्रतिनिवर्तन्ते च । अस्माभिरनुमीयते यद् अल्मोड़ातः कैलासगामिमार्गे यो 'लिपूलेख दर्रा' इति वर्तते, यमतिक्रम्य प्रथमं मान्धातारं पर्वतं पश्चाच्च कैलासं गच्छन्ति, तदेव हंसद्वारं क्रौञ्चरन्ध्रं वा संभवति । मानससरोवर एव संस्कृतसाहित्येऽच्छोदसरः, पालीसाहित्येऽनवतप्त (अनवतत्त) सरोवरश्चो-च्यते । संस्कृतसाहित्येऽस्य पुण्यसलिलराशेर्भूयान् महिमा वर्तते । आधुनिकदृष्टयापि स समीचीनः प्रतीयते, यतो मानससरोवरसलिलेभ्य एव शतद्रुनाम्नो नदस्य ब्रह्मपुत्रनाम्नो महा-नदस्य चोद्गमः संजायते । तस्य सरोवरस्यान्तिके तद्विस्तारदेशीयो राक्षसतालनामा सरोवरो विद्यते, यदीयं जलं मानससरोवरसंबन्धिविमलजलापेक्षया हीनगुणकं वर्तते । शिवमारा-धयितुं कैलासखण्डमधिवसता लङ्काधिपतिना रावणेनात्रैव तपस्तप्तमिति प्रसिद्धम् । रजताद्रिः कैलासो भारतवर्षस्य सर्वथा पवित्रो देशः, यत्र भवानीपतिर्भगवान् शिवः स्वयमेव प्रतिवसतीति

किल। कालिदासेनातिशोभनमुक्तं यत्कैलाशः—"राशीभूतः प्रतिदिनमिव त्र्यम्बकस्याट्टहासः" [पूर्वमे० ५८] इति। कैलाशस्य यानि विविधानि रूपाणि कल्पितानि तेषामेवेदमेकतमं रूपम्। भारतीयेतिहासस्यास्मिन्नेव स्वर्णयुगे प्रजाभिरत्र सर्वतो महानट्टहासः कृत आसीत्, यदा "ऋद्धं हि राज्यं पदमैन्द्रमाहुः" [रघु० २।५०] इत्थं पृथिव्याः समृद्धिमद्राज्यं स्वर्गेणोपमीयते स्म, यदा च कविना—"दिवः कान्तिमत्खण्डमेकम्" [पूर्वमे० ३०] एवंरूपेण भारतीयनगराणांमृद्धिः सौख्यं च कल्पितम्। कैलासस्यैव हेमकूटेत्यपरं नामासीत्। जैनग्रन्थेष्वयमेवाष्टापदनाम्ना व्यपदिश्यते। कैलासादागन्तुस्तिब्बतीयसुवर्णस्यैवाष्टापदेति संज्ञा संजाता। भारतीयभूगोलस्य सर्वतोऽद्भुतमिदं तत्त्वं प्रतीयते यदस्य देशस्योत्तरसीमायां शिवः कैलासमधिवसति, दक्षिणसीमायां च कन्याकुमारी पार्वती समुद्रतटमुपवसति; शिवप्राप्तये चाहर्निशं ध्यानमग्ना तपस्यति। विवाहात्प्रागेकस्यां दिशि शिवः समाधौ लीनः, अपरस्यां च पार्वती शिवसमागमेच्छया तपसि निरताऽऽसीत्। कस्यापि देशस्य भूगोल ईदृशी रहस्यमयी कल्पना नोपलभ्यते। उत्तरतो दक्षिणाभिमुखं दक्षिणतश्चोत्तराभिमुखं धावमाना भावधारा प्राणधारा चास्य देशस्य समग्रतामेकनिष्ठतां वा विदधाति। यावदुत्तरे हिमवान् गिरिः, यावत् समुद्रश्च दक्षिणे; तावत् पार्वतीपरमेश्वरयोरेकत्र संपृक्ताऽर्द्धनारीश्वरमूर्तिरस्य देशस्य सुघटितमैक्यं स्थापयिष्यति।

हिमालयस्य बदरीकेदारखण्डे गङ्गायमुनयोर्महिमपूर्णा धाराः प्रवहन्ति। यमुना यामुनपर्वतात् प्रभवति। यामुनपर्वतस्यैवैकस्य शृङ्गस्य 'बन्दरपूंछ' इति नूतनी संज्ञा। भारते तीर्थयात्रापर्वण्युल्लिखितं यदत्रैव मारुतिर्हनूमान् रामावतारस्य पश्चादत्रागत्य वसतिं चकार, द्वापरयुगकाले च मध्यमपाण्डवो भीमसेनोऽत्रैव तं मिलितवान्। अस्मद्देशे पुरातनविद्यानां संहतावेका निदानविद्यानाम नामकरणी विद्याऽऽसीत्। तदनुसारं किल स्वदेशसंबन्धिमहत्त्वपूर्णकथानां स्थायित्वसंपिपादयिषया तासां संबन्धः केनापि पर्वतशिखरेण नदीनाम्ना नक्षत्रनाम्ना वा विधीयमान आसीत्, येन लोकेषु यावदिमानि भौतिकानि प्रतीकानि तिष्ठेरंस्तावत्कथा अपि प्रचलन्त्विति।

हिमालयस्था तात्त्विकी तीर्थमाला तु बदरीकेदारखण्डे गङ्गायाः प्रस्रवणक्षेत्रमेव। प्रतीच्यां भागीरथीमारभ्य प्राच्यामलखनन्दापर्यन्तमयं प्रदेशः प्रसृतोऽस्ति। गङ्गोत्री, गोमुखः, त्रियुगीनारायणः, केदारनाथः, सत्यपथः (सतोपंथ), बदरीनाथः, द्रोणगिरिः,

नन्दादेवी, त्रिशूलश्चास्मिन्नेव प्रदेशे तिष्ठन्ति । जाह्नवी, भागीरथी, मन्दाकिनी, अलखनन्दा चेमानि चत्वारि हिमालयात्पृथक् पृथग्वहन्तीनां धाराणां नामानि सन्ति, यद्यपि संस्कृतसाहित्ये इमे प्रायः गङ्गायाः पर्यायरूपेणायान्ति । हिमालयस्य गङ्गाप्रस्रवणक्षेत्रे भौगोलिकगवेषणा भारतीयभौगोलिकविदुषां महान् दिग्विजयो मन्तव्यः । गङ्गा भारतस्य सर्वतः पुण्यतमा नदी विद्यते । संसारस्य क्वचिदन्यस्मिन् प्रदेशे भौगोलिकनामस्वीदृशी कोमलकान्तपदावलि-र्नोपलभ्यते, यादृशी संगतयोर्गङ्गाहिमवतोः प्रदेशोत्सङ्गे । एकेनाङ्गलविदुषा व्यलेखि यदिमानि नामानि भारतीयभूगोलशास्त्रिणां काव्यकलाया अद्भुतानि प्रतीकानि विलसन्ति । अर्वाचीन-भूगोलवेत्तारस्तु न केवलममून् प्रशंसन्ति, किन्तु स्पृहयन्त्यपि । विष्णुगङ्गा-विरहिगङ्गा-वसुगङ्गा-क्षीरगङ्गाप्रभृतयः शाखानद्योऽलखनन्दायां मिलन्ति । गङ्गाया उपरितनधाराणां संमेलनेन हिमालये पञ्च प्रयागा विलसन्ति । बदरीनाथपार्श्वादवतीर्णायाः सरस्वतीत्यपरनामधेयाया विष्णु-गङ्गायाः, द्रोणगिरेः पश्चिमप्रान्तादवतीर्णाया धवलगङ्गायाश्च जोशीमठसमीपे यः सङ्गमः स विष्णुप्रयागनाम्नाऽभिधीयते । विष्णुप्रयागानन्तरं वहन्त्यामलखनन्दायां नन्दाकनापर्वतादवती-र्णाया नन्दाकिन्याः सङ्गमो नन्दप्रयाग उच्यते । नन्दाकोटत्रिशूलशिखरयोः सलिलग्राहिण्याः पिण्डारगङ्गाया अलखनन्दायाश्च सङ्गमः कर्णप्रयागः कथ्यते । केदारनाथपार्श्वादवतीर्णा मन्दाकिनी यत्रालखनन्दया संगच्छति तत्स्थानं रुद्रप्रयागनाम्ना प्रथितम् । गङ्गोत्तरीतोऽवतीर्णा भागीरथी यत्रालखनन्दया मिलति तत्सङ्गमस्थानं देवप्रयागसंज्ञकं वर्तते । देवप्रयागानन्तरं सर्वसमवेता महाधारा गङ्गेत्याख्यां लभते । गङ्गोत्तरीतः किञ्चिदग्रे गोमुखहिमश्रथतो भागीरथी उद्गच्छति । संभवतस्ततः क्रोशपञ्चकपरिमिते दूरे गङ्गोत्तरीसमीपे भागीरथ्यामुत्तरभागत आग-त्यैका धारा संमिलति, या जाह्नवीति कथ्यते । जाह्नव्या उद्गमस्थानान्तिक एव जह्नुमुनेराश्रम आसीत् । देवप्रयागानन्तरं हृषीकेशकनखलपर्यन्तं गङ्गाया धारा पर्वत एव वहति । कनखले प्रथमवारमसौ गङ्गा शैलराजादवतीर्य समतलभूमौ प्रवहति । तदेवालक्ष्य कालिदासेन— "तस्माद् गच्छेरनुकनखलं शैलराजावतीर्णाम्" [पूर्वमे० ५०] इति वर्णितम् । गङ्गाया अन्तर्वेदिस्थानं मध्यदेशस्य हृदयं विद्यते ।

गङ्गा अस्मद्राष्ट्राय संस्कृतिं प्रदत्तवती । भारतीयसंस्कृतये गङ्गाया माहात्म्यमनुत्तरं वर्तते । मनुकाले मध्यदेशस्य सीमानो विनशनस्थानात् (यत्र हि सरस्वती सिकतास्वन्तर्लीयते) आरभ्य प्रयागपर्यन्तमासन् । किन्तु गुप्तकाले मध्यदेशस्य परिधिर्बिहारबङ्गालपर्यन्तं विस्तृतः

समजायत । कश्मीरोपलब्धसंस्कृतविनयपिटके कथेयमुल्लिखितोपलभ्यते— मध्यदेशस्यैको माणवको विद्याध्ययनार्थं दक्षिणापथमगमत् । कस्मिंश्चिदनध्यायदिवसे सहपाठिषु जिज्ञासोदतिष्ठत् कस्कः कस्मात्कस्माद्देशादागत इति । ततोऽसौ माणवकः प्रत्यवोचत्—अहं मध्यदेशादागतः । तच्छ्रुत्वा ते सर्वेऽप्यूचुः—"सर्वे देशा अस्माभिरवेक्षिताः श्रुताश्च, परं मध्यदेशो नावेक्षितः । भो माणवक, कीदृशो मध्यदेशः" इति । एवं सहपाठिभिः पृष्टेन तेन प्रत्युक्तम्—"मध्यदेशो भवन्तो देशानामग्रः, इक्षुशालिगोमहिषीसंपन्नः, भैक्षुकशतकलिलः, दस्युजनविवर्जितः, आर्यजनाकीर्णः, विद्वज्जननिषेवितः; यत्र नदी गङ्गा पुण्या मङ्गल्या शुचिशौचेयसंमता उभयतः कूलानि अभिच्छन्दमाना आवहति, अष्टावक्रो नाम ऋषीणामग्रपदः, यत्र ऋषयस्तपश्चर्यया सशरीरं स्वर्गं कामयमानाः" इति । गुप्तराज्ञां स्वर्णयुगे मध्यदेशस्यायमादर्शो देशे विदेशे च सर्वत्र सुविश्रुतः समजनि । भारतनिवासिनो विदेशेषु मध्यदेशीयाः कथ्यन्ते स्म । तिब्बते साम्प्रतमप्युत्तरापथनिवासिनः 'मधेशिया' (मध्यदेशीय) शब्देनोच्यन्ते । मध्यदेशे कुरुपञ्चालेषु काशीकोसलमहाजनपदेषु च भारतीयसंस्कृतेरितिहासस्य चानेकानि चित्राणि समुल्लसितानि । भौगोलिकदृष्ट्या स्मरणीयमिदं वर्तते यद् यस्य कोसलजनपदस्यायोध्या राजधान्यासीत्, तस्या विस्तार उत्तरस्यां दिशि हिमालयोपत्यकापर्यन्तमासीत् । कतिपयवर्षशतानि यावत् श्रावस्ती (सहेट महेट) तस्य राजधानी समजनि । श्रावस्तीपुर्या द्वितीयं नाम 'कुणाला' इत्यप्यासीत् । अयं कोसलजनपदो गुप्तसाम्राज्यसमय उत्तरकोसलनाम्ना व्यवह्रियमाण आसीत्, यतः प्रायस्तस्मिन्नेव समये मध्यप्रान्ते रत्नपुर-विलासपुर-रायपुरप्रदेशा दक्षिणकोसलनाम्ना प्रसिद्धिमापुः । दक्षिणकोसलमेव गत्वा कुशो राज्यमकार्षीत्, यदा चायोध्याया अधिष्ठातृदेवतयोध्वस्तामयोध्यां पुनर्वासयितुं स्वप्नेऽनुरोधः कृतस्तदा स सरयूतटनिविष्टामयोध्यापुरीं प्रतिनिवृत्त आसीत् ।

अद्यत्वे विहारनामधेयः प्रदेशः प्राङ् मगधनामाऽऽसीत् । गङ्गाया दक्षिणभागे मगधजनपदः, उत्तरभागे च विदेहजनपद आसीत् । विद्वद्भिरनुमीयते यद्वेदेषु यः कीकटः प्रमगन्दश्चाख्यातः, स मगध एवासीत् । अत्रैव चादिवासिमानवानां वसतय आसन्, येषामार्यैः साकं सम्पर्कः समजनि । अद्यत्वेऽपि गङ्गाया दक्षिणभागे महान् भूभाग आदिवासिमानवानां प्रदेशोऽस्ति, योऽधुना छोटानागपुरपदेन झारखण्डपदेन च व्यपदिश्यते । अत्र संथालजातीयाः सर्वतो मुख्याः सन्ति, येषां परिचयो महाभारतोक्तशाणवत्यजनैः क्रियते ।

अत्र ते कीर्तयिष्यामि वर्षं भारत भारतम्

शतपथब्राह्मणोक्तदिशा पूर्वस्यां दिश्यार्यप्रदेशस्य सीमा कस्मिंश्चित्समये सदानीरानदीपर्यन्तमासीत्। संभवतः सैव नदी इरावतीनाम्ना प्रसिद्धिं प्राप्तवती, इरावती सदानीरेति नामसाम्यात्। विदेघमाथवो याज्ञिकमग्निं सदानीरापारीणप्रदेशमनैषीदित्यैतिहासिकैराख्यायते। अवश्यमेवायं संकेतः प्राच्यदेश आर्याणां सांस्कृतिकप्रसारं सूचयति। मिथिलायां जनकवंशः परमप्रसिद्ध आसीत्। तस्मिन् राजकुलेऽध्यात्मदर्शनयोर्महती चर्चा भूयानादरश्चासीत्। उपनिषत्सु जनकयाज्ञवल्क्ययोः संवादो जनकस्य बहुदक्षिणयज्ञे कुरुपञ्चालपर्यन्तजनपदवासिभिर्विद्वद्भिः समवेत्योक्तचर्चायां भागग्रहणं चोल्लिखितम्। विदेहमगधप्रदेशौ भारतीयेतिहासे कारणद्वयेन महत्वपूर्णौ समजायेताम्। विदेहजनपदस्य महत्त्वमत्रत्यगणराज्यैरासीत्, येषु वैशाल्या लिच्छवयोऽतिसमृद्धाः शक्तिशालिनश्चासन्। तेषां गणराज्यकार्यप्रणाल्याः सविस्तरोल्लेखो बौद्धसाहित्ये लभ्यते। महाभारते तत् पारमेष्ठ्यशासनं कथितम्। अस्यां पद्धतौ प्रत्येकं कुलं शासनस्य न्यूनतममङ्गं बभूव। कुलप्रतिनिधयो गणसभायामुपतिष्ठन्ते स्म। तेषु च प्रत्येकं राजेत्युपाधिं धत्ते स्म। यथासमयममी स्वयं गणपतिं निर्वाचयन्ति स्म। यो हि श्रेष्ठ इति कथ्यते स्म। जैनधर्मप्रवर्तको भगवान् महावीरोऽपि वैशालीसंघस्य ज्ञातृक्षत्रियाख्यायां शाखायां समुत्पन्नः। व्याकरणशास्त्रेऽयं वृजजनपद इति कथितः। वैशाल्या लिच्छवीनारभ्य कपिलवस्तोः शाक्यान् यावदनेकानि लघुविस्ताराणि गणराज्यान्यासन्। एतद्विपरीतं गङ्गाया दक्षिणभागे साम्राज्यशासनप्रणाली प्रधानतयाऽऽसीत्। सभापर्वणि जरासन्धवृत्तमाचक्षाणेन श्रीकृष्णेन—"सम्राट्शब्दो हि कृत्स्नभाक्" इत्यभ्यधायि। साम्राज्यपद्धतिरात्मनि सर्वमन्तर्भाव्य तिष्ठतीति तदर्थः। तत्रेदमपि प्रतिपादितं यद् गणराज्यप्रणाल्यां (पारमेष्ठ्यपद्धतौ) व्यक्तेर्व्यक्तेर्गौरवं जायते, जनपदे च सर्वत्र ग्रामे ग्रामे समृद्धिः समुपलभ्यते। परन्तु साम्राज्यप्रणाल्यां सर्वं वैभवं संभूय राजकुलमभित उपसंहृतं भवति। व्यक्तीनां गौरवमपि साम्राज्यसंबन्धनिबन्धनमेवाङ्गीक्रियते। मगधदेशे बृहद्रथवंशे शिशुनागवंशे नन्दवंशे च साम्राज्यप्रणाल्या उत्तरोत्तरमियती वृद्धिरजनि, यया नन्दवंशस्यान्तिमेन राज्ञाऽनेके जनपदा विजित्य स्वसाम्राज्ये निवेशिताः। ततः परं मौर्यसाम्राज्यमुदगात्, येनोदीच्यानि गणराज्यानि प्रतिहततेजांसि हृतैश्वर्याणि चाक्रियन्त। समयानुसारं कम्बोज-कपिशाप्रदेशाभ्यामारभ्य बङ्गकलिङ्गपर्यन्तः, एवं सुराष्ट्रमारभ्य दक्षिणदिशि मसूरपर्यन्तः समग्रो भूप्रदेशो मौर्यसाम्राज्यान्तर्गत आपतितः। तस्मिन् युगे देशस्य दूरवर्तिभागानप्येकशासनसूत्रेण संमेल-

यितुं स्थलपथस्य, व्यापारस्य, आन्तरिकशासनस्य, सुव्यवस्थायाः, कलायाः, साहित्यस्य चोन्नतिः संजाता। इदं कल्पयितुमुचितं प्रतिभाति यन्मगधसाम्राज्यस्थापनया भारतीयेतिहासस्य नियतः प्रगतिप्रकारः संपादितः।

साम्राज्योत्थानातिरिक्तं विदेहमगधयोः प्राचीनायां भूमौ भारतस्य धार्मिकसांस्कृतिकान्दोलनयोरपि प्रगतिरासीत्। जैनबौद्धधर्मयोर्विहारभूमिरयमेव प्रदेश आसीत्। ईशवीयवर्षतः प्राक् पञ्चमीं शताब्दीमारभ्य द्वादश्याः शताब्द्या अन्तं यावन्मगधप्रदेशे बौद्धधर्मो विविधप्रकारैर्विकसन् प्रवृत्त आसीत्। गङ्गाया दक्षिणभागे गयासन्निधौ बौद्धगयानाम्नि स्थाने बौद्धधर्मप्रकाशः प्रादुर्बभूव। तस्यान्तिमं ज्योतिर्नालन्दाविश्वविद्यालयरूपेण द्वादशीं शताब्दीं यावद् दृश्यमासीत्। अस्य प्रदेशस्य 'बिहार' इति नाम बौद्धधर्मस्यैवेतिहासादुद्भूतम्।

भौगोलिकदृष्ट्या यत्रोत्तरतोऽवतीर्णा कौशिकी (कोसी) नदी गङ्गया सममिलत्, तत्समीपस्थः प्रदेशः 'अङ्ग' जनपदनाम्ना प्रथित आसीत्। तस्य राजधानी चम्पाऽऽसीत्। गङ्गायास्तटे वर्तमानं भागलपुरं तस्यैवाधुनिकं नाम वर्तते। बिहारप्रदेशस्य प्रधाननदी कौशिकी नेपालादुद्गच्छति, यत्रास्याः कियत्यो धाराः सप्तकौशिकीति नाम्ना व्यपदिश्यन्ते। कौशिक्या मिलन्त्यौ अरुणा ताम्रा चेति द्वे सहायकनद्यौ प्राचीनभारतीयभूगोले परमप्रसिद्धे आस्ताम्। कौशिक्या सह ताम्रारुणयोः संगमो महाभारतस्य तीर्थयात्रापर्वण्युल्लिखितः। तत्रैव प्राचीनः कोकामुखतीर्थोऽपि वर्णितः। अरुणानदी महाहिमवतो गौरीशङ्करशिखरस्य सलिलमादाय ततः प्रादुर्भवति। इमानि भौगोलिकनामानि तीर्थाश्चार्यसन्निवेशं स्मारयन्ति, सूचयन्ति च यत् केन प्रकारेण तीर्थान् विरचय्य तद्भूमीनां देवभूमित्वं संपादितम्।

गङ्गाया दक्षिणेऽङ्गजनपदस्य दक्षिणपूर्वस्यां दिशि वर्धमानो मार्गो गङ्गासागरसङ्गमावधिक आसीत्। अस्मिन् प्रदेशे कियतां स्थानानां नामान्युल्लेखनीयानि सन्ति। यदिदानीं 'वीरभूम' इत्युच्यते, तस्य प्राचीनं नाम वज्रभूमिरासीत्, प्राकृते च वयरभूमिशब्देनोच्यते। गङ्गासागरसमीपवर्ति ताम्रलिप्ति (तामलुक) नामकं स्थानं प्रसिद्धं 'समुद्रपत्तनमासीत्, यतो यानपात्राणि प्रवहणानि च द्वीपान्तरं (हिन्देशिया) गच्छन्ति स्म। ताम्र-

१. प्राचीनसंस्कृतसाहित्ये समुद्रपत्तन-जलपत्तन-तटपत्तन-पोतपत्तनेति शब्दाः समानार्थकाः सन्ति।

लिप्तिः सुह्मजनपदस्य राजधान्यासीत् । सुह्मजनपदवासिभिर्जनैः रघोः समक्षं वैतसीं वृत्तिं बिभ्रद्भिः (विनैव संग्रामं तदधीनतामात्मनः स्वीकुर्वद्भिः) स्वरक्षणमकारीति रघुवंशकाव्ये वर्णितम् । सुह्मस्योत्तरस्यां दिशि पश्चिमबङ्गप्रदेशस्य प्राचीनं नाम 'राढ़ा' इति, प्राकृते च 'लाढ़ाभूमि' इत्यासीत् । गङ्गाया वामतटे पूर्वभागे गौड़नगरमासीत् । संभवत इदमेव पाणिनिना गौड़पुरमित्यलेखि । उत्तरबङ्गजनपदस्य प्राचीनं नाम पुण्ड्रदेशः पुण्ड्रभूमिर्वाऽऽसीत् । गुप्तकालिकलेखैस्तस्य 'पुण्ड्रवर्धनभुक्ति'[1]रित्यपि नामधेयं ज्ञायते । तस्य राजधानी महास्थाननामकं (बोगरामण्डलवर्ती महास्थानगढ़) नगरमासीत् । पाणिनिना प्राच्यप्रदेशेषु यन्महानगरमुल्लिखितं तदिदमेवेति प्रतीयते । अस्माभिरद्यत्वे मालदापदेन व्यपदिश्यमानो जनपदो 'मलदाः' इति प्राचीननामधेयो जनपदसूच्यामुल्लिखितो दृश्यते । पूर्वदक्षिणबङ्ग-जनपदस्य समुद्रतटसंगतो वारिशालप्रदेशो वारिषनाम्ना व्यवह्रियमाण आसीत् । सभापर्वणि "वारिषेणसमुद्रान्ते" इत्याद्ये पद्ये स उल्लिखितोऽस्ति ।

प्राग्ज्योतिषं कामरूपं च भारतस्य प्राच्यः प्रदेशः, यो ब्रह्मपुत्रनदस्य पारावारयो-र्विस्तृतस्तिष्ठति । लोहित्यनाम्नी ब्रह्मपुत्रस्य शाखानदी पूर्वत आगत्य तेन मिलति । उभयोः संगमस्थाने वर्तमानं 'सदिया' नगरमस्ति, यस्य संवेद्येति प्राचीनं नामासीत् । अस्योल्लेखो महाभारतस्य तीर्थयात्राप्रकरणे (वनपर्वणि) वर्तते । ब्रह्मपुत्रस्य वामतटे श्रीहट्ट (सिलहट) नामकं नगरं वर्तते, यत्र कामाक्षादेव्याः प्रसिद्धं मन्दिरमतिसुन्दरं विलसति । प्राग्देश-प्रथिताया मातृपूजाया इदमतिप्रसिद्धं केन्द्रमासीत् । ब्रह्मपुत्रस्य दक्षिणभागे सूरमानदीद्रोणी वर्तते, यस्याः प्राचीनं सूरमसिति नाम पाणिनिनाऽष्टाध्याय्यामुल्लिखितम् । कामरूपस्य 'असमिया' भाषाऽऽर्यभाषापरिवारसमुत्पन्ना । भारतीयेतिहासे कामरूपस्यानेकवारं मध्यदेशेन साकं राजनैतिकः संबन्ध आसीत् । बाणभट्टेन हर्षचरिते श्रीहर्षस्य सुहृदः कुमारभास्कर-वर्मणो विस्तरेणोल्लेखो विहितः, यस्तदानीं कामरूपस्य शासक आसीत् । कामरूपस्यैव प्रदेश एको मणिपुरमासीत् , यत्र राजकन्यकया उलूप्या सह अर्जुनस्य वैवाहिकं कथानक-मुपाख्यायते । अद्यत्वेऽपि तत्रत्यै राज्यवंशीयैः स्ववंशपरम्परासंबन्धोऽर्जुनपुत्रेण बभ्रुवाह-नेन साकमभिधीयते ।

---

१. गुप्तकाले प्रान्तस्य प्रदेशस्य वा भुक्तिरिति संज्ञाऽऽसीत् ।

कामरूपस्य पूर्वभागे ब्रह्मदेशो विद्योतते, यस्य सुवर्णभूमिरिति प्राचीनं नामासीत्। तत्रत्याया इरावदीनद्या इरावतीति संस्कृतिकं नाम स्फुटमवभासते। ब्रह्मदेशे बौद्धधर्मस्य महान् प्रभावः प्रसृतः, तेनापि तत्र भारतीयसंस्कृत्या समं सदैव विनिमयः प्रवर्तते स्म। उत्तर-ब्रह्मजनपदस्य पगाननाम्न्या राजधान्या अरिमर्दनपुरमिति, मध्यब्रह्मप्रदेशस्य 'प्रोम'-राजधान्याः प्राचीनं नाम श्रीक्षेत्रमिति, दक्षिणब्रह्मप्रदेशस्य 'पीगू'-राजधान्या हंसवतीति प्राचीनं नामासीत्। ततोऽपि नीचैस्तनस्य थेटननगरस्य सुधम्मवतीति प्राचीनं नामासीत्। ब्रह्मदेश-कलिङ्गदेशयोर्मध्ये भारतीयसमुद्रस्य स भागो विद्यते, योऽद्यत्वे 'बङ्गाल की खाड़ी' इति नाम्ना कथ्यते। तस्य महोदधिरिति प्राचीनं नामधेयमासीत्। "प्राप तालीवनश्याममुपकण्ठं महोदधेः" [रघु० ४।३४] इत्यस्मिन् श्लोके कालिदासेन तत्प्राचीनं नामोल्लिखितम्।

बङ्गदेशतः समुद्रतटप्रदेशेन कलिङ्गजनपदस्य मार्गो निर्गत आसीत्। कलिङ्गजनपदे वैतरणी-ब्राह्मणी-महानदी-ऋषिकुल्येतीमाश्चतस्रः प्रधाननद्योऽद्यावधिः स्वप्राचीननामभिर्विश्रुताः सन्ति। वैतरण्या दक्षिणतटे विरजास्तीर्थोऽस्ति, यो जाजपुरनाम्नाऽप्युच्यते। अत्र प्रजापतिना महान् यज्ञः कृत आसीत्। महानदीसमुद्रसंगमे प्रसिद्धं पुरुषोत्तमक्षेत्रं वर्तते, यद् जगन्नाथपुरीत्यपि कथ्यते। तत्समीप एकाम्रक्षेत्रनामधेयः परमप्रसिद्धस्तीर्थ आसीत्, यस्योल्लेखो महाभारते पुराणेषु चोपलभ्यते। स चाद्यत्वे भुवनेश्वरनाम्ना व्यपदिश्यते। भुवनेश्वरस्य किञ्चिद् दूरे समुद्रतटे कोणादित्यक्षेत्रमासीत्; यदिदानीं कोणार्कपदेन व्यवह्रियते। अत्र त्रयोदश्यां शताब्द्यां सूर्यस्य मन्दिरमेकमतिविशालं निर्मितं यत्सूर्यरथसमानाकारं विद्यते। भारतवर्षे प्रासादनिर्माणशिल्पस्य न मनोहरमीदृशमन्यदुदाहरणं वर्तते। ऋषिकुल्या नदी यत्र समुद्रे मिलति, तत्र कलिङ्गपत्तनं नाम प्राचीना राजधान्यासीत्; यतो यातायातार्थं समुद्रपथस्यैको भागस्ताम्रलिप्तिपर्यन्तम्, अन्यो भागः सिंहलपर्यन्तम्, संमुखभागः स्वर्णभूमिब्रह्मप्रदेशपर्यन्तम्, दक्षिणपूर्वभागः सुवर्णद्वीप(सुमात्रा)-यवद्वीप(जावा)पर्यन्तं गच्छति। कलिङ्गवासिभिर्द्वीपान्तरं गत्वा स्वोपनिवेशा उपनिवेशिताः, अतोऽद्यत्वेऽपि तन्निवासिन आत्मानं 'क्लिंग' इति कथयन्ति। कलिङ्गजनपदो यद्यपि मध्यदेशादतिदूरे वर्तते तथापि तस्यैतिहासिकं सांस्कृतिकं च महत्त्वमत्यधिकमासीत्। पतञ्जलिना महाभाष्ये कलिङ्गखण्डकप्रदेशयोरुल्लेखः कृतः। खण्डिकाख्यः कलिङ्गजनपदस्यैवैको भाग आसीत्, योऽधुना खण्डगिरिराख्यायते। यदा मगधदेशे नन्दनृपतिभिः स्वं साम्राज्यं स्थापितं तदापि कलिङ्गजन-

पदस्य स्वातन्त्र्यमक्षुण्णमासीत् । अत एव भारते द्रव्यतोलनार्थं मानद्वयं प्रथितम्—मगधमानं कलिङ्गमानं च, यदायुर्वेदग्रन्थेषूल्लिखितमुपलभ्यते । कलिङ्गनिवासिनो जना निजस्वातन्त्र्यस्य भृशमभिमानं प्राणपणेन रक्षां च कुर्वन्ति स्म । मौर्यसम्राजा अशोकेन यदा कलिङ्गजनपद आक्रान्तस्तदा तन्निवासिभिरात्मनः स्वातन्त्र्यं रक्षितुं तेन सार्धं महद् युद्धं कृतम् । तत्कलिङ्ग-युद्धमेवाशोकजीवने महतस्तस्य परिवर्तनस्य कारणमभूत् , यस्य प्रभावो विश्वस्येतिहासोपरि संजातः । युद्धे हताहतानां दुःखौघेन व्यथितहृदयो भूत्वाऽशोको युद्धादुपारमत् , युद्धस्य भेरीघोषस्य स्थाने तेन धर्मघोषनीतिरङ्गीकृता, भारतस्यानेकेषु प्रतिवेशिदेशेषु बौद्धधर्मश्च प्रवर्तितः ।

कलिङ्गजनपदस्योत्तरो भागः, यत्र विरजाक्षेत्रम् , पुरुषक्षेत्रम् , एकाम्रक्षेत्रं चास्ति; स उत्कलनाम्ना औड्रनाम्ना च प्रथितः। उत्तरकलिङ्गशब्दस्य उत्कलिङ्गशब्दस्य वा उत्कलेति संक्षिप्तं रूपम् । कालिदासेन उत्कलकलिङ्गदेशयोः पृथगुल्लेखः कृतः—"उत्कलादर्शित-पथः कलिङ्गाभिमुखो ययौ" [४।३८] इत्यत्र । वर्तमान 'महेन्द्रमलै'-नामधेयो महेन्द्रपर्वतः कलिङ्गस्य दक्षिणभागे प्रसिद्धः पर्वत आसीत्,यतः कलिङ्गराजो महेन्द्राधिपतिपदेन महेन्द्रनाथ-पदेन वा व्यपदिश्यते स्म । महेन्द्रगिरेर्दक्षिणभाग आन्ध्रदेश आसीत् , यो गोदावरीकृष्णा-नदीमुखमध्यवर्ती परमोर्वरः प्रदेश आसीत् । तन्निवासिनोऽत्यन्तसाहसिनो व्यापारप्रवीणाश्चा-सन् । कदाचन आन्ध्रसातवाहनानां राज्यं सह्याद्रिमारभ्य महेन्द्रगिरिं यावद्विस्तृतमासीत् । पश्चिमे नासिकमारभ्य पूर्वत्रामरावतीनागार्जुनीकोण्डापर्यन्तः प्रदेशः सातवाहनसाम्राज्या-न्तर्गतो मन्यते स्म ।

भारतस्य मध्यभागे चतस्रो महानद्यो विद्यन्ते । नर्मदा ताप्ती च पश्चिमाभिमुखं वहतः । तयोर्दक्षिणभागे च गोदावरी कृष्णा च पूर्वाभिमुखं वहन्त्यौ महोदधौ मिलतः । नर्मदोत्तरवर्ती अवन्तिजनपदोऽत्यन्तं महत्त्वपूर्ण आसीत् । उत्तरापथदक्षिणापथमार्गे उज्जयिनी अतिमहती नगर्यासीत् । अग्रेत्वे स प्रदेशो मालवनाम्ना प्रसिध्यति । अस्य प्रदेशस्येदं नाम गुप्तकाला-देव प्रावृतत् । मालववंश्याः क्षत्रियाः कदाचन दक्षिणपश्चिमपञ्चनदप्रदेशे इरावती-चन्द्रभागा (रावी चिनाव) सङ्गमसमीपमध्यवात्सुः । ततस्त उत्तरराजस्थानमागत्य जयपुराभि-मुखं प्रस्थिताः । पुनः कोटाभिमुखं गच्छन्तोऽन्ते वर्तमानमालवाप्रदेशमध्यवात्सुः । तदा-रभ्यैव प्रदेशोऽसौ मालवाख्योऽभूत् । अवन्तिजनपदात्प्राग् वेत्रवत्यास्तटे विदिशानाम्नी दशार्ण-

देशस्य प्रसिद्धा राजधान्यासीत् । या कालिदासेन मेघदूते—"तेषां दिक्षु प्रथितविदिशालक्षणां राजधानीम्" [पूर्वमे० २४] इत्थमुदलेखि । वेत्रवत्याः पूर्वं शोणनदीतः पश्चिमं च गहनं वनं विन्ध्याटवी कथ्यते स्म । तत्रैव लघूनि लघून्यनेकराज्यान्याटविकराज्यशब्देनोच्यन्ते स्म । बाणेन हर्षचरिते कादम्बर्यां च विन्ध्याटवी यथादृष्टं वर्णिता । कालिदासकाले नर्मदातटवर्ती प्रदेशोऽनूपदेशपदेन व्यपदिश्यते स्म, यस्य माहिष्मती (मेडाघाट) राजधान्यासीत् । पश्चादयमेव प्रदेशश्चेदिजनपदनाम्ना प्रसिद्धोऽभूत् ।

नर्मदाया दक्षिणभागे संभवतस्तत्समानान्तरं वहन्ती तपती(ताप्ती)नाम्नी पयोष्णीनाम्नी वा नदी वर्तते, या शुक्तिमतः पर्वतान्निर्गच्छति । नर्मदा-पयोष्णीमुखभाग उत्तरदक्षिणभागे च विस्तृतोऽग्रत्वे गुजरातनाम्ना प्रसिद्धो लाटदेश आसीत् । समुद्रतटवर्ती देशोऽयमतिप्राचीनसमये पिप्पलीकच्छनाम्नापि व्यवह्रियमाण आसीत् । नर्मदाया मुखस्थाने भरुकच्छनामधेयं भृगुकच्छनामधेयं वा समुद्रपत्तनमासीत्, यतः पश्चिमाभिमुखं गन्तुकामानां प्रवहणानां यात्रा प्रवर्तते स्म ।

उत्तरापथस्य गङ्गेव पावनीभूता दक्षिणदेशे गोदावरी वर्तते । सा नासिकसमीपवर्तिनस्त्र्यम्बकेश्वरस्थानान्निर्गच्छति । सा तस्मिन् भागे गौतमीत्यभिधीयते । नासिकस्य पश्चिमोत्तरप्रदेशस्त्रिकूटकपदेन प्रथित आसीत् । कालिदासेन रघुवंशेऽस्यैव त्रिकूटपर्वतस्योल्लेखः कृतः—


मत्तेभरदनोत्कीर्णव्यक्तविक्रमलक्षणम् ।
त्रिकूटमेव तत्रोच्चैर्जयस्तम्भं चकार सः ॥ [रघु० ४।५९] इति ।

गोदावर्या उत्तरस्यां दक्षिणस्यां च दिशि जनपदचतुष्टयं विशिष्योल्लेखनीयं वर्तते । उत्तरपश्चिमभागे ऋषिकदेशः (खानदेशः), उत्तरपूर्वभागे विदर्भदेशः (बरार), दक्षिणभागेऽश्मकदेशः (औरङ्गाबाद), दक्षिणपश्चिमभागे च मूलकदेशो (अहमदनगर) वर्तते । उत्तरस्या दिशः कतिपयमहत्त्वपूर्णा नद्य आगत्य गोदावर्यां मिलिताः । पश्चिमतः पेनगङ्गा (प्रवेणया) उत्तरतो वेनगङ्गा (वेणया) च परस्परं गच्छतः । तयोः प्रणिहितानाम्नी संयुक्तधारा गोदावर्यां मिलिता । विदर्भस्य वरदानदी प्रवेणया शाखानदी । वरदाप्रवेणयोर्मध्यवर्ती प्रदेशो विदर्भः । वेणयायाः पूर्वत्र दक्षिणकोसलजनपद आसीत् ।


प्रणिहिता-गोदावरीसंगमोत्तरमिन्द्रवती-शबर्याख्ये नद्यावुत्तरत आगत्य गोदावर्यां मिलतः। नदीद्वयमिदमद्यत्वेऽपि स्वप्राचीननाम्नैव व्यवह्रियते। शबरीनद्या गहनेषु विपिनेषु शबरजातीयानां निवास आसीत्। गोदावरीदक्षिणभागे कृष्णानदी सह्याद्रेर्निर्गत्य पूर्वाभिमुखं प्रवहति। कृष्णातटवर्ती प्रदेशः कुन्तलनाम्ना व्यवह्रियते स्म। सह्याद्रिसमुद्रमध्यवर्तिनी समभूमिरपरान्तनाम्ना प्रसिद्धा, सैवाद्यत्वे 'कोङ्कण' इत्युच्यते। कृष्णायामुत्तरतो भीमरथी (भीमा) नदी, दक्षिणतश्च तुङ्गभद्राऽऽगत्य मिलिता। तुङ्गाभद्रानाम्न्योर्लघुनद्योः संयुक्तधारा तुङ्गभद्रा। तयोर्मध्ये प्राचीना वैजयन्ती नाम नगर्यासीत्, याऽद्यत्वे वनवासीत्युच्यते। सुदूरदक्षिणवर्तिनदीषु पिनाकिनी, कावेरी, ताम्रपर्णी च प्रधाना वर्तन्ते। पिनाकिन्या उत्तरत्र कदाचनेतिहासविश्रुतपल्लवानां राज्यमासीत्, येषां राजधानी काञ्ची आसीत्। अवन्तिसुन्दरीकथायां दण्डिना, जानकीहरणे कुमारदासेन च काञ्च्या विशिष्योल्लेखः कृतः। कावेरीपिनाकिन्योर्मध्ये चोलजनपद आसीत्। कावेर्या दक्षिणतट उरगपुरनाम्नी प्राचीनपाण्ड्यजनपदराजधान्यासीत्, या रघुवंशे कालिदासेनोदलेखि—"अथोरगाख्यस्य पुरस्य नाथम्" [६।५९] इति। पाण्ड्यदेश एव सेतुबन्धरामेश्वरतीर्थोऽस्ति, यतः समुद्रयात्रिकाः सिंहलं गच्छन्ति। पाण्ड्यदेश एव मलयगिरिरस्ति, यत्र चन्दनद्रुमाः प्ररोहन्ति। भारतीयसाहित्ये मलयगिरिरतीव प्रसिद्धोऽस्ति। मलयगिरेः पश्चिमभागे केरलदेश आसीत्, योऽद्यत्वे 'मलैबार-कोचीन-त्रावणकोर' इति नामत्रयेण परिचीयते। केरलदेशस्यैव सर्वतो दक्षिणसीमायां कन्याकुमारी वर्तते, यत्र समुद्रतटे शिवं पतिमाप्तुं तपस्तपस्यन्त्याः कुमार्याः पार्वत्या अतिरमणीयं मन्दिरं राजते।

भारतस्य दक्षिणे भागे मातृभूम्या मिलितो लङ्काद्वीपो विद्यते, यः सिंहलद्वीपनाम्ना आम्रद्वीपनाम्ना च प्रसिद्धः।

भारतीयप्रायद्वीपस्य पार्श्वत्रयं गभीरः महासमुद्रः परिवेष्टयति। कदाचन भारतीया वस्तुतः स्वसमुद्राधिपतय आसन्। महाकविः कालिदासो मातृभूमेर्विलक्षणकल्पनां करोति यद् दक्षिणा दिग् नायिका समुद्रश्च तन्मेखलेति—"रत्नानुविद्धार्णवमेखलाया दिशः सपत्नी भव दक्षिणस्याः" [रघु० ६।६३]। वस्तुत आन्ध्रसातवाहनसमयाद् भारतस्य सामुद्रिकव्यापारोऽत्यन्तमवर्धिष्ट। व्यापारेण सह विदेशेषु भारतीयानां संस्कृति-धर्म-भाषा-कलानामपि प्रचारः समजनि। फलतः सिंहलद्वीप-इन्द्रद्वीप (अण्डमन)-नग्नद्वीप (नक्कवरम्-निकोबार)-



सतलज
गंगोत्री
गोमुख
नीती द्वार
नीती
बदरीनाथ
केदार - बदरी खंड
टिहरी
देहरादून
देवप्रयाग
हरिद्वार
कैलास - मानस
मानसरोवर
मांधाता
बदरी केदार खंड



चीन
द्वारावती (स्याम)
कम्बुज
इन्द्रद्युम्न द्वीप
नागद्वीप
कटाह द्वीप
केडा
मलय द्वीप
सुवर्ण द्वीप
सिंहपुर
(सिंगापुर)
श्री विजय
यव द्वीप
बलिद्वीप
वारुण द्वीप
बोरनियो
भारतवर्ष के द्वीपान्तर

मलयद्वीप (मलाया)-यवद्वीप (जावा)-सुवर्णद्वीप (सुमात्रा)-बलिद्वीप (बाली)-कटाहद्वीप-(मलयोत्तरवर्ति केडानामकं स्थानम्)-प्रभृतिद्वीपेषु भारतीयसंस्कृतेः, संस्कृतभाषायाः, बौद्धधर्मस्य, हिन्दूधर्मस्य च प्रचारो बभूव; यस्य पुरातत्त्वान्वेषणप्रणाल्योत्खननेन मन्दिर-मूर्त्तिशिलालेखात्मकानि प्रमाणशतान्युपलब्धानि । गुप्तकाले भारतस्यायं सांस्कृतिकः प्रचारो धर्मविजयनाम्ना व्यवहृत आसीत् । अनेन धर्मविजयेन तेषां द्वीपानां भारतेन सहेदृशी एकरूपता जाता यद्भारतशब्दस्य भौगोलिकोऽर्थं एव परिवर्तितः । तेषां द्वीपानामपि भारतवर्षे एवान्तर्भावः सर्वैरङ्गीकृतः । पुराणेष्वियं स्थितिः स्पष्टशब्दैरुल्लिखिता—

भारतस्यास्य वर्षस्य नव भेदान्निबोधत ।
समुद्रान्तरिता ज्ञेयास्ते त्वगम्याः परस्परम् ॥
इन्द्रद्वीपः कसेरुश्च ताम्रपर्णी गभस्तिमान् ।
नागद्वीपस्तथा सौम्यो गन्धर्वस्त्वथ वारुणः॥
अयं तु नवमस्तेषां द्वीपः सागरसंवृतः ।

[मत्स्य० ११४।७–९ ; वायु०१।४५।७८–८० ; मार्कण्डेय० ५७।६–७]

एषु स्पष्टमभिहितं यद् भारतस्य नवानां द्वीपानां समुद्रव्यवहितत्वात्परस्परमगम्यताऽऽसीत् । अस्य भौगोलिकतथ्यस्य लेखको भारत एवोपविश्य लिखन्नासीत्, अत एवैतद्देश-परामर्शकः 'अयम्' इति शब्दोऽत्र प्रयुक्तः ।

राजशेखरेण काव्यमीमांसायामिमानेव श्लोकानुद्धरता नवमद्वीपस्य कुमारीद्वीपनामकत्वं स्पष्टमुल्लिखितम् । तेन परिज्ञायते यद् गुप्तकाले स्वयं भारतदेशः कुमारीद्वीपनाम्ना प्रसिद्ध आसीत्, भारतशब्दश्च बृहत्तरभारतेऽर्थे प्रयुक्तोऽभूत् । "अद्य श्रीमद्भगवतो महापुरुषस्य विष्णोराज्ञया प्रवर्तमानस्य श्रीब्रह्मणोऽह्नि द्वितीयप्रहरार्धे श्रीश्वेतवाराहकल्पे वैवस्वतमन्वन्तरेऽष्टाविंशतितमे कलियुगे कलिप्रथमचरणे जम्बुद्वीपे भारतखण्डे भारते वर्षे कुमारिकाखण्डे आर्यावर्तैकदेशे........" अस्मिन् प्राचीनसंकल्पवाक्ये प्रथमः पाठः—"जम्बुद्वीपे भरतखण्डे" एतावत्पर्यन्त आसीत् । एष च पाठः प्राचीनभारतीयभूगोलस्य परिचायको वर्तते । अस्मिन् भूगोले हरिवर्षमिलावृतवर्षं केतुमालवर्षं भारतवर्षं चेति वर्षचतुष्टयं जम्बुद्वीपशब्देनोच्यते । अस्य जम्बुद्वीपस्य दक्षिणो भागो भारतवर्षमासीत् । संभवतो गुप्तकाले भारतवर्षशब्दस्य प्राचीनोऽर्थं उक्तनवद्वीपान्तर्भावेण यदा विस्तृतो बभूव तदा तस्मिन् संकल्पवाक्ये

सारस्वती सुषमा

''भारतवर्षे कुमारिकाखण्डे'' इत्येतत्पदद्वयं संयोजितम् । अस्मिन् संकल्पवाक्ये प्राचीननवीनावुभावपि पाठौ वाढं संरक्षितौ तिष्ठतः । स्कन्दपुराणस्य महेश्वरखण्डस्य कुमारिकाखण्डेऽपि देशोऽयं कुमारिकाखण्डशब्देनाभ्यधायि ।

इत्थं प्राचीनसंस्कृतसाहित्ये भारतीयभूगोलस्यापरिमिता सामग्री वर्तते । भारतीयानां जनपदानां पर्वतानां नदीनां प्रदेशानां नगराणां च तात्कालिकसाहित्योपलभ्यमानसूक्ष्मपरिचयानां नूतनदृष्ट्या दर्शनेनास्माकं ज्ञानवृद्धिर्जायते, प्राचीनतत्त्वान्वेषकाणां भूगोलस्य सूक्ष्मं परिचयं परिज्ञायाश्चर्यं चोत्पद्यते । अस्या भौगोलिकसामग्र्या ज्ञानं संस्कृतस्याध्येतॄणामध्यापकानां च विदुषां भवितुमुचितम् । एतदर्थं प्राचीनसंस्कृतसाहित्यस्य भौगोलिकसामग्र्याः समुचितप्रकारेणाध्यापनमावश्यकम् । नवीनभौगोलिकग्रन्थैः सह प्राचीनभुवनकोश-काव्य-स्थलमाहात्म्यतीर्थयात्राप्रकरण-शिलालेखादिषूल्लिखितानां स्थाननाम्नामध्ययने संस्कृतविद्वांसः प्रवर्तनीयाः, येन तेषां स्वसाहित्ये नवीना निष्ठा, संस्कृतसाहित्यार्थस्य सम्यगधिगमाय नूतना शक्तिश्चोदियात् । भूगोलमतिशय्य वास्तविकस्थितिपरिचायकमन्यच्छास्त्रं नास्तीत्यर्वाचीना विद्वांसो मन्यन्ते । भौगोलिकानां नाम्नां सङ्केतानां च परिचयेन सह कालिदासबाणभट्टप्रभृतीनां काव्यानां ग्रन्थानां चाध्ययने तत्तद्वर्णनावगमे महती सुविधा भविष्यति । रघुदिग्विजये ताम्रपर्णीमारभ्य वंक्षु-(ओक्सस) पर्यन्तानां नदीनाम्, कामरूपमारभ्य पारसीकपर्यन्तानां देशानां च यानि नामानि कविनोल्लिखितानि, तेषां ज्ञानं विना कवेर्वास्तविकाऽऽशयोऽतीव दुर्बोधो भवति । एषु वर्णनेषु गुप्तसम्राजां महतो देशविजयस्य प्रतिध्वनिस्तत्तद्भौगोलिकनाम्नां यथार्थपरिचयं विना ज्ञातुमशक्यः । वराहमिहिरराजशेखरप्रभृतिभिः कतिपयपुराणलेखकैश्च स्वग्रन्थेषु या विविधा भौगोलिकसामग्री समापूरिता सा नूतनभौगोलिकव्याख्यया सह स्वदृष्टिपथं नेतव्या ।।

अनुवादकः—

श्रीभूपनारायण झा ।

सम्पादकीयम्

इतिकर्तव्यतानिर्देशः

'सुषमायाः' अष्टमवर्षस्य प्रथमेऽङ्के संस्तुतोऽस्माभिर्महामहिमशाली करालः कालः। स्तवेन प्रीतो भगवान् प्रावेशयत् तामिमां नवमे वर्षे। अष्टमवर्षस्य द्वितीयाङ्कोऽपि प्रकाशमेष्यति न वेति सन्दिहाना वयं संस्कृतपत्रपत्रिकाणामभिलक्ष्य परमायुः सप्तवर्षं यावत्प्रकाशितैषा पत्रिकेत्यत्रापि नातीवारुचिं प्राकटयाम। किन्तु परेशकृपयाऽदृष्टमाहात्म्येन च कर्तव्या देववाणीपरिचर्येति च सत्यपि कालविलम्बे सकुशलं समापयदष्टमं वर्षमेषा। अधुना च नवमवर्षस्य प्रथमोऽङ्को विदुषां पाठकानां करकमलयोरर्प्यते। क्षन्तव्योऽयं कालविलम्बः श्रीमद्भिः।

"एकं सद्विप्रा बहुधा वदन्ति" इतिवदनादिनिधनां दैवीं वाचं पुरुरूपां बहुधोपासते प्राच्यप्रतीच्या मनीषिणः। सति राजनीतिके संपर्के भवति परस्परं सांस्कृतिकः साहित्यिकश्च संगमः। यवन(ग्रीक)-अरबसंस्कृतिसाहित्याभ्यां संजातपूर्वोऽयं संबन्धो भारतीयसंस्कृतिसाहित्ययोः। दुःखतप्तं जीवलोकं संलक्ष्य महाकरुणाप्रेरितानां भवति तेषामुद्धाराय स्वत्वविकासनशीला प्रवृत्तिः। अनया प्रवृत्त्या चीनतिब्बतादिदेशेषु जावासुमात्रादिदक्षिणपूर्वेशियादेशेषु च तयोः संपर्कः समजायत। इत्थं सत्यमेव महामहिमशालिनी सैषा गीर्वाणवाणी प्रसृतदिग्दिगन्तयशस्का वर्तते पुरातनकालादेव।

अधुना च नूतनेन वैज्ञानिकयुगेन सह संपर्कस्तस्या वरीवर्ति। पूर्वं लब्धयशस्कापि पाश्चात्त्यमनीषिभिरीशवीयस्याष्टादशशतकस्योत्तरार्द्धे पुनः परीक्षिता सा सहस्रगुणितं यशस्तेने। तुलनात्मकभाषाविज्ञानस्य विज्ञानत्वापादिकायास्तस्या रूपसमृद्धिं धातुसमृद्धिं वैदिकादिविविधसाहित्यसमृद्धिं च परीक्ष्यावधारितं पाश्चात्त्यगवेषकैर्यद् ग्रीक-लेटिन-अवेस्ताभाषाणामनयाऽतिघनिष्ठः संबन्धो वर्तत इति। अवेस्तावैदिकभाषयोः साम्यं तु सपद्येवावभासते। समासामासां भाषाणां साहाय्येन भारतयूरोपीयभाषाणां जननीस्थानीया मूलभाषा कल्पिता, यस्याः स्वरसंपत्तिर्ग्रीकभाषायां व्यञ्जनसंपत्तिश्च संस्कृतभाषायां सुरक्षिते तिष्ठत इति विदुषां मतम्। इत्थं च नूतनया पद्धत्या पाश्चात्त्यदेशेषु संस्कृताध्ययनस्य प्रचारः सम-

जनि। संस्कृतवाङ्मयस्य विविधासु शाखासु जर्मन-फ्रेंच-इंग्लिश-रशियन-डचप्रभृतिविविध-भाषामाध्यमेन विगतेषु सार्द्धशतवर्षेषु सुमहदध्ययनफलं प्रादुर्भूतम्। एकैकस्य शब्दस्य सम्पूर्ण इतिहासस्तैर्गवेषितः। सुमहान्तः कोशा निर्मिताः, सम्पूर्णस्य वैदिकवाङ्मयस्य, इतिहासपुराणयोः, धर्मशास्त्राणाम्, किं बहुना पालि-प्राकृत-अपभ्रंशसाहित्यस्यापि तैरालोडनं विहितम्। संस्कृतवाङ्मयस्यैकैकमङ्गमङ्गीकृत्य पाश्चात्यचिन्तकैस्तत्र स्वकीयं जीवनमेव हापितम्।

अमरभारत्याः स्वादूनि फलानीमानि जग्धुं नैव यथाकथञ्चित्पार्यते, किन्तु जीवनाहुति-भोग्यानि भवन्ति तानि। विशालतमः प्राचीनो भारतीयो वाङ्मय एव। सर्वेषु प्राच्यपाश्चात्य-देशेषु प्रसृतेन तत्संबद्धवाङ्मयेन साकमेव तस्य पूर्णता कल्पयितुं शक्या। यथार्थतः सर्वस्यास्य वाङ्मयस्य परिशीलनेन चैव सत्यममरभारती संरक्षा संभाव्यते।

तस्यैतस्य वाङ्मयजातस्य परिरक्षायै समीक्षायै च प्रवर्तिताः प्रवर्तन्ते च विविधा उपायाः। पाश्चात्त्येषु देशेष्वनेकानि प्राच्यगवेषणासंस्थानानि सन्ति, तत्रत्येषु प्रसिद्धेषु विश्व-विद्यालयेषु च प्राच्यविद्याः पाठ्यन्ते। तत्रत्याः प्राच्यविद्याविद्वांसोऽन्ताराष्ट्रिये प्राच्यविद्यामहा-संमेलने समये समये संभूय परस्परं विचारविनिमयं कुर्वन्ति च।

पाश्चात्त्यपद्धतिमनुसृत्य भारतेऽपि प्राच्यविद्याध्ययनपद्धतिः प्रचलिता। संस्कृतभाषा-परिशीलनाय डा॰आर॰जी॰भण्डारकरमहोदयैः पुण्यपत्तने शोधसंस्था स्थापिता, अत्र-त्यानां प्राच्यप्रतीच्याध्ययनपद्धतिमनुसरतां मनीषिणां च समवेत्य विचारविनिमयाय प्राच्यविद्या-महासंमेलनं प्रारब्धम्। अस्य संमेलनस्य सप्तदशाधिवेशनं गतवर्षे 'अहमदाबाद'-नगरे संपन्नम्। प्रत्यधिवेशनमस्य कार्यसञ्चिका प्रकाश्यते, यत्राधिवेशने पठिता विशिष्टा निबन्धाः प्रकाश्यन्ते।

पाश्चात्त्यसरणिशरणा इमे प्रयत्ना भवन्ति। अस्ति चाखिलभारतीयसंस्कृतसाहित्य-संमेलनं नाम, यस्यैकविंशाधिवेशनमेषम एव संपन्नम्। श्रीनरहरिविष्णुगाडगिलमहोदयाः सभापतय आसन्नस्य। अत्र प्राच्यसरणिपोषिका निबन्धप्रतियोगिताशलाकापरीक्षादयः संभ-वन्ति। संस्कृतरत्नाकरनामकं मासिकं मुखपत्रं विद्यतेऽस्य। विविधविषयेषु नूतनसंस्कृतग्रन्थ-निर्माणदिशि प्रेर्यन्ते विद्वांसः।

सम्पादकीयम्

महामहिमश्रीक०मा०मुंशीमहोदयानामसीमोद्योगेन १९५१ ई० वर्षे सोमनाथमन्दिर-पुनःप्रतिष्ठावसरे संस्कृतविश्वपरिषत् स्थापिता। अस्यास्तृतीयमधिवेशनं विगते वैशाखमासे (२४-२५ अप्रैल, १९५४) नागपुरे संपन्नम्। अस्याधिवेशनस्य स्वागताध्यक्षाः पं०रवि-शङ्करशुक्लमहोदयाः, अध्यक्षाश्च महामहिमराष्ट्रपतिश्रीराजेन्द्रप्रसादमहोदया आसन्। अस्याः परिषदः 'अमेरिका'-प्रभृतिविदेशेष्वपि शाखाः स्थापिताः सन्ति। 'भारतीय विद्याभवन बुलेटिन'-नाम्न्यां पत्रिकायां च संस्कृतविश्वपरिषत्संबन्धि सर्वं वृत्तजातम्, निबन्धाः संस्कृतमयाः, विविधाः सूचनाश्च प्रकाश्यन्ते।

अन्यदपि, पुण्यपत्तनस्थेन भण्डारकरशोधसंस्थानेन महाभारतस्य सर्वाङ्गपूर्णं संस्करणं प्रकाश्यते, बडौदास्थितया गायकवाडप्राच्यसंस्थया रामायणस्य प्रकाशनमुपक्रान्तम्, वाई-स्थितप्राज्ञपाठशालया धर्मकोशः प्रकाश्यते, पुण्यपत्तनस्थवैदिकसंशोधनमण्डलेन श्रौतकोशः संगृह्यते, पुण्यपत्तनस्थडेक्कनकालेजशोधसंस्थया संस्कृतविश्वकोशसंकलना क्रियते, मद्रासविश्व-विद्यालयो हस्तलेखानां बृहत्सूचीं संगृह्णाति; होशियारपुरस्थविश्वेश्वरानन्दवैदिकशोधसंस्था वैदिकपदानुक्रमकोशं संपादयति, मुम्बापुरीस्थो भारतीयविद्याभवनो भारतराष्ट्रस्य सांस्कृतिक-मितिहासमारचयति च।

एवं बहुभिर्बहुधा सेव्यमाना सेयं सुरसरस्वती सारस्वतीं सुषमामपि कमप्यवसरं प्रद-दाति। संस्कृतपाठकानां पुरतः प्राच्यप्रतीच्योभयविधाध्ययनप्रणाल्युपस्थापनमुखेन तां सुश्रूष-त्येषा। प्राच्यपाश्चात्त्योभयप्रणालीनिष्णातानां विदुषां परिदृश्यते न्यूनता। पार्थक्येनोभय-प्रणालीदीक्षितानां विचारसरणीषु प्रायो महदन्तरमवलोक्यते, न च दरीदृश्यतेऽनयोः संगम-केन्द्रं कुत्रापि। अतीवानिष्टजनकं च तत्, विशेषतोऽस्मिन् वैज्ञानिके युगे। अस्यैव लक्ष्यस्य, पूर्तिर्भवेदिति कामयत्येषा। अत्र चोभयप्रणालीदीक्षितानां विदुषां सहयोगोऽतिवेलमपेक्ष्यते।

उभयविधा निबन्धा अत्र प्रकाश्यन्ते—शास्त्रीयाः, गवेषणात्मकाश्च। अत्र शास्त्रीया निबन्धाः प्राचीनां विचारसरणिमुररीकुर्वन्ति, गवेषणात्मकाश्च नूतनां तुलनात्मकप्रणालीं समालोचनात्मिकाम्। समन्वयपद्धतेरादर्शभूतः—"अत्र ते वर्णयिष्यामि वर्षं भारत भारतम्" इतिशीर्षको डा०वासुदेवशरणाग्रवालमहोदयानां लेखोऽस्मिन्नेवाङ्के प्रकाशितः। समन्वय-वादिनो विद्वांस एतादृशान् निबन्धान् प्रेषयितुं प्रार्थ्यन्ते।

सारस्वती सुषमा

अत्र सरस्वतीभवनस्थानामप्रकाशितपूर्वाणां महत्त्वपूर्णानां लघूनां महतां च ग्रन्थानां संपादनकप्याधुनिकपद्धत्या क्रियते। आनन्दबोधरचितस्य काण्वसंहिताभाष्यस्य ३१–४० अध्यायात्मकश्चतुर्थो दशकोऽस्मिन्नेवाङ्के समाप्यते। नारायणपण्डितविरचितो बीजगणितावतंसः प्रकाश्यमान आस्ते। प्रस्तुताङ्कतश्च रङ्गनाथभट्टविरचितः सिद्धान्तचूडामणिनामा ग्रन्थः प्रकाशयितुमुपक्रम्यते। अन्येऽपि महत्त्वपूर्णा ग्रन्था यथासमयं प्रकाशयिष्यन्ते।

साम्प्रतं 'सुषमायाः' विनिमये चत्वारिंशदधिका देशीया विदेशीयाश्च शोधपत्रिकाः, संस्कृतपत्रिकाश्चावाप्यन्ते। आसु संस्कृतवाङ्मयमधिकृत्यानेकासु शाखासु महानूहापोहः क्रियते। सर्वस्यास्य ज्ञानस्यैकत्र परिचयमासादयन्तु पाठका इति धिया निबन्धानां ग्रन्थानां च संक्षिप्तं परिचयं प्रत्यङ्कं प्रदातुं प्रयतिष्यतेऽग्रिमाङ्कैः।

अन्यदेवाहुः सम्भवादन्यदाहुरसम्भवात् ।
इति [1]शुश्रुम धीराणां ये नस्तद्विचचक्षिरे ॥ १३ ॥

(ख०) अथाधुना उपासनयोः समुच्चयकरणायावयवफलभेदमाह–अन्यदेवाहुरिति । अन्यदेव पृथगेव । आहुः फलं संभवात्, संभूतेः कार्यब्रह्मोपासनाद् अणिमाद्यैश्वर्यलक्षणं फलमाहुर्वेदाः । तथाऽन्यदाहुरसंभात् असंभूतेरव्याकृतादव्याकृतोपासनादन्यदेव फलमाहुः—"अन्धं तमः प्रविशन्ति" [ई० १२] [2]इति, 'प्रकृति[लय] इति [च] पौराणिकैरुच्यते । इति एवम् । शुश्रुम श्रुतवन्तो वयम् । धीरा[णां] ये नस्तद्विचचक्षिरे ये आचार्या धीराणां वचनं विचचक्षिरे व्याकृताव्याकृतोपासनाफलवचनं व्याख्यातवन्त इत्यर्थः ॥ १३ ॥

(क०) अधुना उभयोरुपासनयोः समुच्चयकारणमवयवफलभेदमाह । पाठस्तु—अन्यदेवाहुः संभवादन्यदाहुरसंभवात् । इति शुश्रुम धीराणां ये नस्तद्विचचक्षिरे ॥ १३ ॥ इति । अन्यदेव पृथगेव आहुः फलम् । संभवात् संभूतेः कार्यब्रह्मोपासनाद् अणिमाद्यैश्वर्यलक्षणं [3]व्याख्यातवन्त इत्यर्थः । तथा च अन्यदाहुरसंभवात् । असंभूतेः अव्याकृतात् अव्याकृतोपासनात् । यदुक्तम्—"अन्धं तमः प्रविशन्ति" [ई० १२] इति, प्रकृतिलय इति च पौराणिकैरुच्यते । इति एवम् । शुश्रुम धीराणां [वचनम्] । ये नस्तद्विचचक्षिरे [व्याकृता]-व्याकृतोपासनफलं व्याख्यातवन्त इत्यर्थः ॥ १३ ॥

संभूतिं च विनाशं च यस्तद्वेदोभयं सह ।
विनाशेन मृत्युं तीर्त्वा संभूत्याऽमृतमश्नुते ॥ १४ ॥

(ख०) यत एवमतः समुच्चयः [4]संभूत्यसंभू [त्युपासन]योर्युक्त एव, एकपुरुषार्थत्वादित्याह—संभूतिं च विनाशं च यस्तद्वेदोभयं सह विनाशेन [5]मृत्युम् । [वि]नाशो धर्मो यस्य स तेन विनाशधर्मणा हिरण्यगर्भोपासनेन ऐश्वर्यप्राप्तिद्वारा अनैश्वर्य[म् अ]धर्मकामादिदोषजातं च मृत्युं तीर्त्वा । संभूत्या, अत्राकारलोपश्छान्दसः । असंभूत्या असंभूत्यु-

---

१. 'इति' इत्यस्याग्रे–"शुश्रुम' इति–ख० । २. 'प्रकृति'''एवम्' नास्ति–श्रा० । ३. आख्यातवन्तः–शां० । ४. संभूत्योः–श्रा० । ५. मृत्युर्नाशो–श्रा० ।

पासनया अव्याकृतोपासनेन अमृतं प्रकृतिलयलक्षणं कारणात्वप्राप्तिलक्षणममृतमश्नुत इति । ततश्च पुनः संसारो भवतीत्येवमपरं विद्याकर्मसमुच्चये फलमभिहितम् । "तत्र को मोहः कः शोक एकत्वमनुपश्यतः" [ई० ७] इति स्वतन्त्रस्य सर्वकर्मसंन्यासपूर्वस्य सम्यग्ज्ञानस्य फलमभिहितम् । एवं द्विप्रकारः प्रवृत्तिनिवृत्तिलक्षणो वेदार्थोऽनेन[1] प्रकाशितः । [तत्र] प्रवृत्तिलक्षणस्य वेदार्थस्य विधिप्रतिषेधलक्षणस्य कृत्स्नस्य प्रकाशने प्रवर्ग्यान्तं ब्राह्मणमुपयुक्तम् । निवृत्तिलक्षणस्य प्रकाशने—"विद्यामुपासते" [?] इत्यत ऊर्ध्वं बृहदारण्यकम् । तत्रापि प्राणादिविषयोपासनपरं[2] किञ्चित्, अन्यन्निर्गुणब्रह्मपरमिति विभज्य दर्शनीयम् । कार्यसगुणब्रह्मोपासनावाक्यजातं च—"अन्धं तमः प्रविशन्ति येऽविद्यामुपासते" [ई० ९] इत्यादिषण्मन्त्रकाशितार्थस्य प्रकाशन उपयुक्तम्, इतरत् सर्वं निर्गुणतत्त्वैकनिष्ठमिति । "विद्यां चाविद्यां च यस्तद्वेदोभयं सह । अविद्यया मृत्युं तीर्त्वा विद्ययामृतमश्नुते ॥" [ई० ११] इति यदुक्तं तत्र केन मार्गेणामृतत्वमश्नुत इत्यर्चिरादिमार्गेणेत्युच्यते ॥१४॥

(क०) यत एवमतः समुच्चयः संभूत्यसंभूत्युपासनयोर्युक्तः, एकैकपुरुषार्थत्वाच्चेत्याह । पाठस्तु–संभूतिं च विनाशं च यस्तद्वेदोभयं सह । विनाशेन मृत्युं तीर्त्वा संभूत्याऽमृतमश्नुते ॥ १४ ॥ इति । [संभूतिं च विनाशं च यस्तद्वेदोभयं सह विनाशेन] । विनाशो धर्मो यस्य कार्यस्य स तेन धर्मिणा [अ]भेदेनोच्यते 'विनाश' इति, तेन तदुपासनेनानैश्वर्य-[म]धर्मकामादिदोषजातं च मृत्युं तीर्त्वा, हिरण्यगर्भोपासनेन ह्यणिमादिप्राप्तिः फलम्, तेनानैश्वर्यादिमृत्युमतीत्य । असंभूत्या अव्याकृतोपासनेन[3] । अमृतं प्रकृतिलयलक्षणमश्नुते । 'संभूति च विनाशं च' इत्यत्रावर्णलोपेन निर्देशो द्रष्टव्यः, प्रकृतिलयश्रुत्यनुरोधात् ॥ १४ ॥

हि॒र॒ण्मये॑न॒ पात्रे॑ण स॒त्यस्यापि॑हितं॒ मुख॑म् ।
तत्त्वं पू॑षन्नपावृ॑णु स॒त्यधर्मा॑य दृ॒ष्टये॑ ॥ १५ ॥

(ख) एवं यथोक्तोपासनं कुर्वन्नुपासकः स्वदेहस्यान्तकाले प्राप्त आत्मनोऽमृतत्वप्राप्तिद्वारभूतमादित्यं याचते—हिरण्मयेन पात्रेणेति । आदित्यदेवत्याऽनुष्टुप् । हे पूषन् हे सूर्य अस्मत्पोषक । हिरण्मयेन ज्योतिर्मयेन । पात्रेण आधारभूतेन । सत्यस्य आदित्यमण्डलस्थस्य ब्रह्मणः । अपिहितं मुखं द्वारमपिहितम् । हिरण्मयेन पात्रेण द्वारस्यापिधानं कृतम् ।

---

1. अनेन सन्दर्भेणेत्यर्थः । 2. उपासनं न परम्–ख-आ० । 3. उपासनया–शां० ।

अतस्तत्त्वं पूषन्नपावृणु । पूषन्, तत् पिधानम् । त्वम् अपावृणु अपगमय । सत्यधर्माय सत्यस्य तव उपासनादहमपि सत्यधर्मो जातः । सत्यं धर्मो यस्य स 'सत्यधर्मा, तस्मै सत्य-धर्माय मह्यं तदपावृणु । यद्वा व्यत्ययः । सत्यधर्माय सत्यधर्मस्य तद् दृष्टये ॥ १५ ॥

(क०) मानुषदैववित्तसाध्यं फलं शास्त्रलक्षणं प्रकृतिलयान्तम् । एतावती संसार-गतिः । अतः परं पूर्वोक्तम्—"आत्मैवाभूद्विजानतः"[ई० ७]इति सर्वात्मभाव एव सर्वैषणासंन्यासज्ञाननिष्ठाफलम् । एवं द्विप्रकारः प्रवृत्तिनिवृत्तिलक्षणो वेदार्थोऽत्र ²प्रकाशितः । तत्र प्रवृत्तिलक्षणस्य वेदार्थस्य विधिप्रतिषेधलक्षण[स्य] कृत्स्नस्य प्रकाशने प्रवर्ग्यान्तं ब्राह्मणमुपयुक्तम् । निवृत्तिलक्षणस्य प्रकाशनेऽत ऊर्ध्वं बृहदारण्यकम् । तत्र निषेकादि-श्मशानान्तं कर्म कुर्वन् जिजीविषेद्यो विद्यया सह अपरब्रह्मविषयया, तदुक्तम्—"विद्यां चाविद्यां च यस्तद्वेदोभयं सह । अविद्यया मृत्युं तीर्त्वा विद्ययाऽमृतमश्नुते ॥" [ई० ११] ³इति, तत्र [सोऽधिकारी] केन मार्गेणामृतत्वमश्नुते ? इत्युच्यते—"तद्यत्तत्सत्यमसौ स आदित्यो य एष एतस्मिन् मण्डले पुरुषो यश्चायं दक्षिणेऽक्षन् पुरुषः" [बृह० ५।५।२] एतदुभयं सत्यं ब्रह्मोपासीनो यथोक्तकर्मकृच्च यः सोऽन्तकाले प्राप्ते सत्यात्मानमात्मनः प्राप्तिद्वारं याचते । पाठस्तु—हिरण्मयेन पात्रेण सत्यस्यापिहितं मुखम् । तत्त्वं पूषन्नपावृणु सत्यधर्माय दृष्टये ॥ १५ ॥ इति । [हिरण्यमयेन पात्रेण] । हिरण्मयम्, ज्योतिर्मयमित्येतम्, तेन पात्रेणेव अपिधानभूतेन । सत्यस्य आदित्यमण्डलस्थस्य ब्रह्मणः । अपिहितम् आच्छादितम् । मुखं द्वारम् । तत् त्वं हे पूषन्, अपावृणु [अपसारय] । सत्यधर्माय तव सत्यस्योपासनात् सत्यं धर्मो यस्य मम सोऽहं सत्यधर्मा तस्मै मह्यम्; अथवा यथाभूतस्य धर्मस्यानुष्ठात्रे । दृष्टये तव सत्यात्मन उपलब्धये ॥ १५ ॥

पूष॑न्नेक ऋषे यम सूर्य॒ प्राजा॑पत्य॒ व्यू॑ह र॒श्मीन्त्समू॑ह
तेजो॒ यत्ते॑ रू॒पं कल्या॑णतमं॒ तत्ते॑ पश्यामि ।
यो॒ऽसाव॒सौ पुरु॑षः सो॒ऽहम॑स्मि ॥ १६ ॥

(ख०) पूषन्नेकर्षे इति । सूर्यदेवत्या त्रिष्टुप् । पोषणात् पूषा रविः, तत्संबोधनं हे⁴ पूषन् । हे एकर्षे⁵ एक एव ऋषतीत्येकर्षिः, तत्संबोधनं हे एकर्षे । [त्वया ? तथा] सर्वस्य

---

१. सत्यधर्मः–ख० । २. प्रकीर्तितः प्रकाशितः–क० । ३. इत्युक्तम्–क० ।
४. 'हे पूषन्' नास्ति–आ० । ५. 'एक एव…हे एकर्षे' नास्ति–आ० ।

संयमनाद्यमः, हे यम । सूर्य सु ईरणात् सूर्यः, तत्संबोधनम् । प्रजापतेरपत्यं प्राजापत्यः, तत्संबोधनं हे प्राजापत्य । एवं संस्तूय प्रार्थयते—व्यूह रश्मीनिति । रश्मीन् व्यूह विगमय । समूह तेजः । तेजः तापकं [1]यज्ज्योतिस्तत् समूह एकीकुरु । यत्ते रूपं कल्याणतमं तत्ते पश्यामि । ते तव यत्कल्याणतमं मङ्गलतमं रूपम् । तत् ते तव प्रसादात् तद्रूपमहं पश्यामि । किं च, योऽसावसौ पुरुषः सोऽहमस्मि । योऽसौ मण्डलस्थो [2]व्याहृत्यवयवो यः पुरुषः [3]पुरुषाकारत्वात् पूर्णत्वाद्वा पुरुषः । सोऽहमस्मीत्यादित्यात्मानमेकीकृत्य[4] पश्यामीति ॥ १६ ॥

(क०) पाठस्तु—पूषन्नेक ऋषे यम सूर्य प्राजापत्य व्यूह रश्मीन् समूह तेजो यत्ते रूपं कल्याणतमं तत्ते पश्यामि । योऽसावसौ पुरुषः सोऽहमस्मि ॥ १६ ॥ इति । हे पूषन्, जगतः पोषणात् पूषा रविः । तथा एक एव [ऋषति गच्छतीत्येक]ऋषिः, हे एकर्षे । तथा सर्वस्य संयमनाद्यमः, हे यम । तथा रश्मीनां प्राणानां रसानां च स्वीकरणात् सूर्यः, हे सूर्य । प्रजापतेरपत्यं [प्राजापत्यः, हे] प्राजापत्य । व्यूह विगमय । रश्मीन् स्वान् । समूह एकीकुरु उपसंहर । तेजः तापकं ज्योतिः । यत् ते तव रूपं कल्याणतमम् अत्यन्तशोभनम् । तत् ते तवात्मनः प्रसादात् पश्यामि । किं च, अहं न [5]च त्वां भृत्यवद् याचे । योऽसौ [आदित्य]-मण्डलस्थो व्याहृत्यवयवः पुरुषः पुरुषाकारत्वात्, पूर्णं [6]वाऽनेन प्राणबुद्ध्यात्मना जगत् समस्तमिति पुरुषः, [पुरीष ? पुरि श]यनाद्वा [पुरुषः] । सोऽहमस्मि भवामि ॥ १६ ॥

वायुरनिलममृतमथेदं भस्मान्तꣳ शरीरम् ।
ओ३म् क्रतो स्मर कृतꣳ स्मर क्रतो स्मर कृतꣳ स्मर ॥ १७ ॥

(ख०) एवं ब्रह्मोपासकस्य योगिनः शरीरपातोत्तरकालं शरीरं यद्भवति तदाह—वायुरनिलमिति । लिङ्गोक्तदेवत्यं यजुः । वायुः प्राणः । अनिलं [7]सूर्यात्मानम् । अमृतम् अधिदैवतं स्वप्रकृतिं हिरण्यगर्भाख्यं प्राणं प्रतिपद्यते । अथ अनन्तरम् । इदं प्रतीयमानं शरीरम् । अग्नौ हुतं भस्मान्तं भवति, कृतप्रयोजनत्वात् । इदानीं योगिनो बलभूतं प्रभूतं सर्ववेदसारं सर्ववेदमयमक्षरं कथ्यते—ओमिति । अवतेराप्नोतेर्वा ओमिति परमाक्षरस्य योगिनो

---

१. यज्ज्योतिस्तज्ज्योतिः—ख-आ० । २. व्याकृतावयवः—ख-आ० ।
३. पुरुषा आहुः—ख-आ० । ४. आदित्यम्—आ० । ५. तु—शां० ।
६. अनेन वा—क० । ७. सूर्यात्मम्—आ० ।

बलभूतस्य परस्य ब्रह्मणः प्रणवाख्यस्य स्थूलादिगुणयुक्तस्य ब्रह्मा ऋषिः, छन्दो गायत्रम्, परमात्मा देवता शब्दब्रह्मारम्भे विनियोगः। अपि च यागहोमादिषु शान्तिपौष्टिकर्मसु चान्येष्वपि काम्यनैमित्तिकादिष्वपि सर्वेष्वस्योङ्कारस्य विनियोगः। ओमिति परब्रह्मणो नामनिर्देशः—'ॐ तद्ब्रह्म'' इत्यादिश्रुतेः। ब्रह्मविष्णुशिवपरब्रह्मात्मकोऽकारोकारमकारार्धमात्रात्मकोऽयमोङ्कार एवान्त्यकाल उत्तारक इति दर्शयति। आत्मरूपश्च ॐकारस्ततस्तेन ततम्। इदानीं कृतं स्मारयति–कृतं स्मरेति। लिङ्गोक्तदेवत्यं यजुः। क्रतोः, क्रतुः सङ्कल्पोऽनेन सङ्कल्पविषयो योगिभिर्लक्ष्यते। हे क्रतो हे श्रीभगवन्नग्ने, स्मर कृतं ब्रह्मचर्ये मया कृतं तत् स्मर न विस्मर्तव्यम्। हे क्रतो, गार्हस्थ्ये मया यत्कृतं तच्च स्मर। पुनश्च यत्साधु कृतं तत्सर्वं कृतं स्मर कृतं स्मरेति। आदरार्थं पुनर्वचनम्। अथवा क्रतुशब्देन यज्ञः संबोध्यते। हे क्रतो हे यज्ञ। यज्ञशब्दोपलक्षितो यज्ञाध्यक्षो यज्ञहविर्भागभुक् श्रीभगवान् विष्णुः संबोध्यते। श्रीभगवन् विष्णो, कृतं स्मर मया कृतं त्वया कारितं स्मर। कृतं स्मर [1]कृतं स्मरेति ॥१७॥

(क०) पाठस्तु—वायुरनिलममृतमथेदं भस्मान्तꣳ शरीरम्। ॐ३ क्रतो स्मर कृतꣳ स्मर क्रतो स्मर कृतꣳ स्मर ॥ १७ ॥ इति। अथेदानीं मम मरिष्यतो वायुः प्राणोऽध्यात्मपरिच्छेदं हित्वाऽधिदैवतात्मानं सर्वात्मकमनिलममृतं सूत्रात्मानं प्रतिपद्यतामिति [2]वाक्ययोगः। लिङ्गं चेदं ज्ञानकर्मसंस्कृतमुत्क्रामत्विति द्रष्टव्यम्, मार्गयाचनसामर्थ्यात्। अथेदं शरीरमग्नौ हुतं भस्मान्तं [भस्मावशेषं] भूयात्। ॐ३मिति यथोपासनमों प्रतीकात्मकत्वात् सत्यात्मकमग्न्याख्यं ब्रह्माभेदेनोच्यते। हे क्रतो संकल्पात्मक। स्मर यन्मम स्मर्तव्यं तस्य कालोऽयं प्रत्युपस्थितः, अतः स्मर एतावन्तं कालं भावितं कृतमग्ने स्मर यन्मया बा[ल्य]प्रभृत्यनुष्ठितं कर्म तच्च स्मर। क्रतो स्मर कृतं स्मरेति पुनर्वचनमादरार्थम् ॥ १७ ॥

अग्ने नय सुपथा राये अस्मान् विश्वानि देव वयुनानि विद्वान्।
युयोध्यस्मज्जुहुराणमेनो भूयिष्ठां ते नमउक्तिं विधेम ॥ १८ ॥

(ख०) मार्गं याचते–अग्ने नयेति। आग्नेयी त्रिष्टुप्। हे श्रीभगवन्नग्ने हे सर्वज्ञ। नय सुपथा दक्षिणमार्गनिवृत्त्यर्थं [3]सु शोभनेन मार्गेण देवयानेनास्मान् नय प्रापय। राये

---

१. 'कृतं स्मर' इति वारचतुष्टयं पठ्यते–ख०। २. वाक्यशेषः–शां०।
३. सुशब्दः–ख-आ०।

धनाय, कर्मज्ञानफलोपभोगाय वा । अस्मान् यथोक्तज्ञानकर्मकारिणो नयेति संबन्धः । हे देव विश्वानि [1]सर्वाणि । वयुनानि कर्माणि प्रज्ञानानि तदनुष्ठितानि च । विद्वान् ज्ञानवान् त्वं सुपथा नयेति संबन्धः । किं च, युयोध्यस्मज्जुहुराणमेनः । अस्मत् अस्मत्तः सकाशात् । जुहुराणं कुटिलं [2]कुटिलवचनात्मकम् । एनः तत्कृतं चैनः पापम् । युयोधि योधय पृथक्कुरु । [3]ततो विशुद्धाः सन्त इष्टं फलं प्राप्नुयामेत्यभिप्रायः । किन्तु वयमिदानीं किमपि कर्तुं न शक्नुमः, अपि तु भूयिष्ठां बहुतराम् । नमउक्तिं नमस्कारवचनम् । ते तुभ्यम् । विधेम कुर्मः । केवलनमस्कारवचनेन परिचरेमेत्यर्थः ॥ १८[4]॥

वन्देऽहं मङ्गलात्मानं भास्वन्तं वेदविग्रहम् ।
याज्ञवल्क्यं मुनिश्रेष्ठं कृष्णं हरिहरं प्रभुम् ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यवर्यश्रीवासुदेवपुरीपूज्यपादपरमकारुण्यासादित-श्रीकृष्णभक्तिसाम्राज्यस्य श्रीमज्जातवेदभट्टोपाध्यायस्य सूनुना चतुर्वेदि-श्रीमदानन्दभट्टोपाध्यायेन विरचिते काण्ववेदमन्त्रभाष्य-संग्रहे चत्वारिंशोऽध्यायः ॥ ४० ॥[4]

(क०) पुनरन्येन मन्त्रेण मार्गं याचते । पाठस्तु—अग्ने नय सुपथा राये अस्मान् विश्वानि देव वयुनानि विद्वान् । युयोध्यस्मज्जुहुराणमेनो भूयिष्ठां ते नम उक्तिं विधेम ॥ १८ ॥ इति[5] । ॐ ३ खं ब्रह्म ॥ हे अग्ने, नय गमय । सुपथा [6]शोभनमार्गेण । सुपथेति विशेषणं दक्षिणमार्गनिवृत्त्यर्थम् । [7]निर्विण्णोऽहं दक्षिणेन मार्गेण गतागतलक्षणेन; अतो याचे त्वां पुनःपुनर्गमनागमनवर्जितेन शोभनेन पथा नय । राये धनाय, कर्मफलभोगाये-त्यर्थः । अस्मान् यथोक्तधर्मफलविशिष्टान् । विश्वानि सर्वाणि । हे देव, वयुनानि कर्माणि प्रज्ञानानि [8]च । विद्वान् जानन् । किं च, युयोधि वियोजय विनाशय । अस्मत् अस्मत्तः । जुहुराणं कुटिलं [9]वञ्चनात्मकम् । एनः पापम् । ततो वयं विशुद्धाः सन्त इष्टं प्राप्स्याम इत्य-भिप्रायः । किन्तु वयमिदानीं ते न शक्नुमः परिचर्यां कर्तुम् । भूयिष्ठां बहुतराम् । नमउक्तिं नमस्कारवचनं विधेम नमस्कारेण परिचरेमेत्यर्थः ।

---

१. सर्वाणि कर्माणि—ख-आ० । २. कुटिलवञ्चनात्मकम्—आ० । ३. तत्ते—आ० ।
४. ख० समासौ—"यादृशं पुस्तकं....", "भग्नपृष्ठकटि...." इति द्वौ श्लोकौ विद्येते ।
५. "ॐ ३ खं ब्रह्म" नास्ति—शां० । ६. शोभनेन मार्गेण—शां० ।
७. निर्विण्णो—क० । ८. वा—शां० । ९. वचनात्मकम्—क० ।

अथ 'पूर्वपक्षः— "अविद्यया मृत्युं तीर्त्वा विद्ययाऽमृतमश्नुते" [ई० ११], "विनाशेन मृत्युं तीर्त्वा संभूत्याऽमृतमश्नुते" [ई० १४] इति श्रुत्वा केचित् संशयं कुर्वन्ति। अतस्तन्निर्द्धारणार्थं संक्षेपतो विचारणां करिष्यामः। तत्र तावत् किं निमित्तः संशय इति? उच्यते–विद्याशब्देन मुख्या परमात्मविद्यैव कस्मान्न गृह्यते, अमृतत्वं च? ननूक्तायाः परमात्मविद्यायाः कर्मणश्च विरोधात् समुच्चयानुपपत्तिः। सत्यम्; विरोधस्तु नावगम्यते, विरोधाविरोधयोः शास्त्रप्रमाणकत्वात्; यथाऽविद्यानुष्ठानं विद्योपासनं च शास्त्रप्रमाणकं तथा [तद्विरोधा]विरोधावपि।[२] यथा च—"न हिंस्यात् सर्वा भूतानि" इति शास्त्रादवगतं पुनः शास्त्रेणैव बाध्यते—"अध्वरे पशुं हिंस्यात्" इति, एवं विद्याऽविद्ययोरपि स्यात्। विद्याकर्मणोश्च [समुच्चयः] न, "दूरमेते विपरीते विषूची अविद्या या च विद्येति [ज्ञाता]" [कठो० १।२।४] इति श्रुतेः। "विद्यां चाविद्यां च" [ई० ११] इति वचनादविरोध इति चेत्, न; [हेतुस्वरूपफलविरोधात्। विद्याविद्या]विरोधाविरोधयोर्विकल्पासंभव[ात् समुच्चयविधाना]दविरोध एवेति चेत्, न; सहसंभवानुपपत्तेः। क्रमेण [एकाश्रये] स्यातां विद्याविद्ये इति चेत्, न; विद्योत्पत्तौ तदाश्रयेऽविद्यानुपपत्तेः। न ह्यग्निरुष्णः प्रकाशश्चेति विज्ञानोत्पत्तौ यस्मिन्नाश्रये तदुत्पन्नं तस्मिन्नेवाश्रये शीतोऽग्निरप्रकाशो वेत्यविद्याया उत्पत्तिः। नापि संशयोऽज्ञानं वा, "यस्मिन् सर्वाणि भूतानि आत्मैवाभूद्विजानतः। तत्र को मोहः कः शोक एकत्वमनुपश्यतः।" [ई० ७] इति शोकमोहाद्यसंभवश्रुतेः। अविद्याया असंभवात्तदुपादानस्य कर्मणोऽप्यनुपपत्तिमवोचाम। "अमृतमश्नुते" [ई० ११] इत्यापेक्षिकममृतम्। विद्याशब्देन परमात्मविद्याग्रहणे–"हिरण्मयेन" [ई०१५] इत्यादिना द्वारमार्गयाचनमनुपपन्नं स्यात्। तस्माद्यथाऽस्माभिर्व्याख्यात[३] एव मन्त्राणामर्थ इत्युपरम्यते ॥ १८ ॥

[४]इति श्रीपरमहंसपरिव्राजकाचार्यश्रीवासुदेवपुरीश्रीकृष्णभक्तिसाम्राज्यश्रीमज्जातवेदोपाध्यायस्य सूनुना चतुर्वेदिश्रीमदानन्दबोधभट्टोपाध्यायेन विरचिते शुक्लयजुःकाण्ववेदमन्त्रभाष्यसंग्रहे चत्वारिंशोऽध्यायः समाप्तिमगमत् ॥४०॥[५]

---

१. "अथ पूर्वपक्षः" नास्ति–शां। २. तथा–क०। ३. 'अस्माभिः' नास्ति–शां०।
४. पुष्पिका शाङ्करभाष्यप्रतिकूला।
५. क० समाप्तौ–"तत्सत्कृष्णार्पणमस्तु। संवत्" इति दृश्यते।

काण्वसंहिताभाष्यसंग्रहः

आनन्दबोधभट्टोपाध्यायप्रणीतः

चतुर्थो दशकः

[२१–४० अध्यायात्मकः]

डा० सुभद्रझा - व्रजवल्लभद्विवेदाभ्यां

सम्पादितः ।

सारस्वती सुषमा

भाद्रः २०११

प्रास्ताविकं निवेदनम्

शुक्लयजुर्वेदीयकाण्वसंहिताया (३१–४०)अध्यायात्मकस्य चतुर्थदशकस्य श्रीमदानन्दबोधभट्टोपाध्यायविरचितं काण्वसंहिताभाष्यसंग्रहनामकमप्रकाशितपूर्वं भाष्यं साम्प्रतमुपस्थाप्यते ग्रन्थरूपेण विदुषां वैदिकगवेषणानिरतानां पुरत । ग्रन्थोऽयं त्रयाणां कोषाणां साहाय्येन संपादितः । तत्र क०ख०संकेताभ्यां सूचितौ कोषौ सरस्वतीभवनस्थौ, 'ग' संकेतेन सूचितः कोषस्तु होशियारपुरस्थविश्वेश्वरानन्दवैदिकशोधसंस्थानस्य । अथमत्रासां मातृकाणां परिचयः—

(क) ७७६ संख्याङ्कितः, १–१४४ पत्रात्मकोऽयं कोषः १०'१" × ४'४" आकारं बिभर्ति । प्रतिपत्रं विंशतिपङ्क्तयः, प्रतिपङ्क्त्यक्षराणि चत्वारिंशदासते । ३१ अध्यादारभ्य ४०अ०पर्यन्तः संपूर्णोऽयं हस्तलेखः शुभ्रसुपुष्टतूलपत्राधारः शोभनदेवनागराक्षराङ्कितः शुद्धप्रायः । लिपिकारलिपिकालौ नैव ज्ञायेते ।

(ख) ७७५ संख्याङ्कितः, १–९५, १०२–१३८ पत्रात्मकः कोषोऽयं ११"×५'४" आकारकः । प्रतिपत्रं विंशतिपङ्क्तयः, प्रतिपङ्क्त्यक्षराणि २५–३० वर्तन्ते । ३१ अ० आरम्भ ४०अ०पर्यन्तः कोषोऽयं मध्ये खण्डितः, ९६–१०१ पत्राणामभावात् । बभ्रुवर्णजीर्णतूलपत्राधारे पठितुं योग्यैर्देवनागराक्षरैर्लिखितोऽशुद्धिभूयिष्ठोऽप्ययं हस्तलेखः संदिग्धपाठशोधनेऽतीव सहायकः । लिपिकारलिपिकालौ प्राग्वत् ।

(ग) ५६५१ संख्याङ्कितः, १–७४ पत्रात्मक एष कोषः ९½"×४½" आकारं धारयति । प्रतिपत्रं प्रायोऽष्टाविंशतिपङ्क्तयः सन्ति । ३१-३९ अध्यायात्मकः संपूर्णोऽयं हस्तलेखः सुपुष्टतूलपत्राधारः शोभनदेवनागराक्षराङ्कितः, गैरिकादिप्रदानेन संशोधितोऽत एवातीव शुद्धः सटिप्पणश्च । टिप्पणी चात्रोवटमहीधरभाष्यानुसारिणी । लिपिकारलिपिकालौ प्राग्वत् ।

एषु क०ग०कोषौ समानस्रोतस्कौ, अशुद्धीनां पाठभेदानां च प्रायः समानत्वात् । ग०कोषस्थगैरिकसंशोधनं विजातीयेन कोषेणापि तस्यं परिचयं प्रत्याययति, स च ख०कोषसदृशः स्यादिति वक्तुं शक्यते, संशोधनानां तदनुकूलत्वात् ।

सरस्वतीभवनेऽन्यत्र चाधुना काण्वसंहिताया आनन्दबोधीयं संपूर्णं भाष्यमुपलब्धम्। किन्तु भाष्यप्रकाशनारम्भसमयेऽस्मत्सविधे चतुर्थदशकस्यैव द्वौ कोषावास्ताम्, अतः प्राक् तस्यैव संपादने मतिर्नियोजिता। द्वात्रिंशाध्यायतश्च होशियारपुरस्थकोषेणापि महत्त्वाधायकं साहाय्यमाचरितम्। अतः सर्वप्रथमं विश्वेश्वरानन्दवैदिकशोधसंस्थानसंचालकेभ्यः श्रीविश्वबन्धुशास्त्रिभ्यो बहुमानपुरस्सरा कृतज्ञता ख्याप्यते।

चत्वारिंशाध्यायस्थख०कोषस्य संपादनमानन्दाश्रममुद्रितभाष्यसाहाय्येन, क०कोषस्य च शाङ्करभाष्यमवलम्ब्य कृतम्। अत्र भाष्यसंशोधने यदावाभ्यां प्रयतितं तदुभयोर्भाष्ययोर्दृङ्निक्षेपमात्रेणैव विद्वद्भिरवगन्तुं सुशकम्।

बहुषु स्थलेषु कोशत्रयेऽपि समाना अशुद्धयो विद्यन्ते। तादृशेषु स्थलेषु पाठसंशोधने महाविद्यालयाध्यापकैः प्रत्युत्पन्नशेमुषीकैः श्रीरघुनाथशर्मभिः क्वचिच्च पण्डितराजश्रीराजेश्वरशास्त्रिद्रविडमहाभागैः स्तुत्यं साहाय्यमाचरितम्। भाष्योद्धृतवचनमूलस्थलपरिज्ञानदिशि म०म०श्रीगोपीनाथकविराजमहोदयैः, वेदवाणीसंपादकैः श्रीयुधिष्ठिरमीमांसकैः, गोयनकाग्रन्थालयाध्यक्षैः श्रीकृष्णदत्तपन्तमहाशयैश्चानुकूलो निर्देशः प्रदत्त इति सर्वे महानुभावाः कथमावाभ्यां संमाननीयेति न जानीवः। सरस्वतीभवनस्थान् श्रीरघुनाथपाण्डेय-श्रीचन्द्रभानुपाण्डेय-श्रीतारकनाथभट्टाचार्य-श्रीनिशाकान्तपाठकांश्च सहयोगप्रदानाय धन्यवादैर्भूषयावः।

आशास्यतेऽवशिष्टं भाष्यांशमपि शीघ्रमेव विदुषां पुरतः समुपस्थाप्येतेति। संपूर्णे भाष्ये प्रकाशिते सत्येव विस्तृता भूमिकाऽपि प्रकाशिता स्यात्। अधुना तु—"गच्छतः स्खलनं क्वापि" इति कुमारिलभट्टवचनमनुसरद्भ्यामावाभ्यां विद्वांसस्त्रुटिक्षमापनाय प्रार्थ्यन्ते—

विदुषां वशंवदाभ्याम्—

डा० सुभद्रझा-

व्रजवल्लभद्विवेदाभ्याम्।

———

न्यासः—क ५ क ३; एतयोरन्तरं क ५ क ३̇, वा क ५̇ क ३ ; अनयोर्वर्गस्तुल्य एव—रू ८ क ६०̇ ।

द्वितीयस्य न्यासः—क ५ क ३ क २̇, वा क ५̇ क ३̇ क २; अनयोर्वर्गस्तुल्य एव—रू १० क ६० क ४०̇ क २४̇ ।

इति करणीवर्गः ॥

[1]करणीवर्गमूले सूत्रम्—

करणीवर्गे नियमः सङ्कलितमितानि खण्डानि स्युः ।
एककरण्या वर्गे रूपाण्येव द्वयोः सरूपा च ॥ ४१ ॥
तिसृणां तिस्रश्च तथा षडपि चतुर्णां दशापि च पञ्चानाम् ।
षण्णामपि च पञ्चदशेत्येवं ज्ञेयानि खण्डानि ॥ ४२ ॥
सङ्कलितात्मकमूलतन्मितं खण्डैक्यतुल्यरूपाणि ।
रूपकृतेः प्रोज्झ्य पदं तेनोनयुतानि रूपाणि ॥ ४३ ॥

---

१. करणवर्गमूल इति । करणीवर्गे सरूपाणि करणीखण्डानि भवन्ति । यथा एककरण्या वर्गे तत्करण्येव रूपराशिः। द्वयोः करण्योर्वर्गे खण्डत्रयम् । तत्र करणीद्वयतुल्यो रूपराशिरेका च करणी । तिसृणां करणीनां वर्गे खण्डषट्कम् । तत्र करणीत्रयतुल्यो रूपराशिस्तिस्रः करण्यश्च । चतसृणां करणीवर्गे खण्डदशकम् । तत्र करणीचतुष्टयतुल्यो रूपराशिः षट् च करणीखण्डानि । पञ्चानां करणीनां वर्गे पञ्चदश खण्डानि । तत्र करणीपञ्चकरूपाणि दश च करणीखण्डानि स्युः । एवमग्रेऽपि । यथा—

$(\sqrt{२})^{२} = २$

एवम् $(\sqrt{२} + \sqrt{३})^{२} = २ + ३ + \sqrt{२४} = ५ + \sqrt{२४}$

एवम् $(\sqrt{२} + \sqrt{३} + \sqrt{५})^{२} = २ + ३ + ५ + \sqrt{२४} + \sqrt{४०} + \sqrt{६०}$ ।

एवमग्रेऽपि ।

प्रत्यक्षस्यैवात्र प्रामाण्यमतो युक्तमेवोक्तमाचार्येण—"करणीवर्गे नियमः सङ्कलितमितानि खण्डानि स्युः" इत्यादिना ।

दलिते करणीखण्डे सन्ति करण्यः कृताः शेषाः ।
महतीरूपाणि तयोः प्राग्वत्साध्येऽपरे खण्डे ॥ ४४ ॥
सङ्कलितात्मकमूलाभावे खण्डेषु तेषु खण्डानि ।
विश्लेष्य यथा मूलप्राप्तिः स्यादन्यथैवासत् ॥ ४५ ॥

अथ प्रकारान्तरमाह—

[1]अथवा सर्वकरण्यश्चतुर्विभक्ता न्यसेदनल्पायाः ।
आद्यासन्नकरण्योर्हृतिराद्याप्ता च तत्पदं करणी ॥ ४६ ॥
ते एव तया भक्ते करणीखण्डेऽपरे भवतः ।
क्रमशस्तैरपि खण्डैः शेषा भक्ताः परा करणी ॥ ४७ ॥

---

१. अथवेति । करणीवर्गस्त्वेवं भवति—"स्थाप्योऽन्त्यवर्गश्चतुर्गुणान्त्यनिघ्नाः" इत्यादिना । तत्र प्रथमस्थाने करणीवर्गः । ततः प्रथमकरणीद्वितीयादिकरणीघाताश्चतुर्गुणाः । ततो द्वितीयकरणीवर्गः । ततो द्वितीयकरणीतृतीयादिकरणीघाताश्चतुर्गुणाः । एवमग्रेऽपि । एवं यावन्ति करणीखण्डानि तावतामवश्यं वर्गाः स्युः । वर्गत्वात्तेभ्योऽवश्यं मूलप्राप्तिः स्यात् । तानि च मूलानि करणीतुल्यान्येव । तथा च वर्गराशौ यो रूपगणः स एव मूलकरणीयोगः । परमस्ति च रूपरीत्या न करणीप्रकारेण । यदि करणीरीत्यैव करणीयोगो ज्ञायेत्तदा विश्लेषसूत्रेण पृथक्करणं सुगमम् । परन्तु करणीवर्गे रूपरीत्या करणीयोगो वर्तते, अतस्तदर्थमन्यथा यतितव्यम्, "चतुर्गुणस्य घातस्य युतिवर्गस्य चान्तरम् । राश्यन्तरकृतेस्तुल्यं द्वयोरव्यक्तयोर्यथा ॥" इति प्रसिद्धनियमात् । अत्र यानि रूपाणि स एव करणीयोगः । अतो रूपवर्गः करणीयुतिवर्गः । वर्गराशौ प्रथमकरणीद्वितीयादिकरणीघाताश्चतुर्गुणाः कानिचित्करणीखण्डानि च सन्ति । तेषां योगे कृते प्रथमकरण्याः शेषकरणीयोगस्य च घातश्चतुर्गुणः स्यात् । युतिवर्गोऽपि प्रथमकरण्याः शेषकरणीयोगराशेश्चास्ति । अतस्तयोरन्तरे प्रथमकरण्याः शेषकरणीयोगस्य चान्तरवर्गो भवेत् । एवमन्तरवर्गस्य मूलं प्रथमकरण्याः शेषकरणीयोगस्य चान्तरं विद्यते । रूपाणि तु तयोरेव योगः । योगान्तरे च ज्ञाते—"योगान्तरेणोनयुतोर्द्धितः" इति नियमेन तयोः (करण्योः) ज्ञानं सुलभम् । एवं मूले करणीद्वयमागतम् । तत्र का प्रथमकरणी । को वा शेषकरणीयोग इति विचारे—लघुस्तु प्रथमा करणी, महती तु शेषकरणीयोगः ।

तैरपि मुहुः सलब्धैश्शेषाः करणीर्भजेत्प्राग्वत् ।
पदकरणीवर्गयुतिं विशोधयेद् भाज्यरूपेभ्यः ॥ ४८ ॥
एवं कृते तु न यदा तदा भवेद्योगजा करणी ।
विश्लेष्य समुत्पाद्याः करणीवर्गे करण्योऽन्याः ॥ ४६ ॥

पूर्वसिद्धवर्गाणां प्रथमो वर्गः—रू ५ क २४ । अत्रैकमेव करणीखण्डम् ।

अत्र परिभाषितम्—

करणीखण्डमितिर्वा द्विगुणा रूपाङ्घ्रियुक्ततो मूलम् ।
रूपदलेन ५/२ विहीनं सङ्कलितपदं भवत्येव ॥ ५० ॥

करणीखण्डं द्विगुणं २ रूपाङ्घ्रि ५/४ युक्तं ९/४ मूलं ३/२ रूपार्द्धेन ५/२ विहीनम् । एतदेव सङ्कलितपदमेतन्मिता करणी क २४ रूपकृतेः २५ अपास्य शेषमूलं १ अनेनोनयुतानि रूपाणि ४।६ दलिते करणीखण्डे क २ क३ एते एव मूलकरण्यौ क ३ क २ ।

अनन्तरं द्वितीयादिकरणीयोगाद् द्वितीयकरणी तृतीयादिकरणीघाताच्चतुर्गुणाच्चोक्तवद् द्वितीयकरणी पृथक्कार्या । एवं तृतीयादिकरणीनामपि पृथक्करणं सुलभम् ।
अत्र रूपवर्गात् तथा करणीनां योगो विशोधनीयो यथा मूलप्राप्तिः स्यात् । यदि केनापि प्रकारेण मूलप्राप्तिर्न भवेत्तदा तन्मूलमेवासद्बोध्यम् । अत उक्तमाचार्येण— "सङ्कलितात्मकमूलतन्मितं खण्डैक्यतुल्यरूपाणि । रूपकृतेः प्रोज्झ्य पदं तेनोनयुतरूपाणि ॥" इत्यादि ।
अथ द्वितीयः प्रकारः—
करणीवर्गस्वरूपं प्रथमं कथितम् । तत्प्रकारान्तर्गतमेवेदं प्रकारान्तरम् । यथा—
$\sqrt{२}$, $\sqrt{३}$, $\sqrt{५}$ अस्य वर्गः— "स्थाप्योऽन्त्यवर्गश्चतुर्गुणान्त्यनिघ्नाः" इत्यादिना—

$$१०, \sqrt{२४}, \sqrt{४०}, \sqrt{६०}$$

इत्यत्र $\sqrt{२४}$ = प्र. क. × द्वि. क. × ४
$\sqrt{४०}$ = प्र. क. × तृ. क. × ४
$\sqrt{६०}$ = द्वि. क. × तृ. क. × ४

यदि करणीखण्डान्यग्रेऽपि सन्ति तदापीत्थमेव ।
∴ $\sqrt{२४}$, $\sqrt{४०}$, $\sqrt{६०}$ = प्र. क. × द्वि. क. × ४, प्र. क. × तृ. क. × ४, द्वि. क. × तृ. क. × ४

द्वितीयवर्गस्य रू ११ क ७२ क ४८ क २४ अत्र करणीखण्डमितिः ३ द्विगुणा ६ रूपाङ्घ्रि $\frac{१}{४}$ युता $\frac{२५}{४}$ मूलं $\frac{५}{२}$ रूपदलेन $\frac{१}{२}$ विहीनं सङ्कलितपदं २ एतन्मिते द्वे करणीखण्डे अष्टचत्वारिंशतिचतुर्विंशतिकरणी ४८।२४ तुल्यानि रूपाणि ७२ रूपकृतेः १२१ अपास्य शेषं ४९ मूलं ७ अनेन रूपाणि ११ ऊनयुतानि ४।१८ दलिते जाते करणी-खण्डे क २ क ९ अत्र महतीरूपाणि प्रकल्प्य न्यासः—रू ९ क ७२ द्विसप्ततितुल्यानि रूपाणि रूपकृतेः ८१ प्रोज्झ्य ९ पदं ३ ऊनयुतरूपाणाम् ६।१२ अर्द्धे ३।६ ।

यथाक्रमं न्यासः—क ६ क ३ क २ अथवा द्विसप्ततिचतुर्विंशतिमितकरणीतुल्य-क ७२ क २४ रूपाणि ९६ रूपकृतेः १२१ प्रोज्झ्य २५ पदं ५ ऊनयुतरूपाणाम् ६।१६ अर्द्धे जाते मूलकरण्यौ क ३ क ८ ।

अत्र महतीरूपाणि प्रकल्प्य रू ८ क ४८ रूपकृतेः ६४ अष्टाविंशतिकरण्यास्तु-ल्यरूपाण्यपास्य १६ मूलम् ४ ऊनयुत ४।१२ रूपाणामर्द्धे जाते मूलकरण्यौ क २ क ६ ।

यथाक्रमं न्यासः—क ६ क ३ क २ अथवा द्विसप्तत्यष्टचत्वारिंशतिकरण्यास्तु-ल्यानि रूपाणि १२० अपास्य १ मूलम् १ ऊनयुतरूपाणाम् १०।१२ अर्द्धे जाते मूल-करण्यौ क ५ क ६ अत्र महतीत्युपलक्षणम्, क्वचिदल्पापि ।

$\because \sqrt{२४}, \sqrt{४०}, \sqrt{६०}$ एताश्चतुर्गुणिताः सन्ति ।

$\therefore$ चतुर्भिर्विभक्ताः $\sqrt{६}, \sqrt{१०}, \sqrt{१५}$ = प्र. क. × द्वि. क., प्र. क. × तृ. क., द्वि. क. × तृ. क.

अत्र यदि खण्डद्वयं संगुण्यापरखण्डेन विभाज्यते तदा एककरणीखण्डस्य वर्गोऽवशिष्यते, तन्मूलमेककरणीखण्डम् । यथा—

$\sqrt{६} \times \sqrt{१०}$ = (प्र. क. × द्वि. क.) (प्र. क. × तृ. क.) = प्र.^{२} क. × द्वि. क. × तृ. क.

$$\therefore \frac{\sqrt{६} \times \sqrt{१०}}{\sqrt{१५}} = \frac{\text{प्र क}^{२} \times \text{द्वि क} \times \text{तृ क}}{\text{द्वि क} \times \text{तृ क}} = \text{प्र क}^{२} = \sqrt{४} = २$$

$\therefore$ प्र क = $\sqrt{२}$

$$\text{एवमग्रेऽपि } \frac{\sqrt{१०} \times \sqrt{१५}}{\sqrt{६}} = \frac{(\text{प्र. क.} \times \text{तृ. क.})(\text{द्वि. क} \times \text{तृ. क.})}{\text{प्र. क.} \times \text{द्वि. क.}}$$

$$= \frac{\text{तृ. क.}^{२} \times \text{प्र. क.} \times \text{द्वि. क.}}{\text{प्र. क.} \times \text{द्वि. क.}} = \text{तृ क}^{२} = ५$$

रूपाणि प्रकल्प्य न्यासः—रू ५ क २४ प्राग्वज्जाते मूलकरण्यौ क २ क ३ ।

यथाक्रमं न्यासः—क ६ क ३ क २ ।

तृतीयवर्गस्य न्यासः—रू १७ क १४० क ८४ क ६० क ५६ क ४० क २४ ।

अत्र वर्गे षट्पञ्चाशच्चत्वारिंशच्चतुर्विंशतिकरणीतुल्यानि—क ५६ क ४० क २४ रूपाणि रूपकृतेः २८९ अपास्य शेषं १६९ मूलं १३ ऊनाधिकरूपाणाम् ४।३० अर्द्धे २।१५ जाते मूलकरण्यौ क २ क १५ अत्र महतीरूपाणि रू १५ क १४० क ८४ क ६० अत्र रूपकृतेः २२५ चतुरशीतिषष्टिकरण्यास्तुल्यानि रूपाण्यपास्य शेषमूलम् ९ ऊनयुनरूपाणामर्द्धे जाते मूलकरण्यौ क ३ क १२ ।

महतीरूपाणि रू १२ क १४० शेषकरण्यास्तुल्यानि रूपकृतेः १४४ अपास्य शेषं ४ मूलं २ ऊनयुतरूपाणामर्द्धे जाते मूलकरण्यौ क ५ क ७ ।

मूलकरणीनां यथाक्रमं न्यासः—क ७ क ५ क ३ क २ ।

चतुर्थवर्गस्य न्यासः—रू १७ क १२८ क १२० क १०८ क ९६ क ६० क ४० क २० अत्र करणीखण्डानि सप्त वर्तन्ते ७ द्विगुणानि १४ रूपचतुर्थांशयुतम् ५७/४ अस्य सङ्कलितपदाभावः, यतः स्वबुद्ध्या इयं क १२८ चतुर्वर्गेण भक्ता लब्धं ८ चतुर्ण्णामसमे खण्डे ३।१ स्वघ्ने ९।१ पूर्वलब्ध्या ८ गुणिते करण्यौ क ७२ क ८ खण्डाष्टकेऽपि सङ्क-

---

$\therefore$ तृ क $= \sqrt{५}$

पुनस्तथैव $\dfrac{\sqrt{६} \times \sqrt{१५}}{\sqrt{१०}} = \dfrac{(\text{प्र. क.} \times \text{द्वि. क.}) \times (\text{द्वि. क.} \times \text{तृ. क.})}{\text{प्र. क.} \times \text{द्वि. क.}}$

$= \dfrac{\text{द्वि. क.}^{२} \times \text{प्र. क.} \times \text{तृ. क.}}{\text{प्र. क.} \times \text{तृ. क.}} = \text{द्वि क}^{२} = \sqrt{९} = ३ \; \text{द्वि क} = \sqrt{३}$

एवमागतानि करणीखण्डानि $\sqrt{२}, \sqrt{३}, \sqrt{५}$

अस्य वर्गतुल्यान्येव रूपाणि १० वर्गे वर्तन्त एव । $\therefore$ १०−१०=०

सिद्धत्यनेन यदि करणीखण्डतुल्यानि रूपाणि वर्गस्थितरूपतुल्यानि भवेयुस्तदा मूलं युक्तमेवेति ।

लितपदाभावः। अतः करणीयं क ९६ द्विवर्गेण ४ भक्ता लब्धं २४ द्विकस्य समे खण्डे १।१ पूर्वलब्ध्या २४ गुणिते करणीखण्डे क २४ क २४।

यथाक्रमं न्यस्ते जातम्—रू १७ क १२० क ७२ क ६० क ४८ क ४० क २४ क २४ क २० क १२ क ८ अत्र करणीखण्डदशकं वर्तते १० द (खण्डनवकेऽपि सङ्कलितपदाभावः। अतः करणीयं क १०८ षड्वर्गेण भक्ता लब्धं ३ षण्णामसमे खण्डे ४।२ अनयोर्वर्गौ १६।४ पूर्वलब्ध्या गुणितौ जाते करणीखण्डे क ४८ क १२) शानां सङ्कलितपदं ४ इयं खण्डसंख्या खण्डचतुष्टयस्यास्य क २४ क २० क १२ क ८ रूपकृतेः २८९ करण्यास्तुल्यानि रूपाण्यपास्य मूलम् १५ ऊनयुतरूपाणामर्द्धे करण्यौ क १ क १६ महतीरूपाणि १६ क १२० क ७२ क ६० क ४८ क ४० क २४ षण्णां करणीनां सङ्कलितपद ३ मितखण्डत्रयस्यास्य क ४८ क ४० क २४ तुल्यानि रूपाणि रूपकृतेरपास्य शेषं १४४ मूलं १२ ऊनयुतरूपार्द्धे करणीखण्डे क २ क १४ पुनर्महतीरूपाणि प्रकल्प्य रू १४ क १२० क ७२ क ६० करणीत्रये करणीद्वयस्यास्य क ७२ क ६० करण्यास्तुल्यानि रूपाणि रूपकृतेरपास्य मूलं ८ ऊनयुतरूपाणामर्द्धे करणीखण्डे क ३ क ११ पुनर्महतीरूपाणि रू ११ क १२० करणीतुल्यानि रूपाणि रूपकृतेरपास्य मूलं १ ऊनयुतरूपाणामर्द्ध जाते करणीखण्डे क ५ क ६।

अत्रोदाहरणं प्रथमप्रकारेण—

$११+\sqrt{७२}+\sqrt{४८}+\sqrt{२४}$

$\because$ १२१−(४८+२४)=१२१−७२=४९

अस्य मूलम् ७=राश्यन्तरम्।

$\therefore \frac{११\pm७}{२}$ ९, २ करणीखण्डे।

अत्र पुनर्महतीरूपाणि प्रकल्प्य पूर्ववत्क्रियाकरणेन ८१−७२=९ अस्य पदम्=३

$\frac{९\pm३}{२}$=६; ३ करणीखण्डे।

अतोऽत्र मूलम् $\sqrt{२}, \sqrt{३}, \sqrt{६}$

मूलकरणीनां यथाक्रमं न्यासः—क ६ क ५ क ३ क २ क १ ।

पञ्चमवर्गस्य न्यासः—रू ६० क २३०४ क १०२४ क ५७६ क २५६ क १४४ क ६४ ।

अत्र करणीषट्के करणीत्रयस्यास्य क २५६ क १४४ क ६४ करण्यास्तुल्यानि रूपाणि रूपकृतेः ३६०० अपास्य मूलं ५६ ऊनयुतरूपाणामर्द्धे करण्यौ क २ क ५८ महतीरूपाणि प्रकल्प्य रू ५८ क २३०४ क १०२४ क ५७६ करणीत्रये करणीद्वयस्यास्य क १०२४ क ५७६ करण्यास्तुल्यानि रूपाणि रूपकृतेः ३३६४ अपास्य मूलं ४२ ऊनयुत-रूपाणामर्द्धे मूलकरण्यौ क ८ क ५० पुनर्महतीरूपाणि प्रकल्प्य रू ५० क २३०४ कर-ण्यास्तुल्यानि रूपाणि रूपकृतेरपास्य मूलं १४ ऊनयुतरूपाणामर्द्धे मूलकरण्यौ क १८ क ३२ ।

करणीनां यथाक्रमं न्यासः—क ३२ क १८ क ८ क २ ।

अथवा वर्गराशे रूपं हित्वा सर्वकरणीभ्यो मूलानि रू ६० रू ४८ रू ३२ रू २४ रू १६ रू १२ रू ८ एषामैक्यं वर्गराशिः रू २०० मूलं ग्राह्यं राशेर्यस्य तु करणी-नाम तस्य स्यादिति करणीत्वात् ।

अथ द्वितीयप्रकारेण मूलानयनम्—

प्रथमवर्गस्य न्यासः—रू ५ क २४ अत्रैककरणीखण्डत्वाच्चतुर्भक्ता रू ५ क ६ आद्यासन्नद्वयहतिरित्याद्यासन्नेकरणीखण्डे न स्तः। करण्योर्घाते षट् ६ रूपाणि प्रकल्प्य

अथवा द्वितीयप्रकारेण ११, $\sqrt{\text{७२}}$, $\sqrt{\text{४८}}$, $\sqrt{\text{२४}}$

$\sqrt{\text{७२}}, \sqrt{\text{४८}}, \sqrt{\text{२४}} = \text{प्र क} \times \text{द्वि क} \times \text{४}, \text{प्र क} \times \text{तृ क} \times \text{४}, \text{द्वि क} \times \text{तृ क ४}$

चतुर्भिर्विभक्ता $\sqrt{\text{१८}}, \sqrt{\text{१२}}, \sqrt{\text{६}} = \text{प्र क} \times \text{द्वि क}, \text{प्र क} \times \text{तृ क}, \text{द्वि क} \times \text{तृ क}$

$$\therefore \frac{\sqrt{\text{१८}} \times \sqrt{\text{१२}}}{\sqrt{\text{६}}} = \frac{(\text{प्र क} \times \text{द्वि क})(\text{प्र क} \times \text{तृ क})}{\text{द्वि क} \times \text{तृ क}}$$

$$= \sqrt{\text{३६}} = \text{६} = \frac{\text{प्र क}^{\text{२}} \times \text{द्वि क} \times \text{तृ क}}{\text{द्वि क} \times \text{तृ क}} = \text{प्र क}^{\text{२}}$$

रू ६ योगे पञ्चयोगकृतेश्चतुराहतघातोनायाः पदं विवरमित्यन्तरं रू १ योगो द्विष्ठोऽन्तरयुतहीनस्तावर्द्धितौ च राशी स्त इति संक्रमणेन जाते खण्डे ३।२ एते एव मूलकरण्यौ क ३ क २। इति संक्रमणेन सिद्ध्यति।

द्वितीयवर्गस्य न्यासः—रू ११ क ७२ क ४८ क २४ चतुर्भक्ताः करण्यः रू ११ क १८ क १२ क ६ अत्राद्यासन्ने क १२ क ६ हतिः क ७२ आद्यया भक्ते क ४ मू २ अनया ते एव करण्यौ क १२ क ६ भक्ते जाते ते एव मूलकरण्यौ क ६ क ३।

मूलकरणीनां यथाक्रमं न्यासः—क ६ क ३ क २।

तृतीयवर्गस्य न्यासः—रू १७ क १४० क ८४ क ६० क ५६ क ४० क २४ चतुर्भक्ताः रू १७ क ३५ क २१ क १५ क १४ क १० क ६ आद्यासन्ने क २१ क १५ हतिः ३१५ आद्यया भक्ता ९ मूलं ३ इयं करणी क ३ अनया ते एव करण्यौ क २१ क १५ भक्ते जाते करण्यौ क ७ क ५ पूर्वया सह करणीत्रयं क ७ क ५ क ३ एभिः खण्डैः करण्योऽनल्पादिभिर्भाज्या इति न्यस्ते जातम् $\left|\begin{matrix}\text{क १४ क १० क ६}\\ \text{क ७ क ५ क ३}\end{matrix}\right|$ यथाक्रमं मूलकरण्यः क ७ क ५ क ३ क २ आसां वर्गाः क ४९ क २५ क ९ क ४ सर्वासां योगः क २८९ रूपकृतौ २८९ विशोधयेत्।

चतुर्थवर्गस्य पूर्ववद्विश्लेष्य चतुर्भक्तकरणीनां न्यासः—रू १७ क ३० क १८ क १५ क १२ क १० क ६ क ६ क ५ क ३ क २ अत्राद्यासन्ने क १८ क १५ हतिः क २७० आद्यया क ३० भक्ता ९ मूलं करणी क ३ अनया ते एव भक्ते क ६ क ५ जाते पूर्वया सह जाते पूर्वया सह जाताः क ६ क ५ क ३ शेषकरणीनां मध्ये विन्यस्य जातं

∴ प्र क = $\sqrt{६}$

एवम् $\frac{\sqrt{१२}\times\sqrt{६}}{\sqrt{१८}}=\sqrt{४}=२=$ तृ क'

∴ तृ क $=\sqrt{२}$

एवम् $\frac{\sqrt{१८}\times\sqrt{६}}{\sqrt{१२}}=\sqrt{९}=३=$ द्वि क'

| क १२ क १० क ६ | भक्ते जाता करणी क २ पूर्वया सह करणीचतुष्टयं क ६ क ५ क ३
| क ६ क ५ क ३ |

क २ पुनः शेषकरणीनां मध्ये विन्यस्य जातं | क ६ क ५ क ३ क २ / क ६ क ५ क ३ क २ | भक्ते लब्धं करणी क १।

मूलकरणीनां यथाक्रमं न्यासः—क ६ क ५ क ३ क २ क १ एतद्वर्गकरणीयोगं क २८९ रूपकृतेः २८९ विशोधयेत्।

पञ्चमवर्गस्य चतुर्भक्तस्य न्यासः—रू ६० क ५७६ क २५६ क १४४ क ६४ क ३६ क १६ आद्यासन्नद्वयहतिरित्यादिना प्राग्वन्मूलकरण्यः क ३२ क १८ क ८ क २ एतद्वर्गकरणीयोगं क ३६०० रूपकृतेर्विशोधयेत्।

अपि च—

प्रकृतिपुरन्दरनगरसगुणभुजतुल्याश्चतुर्गुणा विद्वन्।
वर्गे यत्र करण्यः स विश्वरूपाः पदं ब्रूहि ॥ २० ॥

न्यासः—रू १३ क ८४ क ५६ क २८ क २४ क १२ क ८ चतुर्भक्ता रू १३ क २१ क १४ क ७ क ६ क ३ क २ अत्राद्यासन्नहतिरादिहृता मूलं नास्त्यत एकविंशतिषण्मितकरण्योः क २१ क ६ वधे क १२६ चतुर्दशकरण्या क १४ भक्ते जातं ९ अस्य मूलं ३ करणीयं क ३ अनया एकविंशतिषट्करण्यौ भक्ते जातं क ७ क २ यथाक्रमं क ७ क ३ क २ शेषकरणीनां मध्ये विन्यस्य जातम् | क ७ क ३ क २ / क ७ क ३ क २ | भक्ते जाता करणी क १

मूलकरणीनां यथाक्रमं क ७ क ३ क २ क १ अथवा एकविंशतित्रिकरण्योर्घाते क ६३ सप्तकरण्या क ७ भक्ते मूलं करणी क ३ अनया भक्ते करण्यौ क ७ क ३ यथाक्रमं क ७ क ३ क १ शेषकरणीनां मध्ये विन्यस्य जातम् | क १४ क ६ क २ / क ७ क ३ क १ | भक्ते जाता करणी

∴ द्वि क = $\sqrt{३}$

अतोऽत्र मूलम् $\sqrt{६}$, $\sqrt{३}$, $\sqrt{२}$

एतस्य रूपैस्तुल्यरूपं वर्गोऽस्त्येव।

तेन वास्तविकमिदं मूलम्।

इत्थं च प्रकारद्वयमध्ये कमपि प्रकारमाश्रित्यान्योदाहरणान्यपि सुगमानि।

क २ मूलकरणीनां यथाक्रमं क ७ क ३ क २ क १ चतुर्दशद्विकरण्योर्घाते २८ सप्तकरणी-भक्ते मूलं करणी क २ त एव तया भक्ते करण्यौ क ७ क १ यथाक्रमं क ७ क २ क १ शेषकरणीनां मध्ये विन्यस्य जातम् | क २१ क ६ क ३ / क ७ क २ क १ | भक्ते जाता करणी क ३ यथाक्रमं क ७ क ३ क २ क १।

इत्याद्यैर्नायं मूलक्रमो विस्तारितः। इदानीमस्माभिर्बालावबोधार्थं सुगमः कृतः। यदि सङ्कलितपदमितखण्डेभ्यो न्यूनाधिकानि भवन्ति तदा विश्लेष्य संयोज्य मूलं ग्राह्यम्।

[1]सङ्कलितपदोत्थितयाऽल्पयाऽब्धिहतयाऽपवर्त्तो यासाम्।
रूपकृतेस्ता विशोध्या अपवर्तफलाः करण्यः स्युः ॥ ५१ ॥
शेषविधिना न यदि तास्तदसन्मूलं तदा भवति।

उदाहरणम्—

वसुरसनेत्रप्रमिता यत्र करण्यश्चतुर्गुणा वर्गः।
युक्तारूपैर्दशभिस्तत्र पदं ब्रूहि मे गणक ॥ २१ ॥

न्यासः—रू १० क ३२ क २४ क ८।

---

१. सङ्कलितपदोत्थितयेति। यदा केनचिदुक्तनियमेन यथा मूलमायाति तथा रूपाणि करणीश्च कल्पयित्वा यदि पृच्छ्यते तदा तदुदाहरणं शुद्धमशुद्धं वेति ज्ञानार्थमुक्तम्—"सङ्कलितपदोत्थितया" इति। अत्राल्पया प्रथमकरणी लक्ष्यते। यतः प्रथमकरणीशेषकरणीघातश्चतुर्गुणः शोध्यते, अतो या विशोधितास्तासामाद्यया चतुर्गुणयाऽपवर्तः स्यादेव। यद्यपवर्तो न भवेत्तदा तदुदाहरणमशुद्धमेव।

यथोदाहरणम्—१०, $\sqrt{३२}$, $\sqrt{२४}$, $\sqrt{८}$

अत्र वर्गे करणीत्रितये करणीद्वितयस्य तुल्यानि रूपाणि प्रथमं रूपकृतेरपास्य मूलं ग्राह्यं पुनरेकस्या एवं कृतेऽत्र पदाभावः।

यद्यनियमेन सर्वकरणीतुल्यानि रूपाणि विशोध्य मूलमानीयते तदापि मूलकरण्यौ $\sqrt{२}$, $\sqrt{८}$ तदिदमप्यसत्। यतोऽस्य वर्गः १८ वा १०+$\sqrt{६४}$।

अत्र सङ्कलितपदस्य करणीखण्डद्वयस्य तुल्यानि रूपाण्यपास्य मूलं ग्राह्यम्। पुनरेकस्य। एवं क्रियमाणे मूलं नास्त्यतोऽस्य करणीगतमूलाभावः। अथानियमेन सर्वकरणीतुल्यानि रूपाण्यपास्य मूलं ६ ऊनयुतरूपाणामर्द्धे मूलकरण्यौ क २ क ८ अस्य वर्गोऽयं रू १८ अथवा द्वात्रिंशदष्टमितकरण्योर्योगं कृत्वा न्यासः—रू १० क ७२ क २४ करण्योस्तुल्यानि रूपाणि रूपकृतेरानीय जाते—रू २ क ६। अस्य वर्गः—रू १० क ९६ अतोऽसत्।

उदाहरणम्—

षष्टिर्द्विपञ्चाशद्द्वादशकरणीत्रयं कृतौ यत्र।
दशभी रूपैर्युक्तं तत्र सखे किं पदं ब्रूहि॥ २२॥

रू १० क ६० क ५२ क १२।

अत्र सङ्कलितपदमितस्य करणीद्वयस्यास्य क ५२ क १२ करण्यास्तुल्यानि रूपाण्यपास्य मूलं ६ अतो जाते करण्यौ क २ क ८ अल्पयानया २ चतुर्गुणया क ८ द्विपञ्चाशद्द्वादशमितयोरपवर्त्तनं न स्यादतस्ते न शोधितव्ये। यत उक्तं सङ्कलितपदोत्थितयाल्पया चतुर्गुणयेति। अत्राल्पयेत्युपलक्षणं तेन क्वचिन्महत्यापि।

यथा— १००−२४ + ८ = ८४ नास्य मूलम्।

१००−३२ + ८ = ७६ अस्मान्मूलं न लभ्यते।

१००−२४ + ३२ = १०८ मूलं न प्राप्यते।

१००−३२ + २४ + ८ = ३६ अस्य मूलं ६

$\therefore \frac{१० \pm ६}{२} = \sqrt{८}, \sqrt{२}$ इदमसत्, यतोऽस्य वर्गः $(\sqrt{८}+\sqrt{२})^२$

$= ८ + २ + \sqrt{६४} = ८ + २ + ८ = १८$।

अथवा $\sqrt{८} + \sqrt{३२} = \sqrt{७२}$ एवं योगं विधाय मूलमानीयते

तदा १०, $\sqrt{७२}, \sqrt{२४}$

१००−७२ + २४ = ५२ अस्य मूलम् २।

$\frac{१० \pm २}{२} = \sqrt{६}, \sqrt{४}, = \sqrt{६}, २$ इदमप्यसत्, यतोऽस्य वर्गः १० $\sqrt{९६}$।

उदाहरणम्—

तिथिमनुनयनकरण्यश्चतुर्गुणा रूपदशकसंयुक्ताः ।
किं मूलं ब्रूहि सखे करणीगणिते श्रमोऽस्ति यदि ॥ २३ ॥

न्यासः–रू १० क ६० क ५६ क ८।

अत्र करणीखण्डद्वयादस्मात् क ५६ क ८ उत्पन्ने करण्येते क २ क ८ अल्पया चतुर्गुणया क ८ अनयापवर्त्ते कृते लब्धकरण्यौ क ७ क १ यथाक्रमं क ७ क २ क १ शेषविधिना उत्पन्ने करणीखण्डे क ३ क ५ यथाक्रमं क ५ क ३ क २ एताः पूर्वकरणी-खण्डैरेभिः क ७ क २ क १ तुल्या न स्युरित्यसत् ।

उदाहरणम्—

तिथिमनुरविविश्वककुभ्नगसंख्याः कृतहताः करण्यश्चेत् ।
षोडशरूपसमेता यत्र कृतौ तत्र किं पदं कथय ॥ २४ ॥

न्यासः–रू १६ क ६० क ५६ क ४८ क ५२ क ४० क २८ ।

द्वितीयोदाहरणम्—

१०, √६०, √५२, √१२

अत्रापि करणीद्वयतुल्यरूपाण्यपास्योक्तनियमेन—

१००–(५२ + १२) = १००–६४ = ३६ अस्य मूलम् ६ ।

$\frac{१० \pm ६}{२}$ । मूलकरण्यौ √८, √२

अत्राल्पया २ चतुर्गुणया ८। द्विपञ्चाशद्द्वादशमितयोरपवर्तौ न स्यादतस्ते न शोध्ये । यत उक्तं सङ्कलितपदोत्थितयाल्पया चतुर्गुणयेति ।

तृतीयोदाहरणम्—

१० √६०, √२४, √८

अत्रापि करणीत्रितये करणीद्वितयस्य नियमात् ८ + २४ आभ्यां क्रियाकरणेन १००–६४ = ३६ अस्य मूलम् ६ ।

$\frac{१० \pm ६}{२}$ = ८, २ अत्र मूलकरण्यौ √८, √२

अल्पया २ चतुर्गुणया ८ अनयाऽपवर्ते कृते √७, √१

अत्र सङ्कलितखण्डत्रयस्यास्य क ५६ क ५२ क ४८ पश्चात्खण्डद्वयस्यास्य क ६० क २८ पश्चादस्यैकस्य क ४० तुल्यानि रूपाण्यपास्येत्यादिना मूलकरण्यः क १० क ३ क २ क १ अथवा आदौ खण्डत्रयं पश्चात्खण्डद्वयं पश्चादेकमिति नियमः। क आदावेकं क ६० पश्चाद् द्वे एते क ५६ क ४८ पश्चात् त्रीण्येतानि क ५२ क ४८ क २८ तुल्यानि रूपाणीत्यादिना खण्डान्युत्पन्नानि। क १० क ३ क २ क १। एवमतो मूलमेतदिति एवं [करण्यं ते ? करण्य इति] चेत्, अस्य वर्गः–रू १६ क १२० क ८० क ४० क २४ क १२ क ८ अयमुदाहृतो वर्गः स्यात् । अतोऽसत् ।

वर्गराशिमूले गृहीते तन्मूलस्य वर्गः पूर्ववर्गतुल्यो न चेत्तन्मूलमसदिति सर्वत्र करणीनामासन्नमूलकरणेन मूलान्यानीय रूपेषु प्रक्षिप्य मूलं वाच्यम् ।

सूत्रम्—

[1]वर्गे क्षयात्मिका चेत्तामपि धनात्मिकां कृत्वा ॥ ५२ ॥
मूलं ग्राह्यं तयोः क्षयात्मिकैका भवत्येव ।

शेषविधिना $\sqrt{८}$ महतीं प्रकल्प्य ६४–६० = ४ अस्य मूलम् २ ।

$\frac{८ \pm २}{२}$ मूलकरण्यौ $\sqrt{५}$, $\sqrt{३}$

यथाक्रमं न्यासः $\sqrt{५}$, $\sqrt{३}$, $\sqrt{२}$

एता मूलकरण्यः पूर्वकरणीखण्डैरेभिः $\sqrt{७}$, $\sqrt{२}$, $\sqrt{१}$ समा न स्युस्तस्मान्मूलमसदिति बोध्यम् । अनेनेदमप्यवगम्यते यदि धृष्टतरेण प्रथमशोध्यकरण्यस्ता एव तादृश्योऽन्या वा स्थापिताः । परतस्तु याः काश्चन युक्त्या स्थापितास्तदा तदुदाहरणस्य शुद्धत्वाशुद्धत्वबोधार्थम्—"अपवर्तफलाः करण्यः स्युः" इत्यादिकथनं युक्तमेव । यतः—"चतुर्गुणान्त्यनिघ्नाः" इत्यत्र चतुर्गुणकरणीशेषं करणीघातोऽस्ति । तत्र चतुर्गुणप्रथमकरण्यापवर्ते मूलकरण्य एव लभ्या इति मूलकरण्योऽपवर्तादेव ज्ञाताः । यदि तु शेषविधिना ता न भवन्ति तदा शेषकरणीनां दुष्टत्वात्तदुत्पन्नमूलमप्यसदिति ।

१. वर्गे क्षयात्मिका चेदिति। यदि वर्गे ऋणात्मिका करणी स्यात्तर्हि तां धनात्मिकां विधाय मूलं ग्राह्यम् । आगतमूलकरण्योर्मध्ये एका करणी ऋणात्मिका ज्ञेया । परन्तु यदि करणीवर्गे एकैव क्षयकरणी स्यात्तदैव एकस्या मूलकरण्याः क्षयत्वं बोध्यम् । यदि द्व्यादयो भवन्ति

पूर्वोक्तत्र्यात्मकवर्गस्य मूलार्थं न्यासः—रू ८ क ६०̇ अत्र करणीं धनात्मिकां कृत्वा न्यासः रू ८ क ६० प्राग्वन्मूलं रू ५ क ३ एतयोरेका ऋणं क ५ क ३̇ वा क ५̇ क ३।

द्वितीयस्य न्यासः रू १० क ६० क ४०̇ क २४̇ अत्रर्णकरण्यौ धनं प्रकल्प्य प्राग्वन्मूलकरण्यः क ५ क ३ क २̇ वा क ५̇ क ३̇ क २ अथवा त्रिमितकरण्यां ऋणं कल्पितायां क ५ क ३̇ क २ अस्य वर्गः रू १० क ६०̇ क ४० क २४̇ एषां वर्ग उद्दिष्टः समो न स्यात्तन्मूलमतोऽसद् उद्दिष्टवर्गराशेर्मूलराशिवर्गो यथा समः स्यात्तथा धनर्णं कल्प्यम्। इति करणीषड्विधम्।

तदेवं षट्त्रिंशत्परिकर्माणि समाप्तानि ॥

॥ अथ [1]कुट्टकः ॥

भाज्यो हारः क्षेपकः केनाप्यपवर्त्य कुट्टकस्यार्थम्।
येन विभाज्यच्छेदौ क्षेपो न तेन खिलम् ॥ ५३ ॥

तदा द्वयोर्बहूनां वा क्षयत्वं मूलकरणीयुक्त्या चिन्तनीयम्। ऋणकरणीवर्गः, धनकरणीवर्गस्तु तुल्यमेव नास्त्यत्र कश्चिद्भेदः। परन्तु ऋणकरणीवर्गे करणी ऋणात्मिका भवति तथा धनकरणीवर्गे धनात्मिका भवतीत्येव विशेषः। तथा सति वर्गे करणी धनात्मिका ऋणात्मिका वा भवतु मूलं त्वङ्कतः सममेव युक्तम्। उक्तरीत्या रूपवर्गात् क्षयकरणीशुद्धौ संशोध्यमानमृणं स्वत्वमेतीति योग एव। रूपकृतेर्धनकरणीशुद्धौ संशोध्यमानं स्वमृणत्वं गच्छतीत्यन्तरं भवेत्। अन्तरे च मूलाङ्कसिद्धिरुक्तैव। अतो धनात्मिकां तामृणकरणीं प्रकल्प्य मूलं ग्राह्यमित्युक्तम्। परन्त्वागतं मूलं धनवर्गस्यैव भविष्यत्यतस्तयोर्मध्येऽभीष्टैका क्षयात्मिका कल्प्येति।

उदाहरणम् ८, $-\sqrt{६०}$, अत्र ऋणात्मिकां करणीं धनात्मिकां प्रकल्प्योक्तरीत्या मूलम्

२

६४−६०=४ अस्य मूलम् $\frac{८\pm२}{२}=\sqrt{५}$, $\sqrt{३}$ एतयोरेका ऋणम् $-\sqrt{५}$, $\sqrt{३}$ वा $\sqrt{५}$, $-\sqrt{३}$ एवमग्रेपि।

1. कुट्टकः=हिंसार्थककुट्टधातोः कर्तरि ण्वकः। कुट्टको नाम गुणकः। अर्थाद्येन गुणकेन गुणितो

हरभाज्ययोर्विहृतयोरन्योन्यं यो भवेद्ययोः शेषः ।
स तयोरपवर्तनकृत्तेनैवापवर्तितौ तु दृढौ ॥ ५४ ॥
दृढभाज्यहरौ विभजेत्परस्परं यावदेकमवशेषम् ।
विन्यस्याधोऽधस्तात्फलानि तदधस्तथा क्षेपम् ॥ ५५ ॥
तदधः खमुपान्त्येनाहते निजोर्ध्वेऽन्तिमेन संयुक्ते ।
अन्त्यं जह्यादेवं यावद्राशिद्वयं भवति ॥ ५६ ॥

राशिर्दिष्टक्षेपेण युतः प्रश्नोद्दिष्टहरेण भक्तो निःशेषो भवति, तस्य गुणकस्य कुट्टक इति संज्ञा आचार्यैरुक्ता । आदौ गुणकमानेतुं (कुट्टकार्थं) केनापि समेनाङ्केन भाज्यो हारः क्षेपकश्च प्रत्येकमपवर्त्यः । येन समेनाङ्केन भाज्यो हारश्चापवर्तितस्तेनैव यदि क्षेपो न छिद्येत्तदा तन्न युक्तम् । ययो राश्योः परस्परं भाजितयोर्योऽङ्कः शेषो भवति स एव तयो राश्योरपवर्तनाङ्कः स्यात् । तेनापवर्तनाङ्केनापवर्तितौ भाज्यहारौ दृढसंज्ञकौ भवतः । तेनैवापवर्तनाङ्केनापवर्तितः क्षेपोऽपि दृढसंज्ञको भवति । एवमागतौ दृढभाज्यहारौ परस्परं तावद्विभजेद्यावद् भाज्यस्थाने एकमितशेषं भवति । परस्परभजनेषु लब्धानि फलान्यधोऽधः स्थापितानि । फलाधो दृढक्षेपोऽपि स्थाप्यः, क्षेपाधः खं स्थापनीयम् । एवमेका वल्ली (पंक्ति) भवेत् । तत उपरितनाङ्केनान्तस्योर्ध्वस्थितेऽङ्के गुणितेऽन्तिमाङ्केन युते सति तदन्त्यं त्यक्त्वा मुहुर्मुहुरेवं क्रियाकरणेन ऊर्ध्वाधस्थं क्रमेण लब्धिगुणसंज्ञकं राशिद्वयं स्यात् । तत ऊर्ध्वस्थितो राशिर्दृढेन भाज्येन भाजितः फलं (लब्धिः) स्यात् । अधःस्थितो राशिर्दृढेन हारेण विभाजितो गुणको भवेत् ।

यदि लब्धयः समाः, अर्थाद् द्विचतुःषडित्यादयो भवेयुस्तदा यथागते गुणलब्धी भवतः। यदि ता लब्धयो विसमाः स्युस्तदाऽऽगतौ लब्धिगुणौ स्वतक्षणाद्विशोधनीयाविति । अर्थाल्लब्धिर्दृढभाज्याद्विशोध्या, गुणकश्च दृढहाराद्विशोध्यः । इष्टाङ्केन गुणितौ स्वतक्षणाभ्यां युतौ बहुधा गुणाप्ती भवतः ।

तक्षणे क्रियमाणे सर्वदैवोभयत्र समं फलं ग्राह्यम् । न न्यूनाधिकमित्यर्थः । समीकरणादिनाप्युपपत्तिरतिसुगमास्य ।

यथा—यदि गुणकः = गु । भाज्यः = भा । हारः=हा । लब्धिः = ल । क्षेपः = क्षे ।

तदा $ल = \dfrac{भा \times गु \pm क्षे}{हार}$

$\therefore हा \times ल = भा \times गु \pm क्षेप$

हा०, गु०, ल०, क्षे०, भा०, इत्थं कुट्टके सर्वदैव पञ्च वस्तूनि भवन्ति ।

हरभाज्याभ्यां तष्टावधरांध्वौं ते क्रमेण गुणलब्धी ।
यदि लब्धयः समाः स्युस्तदा गुणाप्ती यथागते भवतः ॥ ५७ ॥
विषमाश्चेत्ते शोध्ये गुणलब्धी स्वतक्षणाच्छेषे ।
योगभवे गुणलब्धी निजतक्षणतो विशोधिते क्षेपजे ॥ ५८ ॥
इष्टघ्नतक्षणयुते बहुधा भवतो गुणाप्ती ते ।
सर्वत्र कुट्टकविधौ कार्यं समतक्षणं सुधिया ॥ ५९ ॥

उदाहरणम्—

राशिस्त्रिसप्ततियुतेन शतद्वयेन निघ्नो नवोनितशतेन युतश्च कोऽपि ।
भागं प्रयच्छति विशुद्धमगाब्धिनेत्रैर्भक्तः सखे कथय तं गुणकं फलं मे ॥ २५ ॥

तत्र हा०, भा०, क्षे० एतानि त्रीणि ज्ञातानि भवन्ति । शेषं वस्तुद्वयं (ल०, गु०) चाज्ञातं भवति ।

∴ हा × ल = भा × गु ± क्षेप

इत्यत्र समेनाङ्केन गुणने भजने वा पक्षयोः समतैव ।

अतो भाज्यो हारः क्षेपकश्च केनापि समेनाङ्केनापवर्त्य इति युक्तमेव ।

ज्ञातेषु भाज्यहारक्षेपेषु यदि भाज्यहारावपवर्त्येते क्षेपश्च नापवर्त्यते तदा तुल्यत्वासंभवात्तेन भाज्यच्छेदौ न तेन क्षेप इत्यादि कथनमपि साधु । पूर्वमेवोक्तम् भा×गु ± क्षे = = हा × ल पक्षयोर्यदि इ० भा० हा० युज्यते ।

तदा इ० भा० हा० + भा० गु ± क्षे० = इ० भा० हा + हा० ल० ।

= भा (गु० + इ० भा०) ± क्षे = हा (ल० + इ० भा०) ।

अत्र यदि इ = इष्टाङ्क = १

तदा भा० (गु० + १ × भा०) ± क्षे० = हा० (ल+१×भा)

= भा (गु+भा०) ± क्षे० = हा (ल+भा०)

अत्र यदि लब्धयो विषमास्तदा गुणलब्ध्योर्ऋणत्वं प्रजायते (धनर्णयोरन्तरमेव योग इत्यादिना) ।

∴ भा (इ० हा०−गु०) = हा० (भा०−ल०)

अतो विषमाश्चेत्ते गुणलब्धी स्वतक्षणाच्छोधिते योगभवे गुणलब्धी भवत इत्युक्तमाचार्येण ।

दैवज्ञश्रीरङ्गनाथभट्टविरचितः

सिद्धान्तचूडामणिः

[सटिप्पणः]

[१ख] लक्ष्मीशं धरणीधराश्रितपदं चात्यक्तवेलास्थितिं
श्रीविद्याधरसेवितं पृथुकृपासिन्धुं सदानन्ददम् ।
दोषध्वस्तितदुष्कृतं द्विजपतिश्रीवर्द्धनं सद्गुरुं
तीर्थानामधिपं दिवाकरमहं वन्दे मुदा सर्वदा ॥ १ ॥

सिद्धान्तसिद्धान्तकलाकलापचूडामणिं श्रीकमलाकराख्यम् ।
नत्वा नृसिंहात्मजरङ्गनाथः सिद्धान्तचूडामणिमातनोति ॥ २ ॥

[अथाहर्गणं साधयति]—

[१५६५] बाणाङ्गतिथ्यूनशकः समौघो [१२] दिवाकरघ्नो गतमासयुक्तः ।
पृथग् [२] द्विनिघ्नः पृथगङ्क[९१९]चन्द्रनन्दैर्हृतस्तेन विहीनकोर्ध्वात् ॥ ३ ॥

---

१. अस्य ग्रन्थस्य प्रणेता श्रीमद्दैवज्ञवर्यनृसिंहात्मजः श्रीमदाचार्यरङ्गनाथः । श्रीमद्दिवाकरकमलाकरेतिसहोदरद्वयाधीतज्यौतिषविद्यः १५६२ शककालेऽमुं करणाकरं ग्रन्थं व्यरचयत् । अस्य सिद्धान्तचूडामणिग्रन्थस्य रचना प्रसिद्धसूर्यसिद्धान्तानुसारिणी वर्तते । आचार्येण दिवाकरकृतजन्मवर्षपद्धत्योष्टीके, भङ्गीविभङ्गी-लोहगोलखण्डन-पलभाखण्डन-वासनादयो लघुग्रन्थाश्च निर्मिताः । सिद्धान्तचूडामणेरेक एव हस्तलेखः सरस्वतीभवन-पुस्तकालये समुपलभ्यते । तदाधारेणैवायं ग्रन्थः संपाद्यते साम्प्रतम् । विशेषश्च भूमिकायां वक्ष्यते ।

अघोऽधः [को ? सोऽर्थः] त्रिधा स्थाप्यः ।

६५ ३०
शराङ्गसंप्राप्तयुतस्तदूर्ध्वः खरामनिघ्नो गततिथ्यहीनः ।

७०८
स्थाप्यस्त्वधोऽधो भुजगाभ्रपृथ्वीधरैरवाप्तेन युतोर्ध्वकाङ्कात् ॥ ४ ॥

६४
वेदाङ्गलब्धेन तदूर्ध्वकाङ्को हीनो 'द्युवृन्दं सितवासराद्यम् ।

कदाचिदेतत्किल घस्रवृन्दं सैकं निरेकं सुधिया विधेयम् ॥ ५ ॥

[अथ क्षेपकानाह [२]]—

११ ६ ४५ १६
क्षितिभुवो निधयः शरसागरा निधिकलानिधयस्तु दिवामणौ ।

११ १८ १० ४७
शशिधरा धृतिरभ्रधरा धराधरयुगानि भवन्ति कलानिधौ ॥ ६ ॥

२ २३ २६
क्षितिसुते तु यमौ ज्वलनाश्विनो निधियमाः सितभानुसितांशवः ।

३ २६ ५६ ६
कुमुदिनीशसुते गुणसंमिताः खगकराः खगबाणमिताः खगाः ॥ ७ ॥

११ १३ २६ १४
[२क] चन्द्रेन्दवो रामभुवोऽङ्गपक्षा वेदेन्दवश्चित्रशिखण्डिसूनौ [३] ।

६ १ ३६ ३१
अङ्गानि रूपं निधिपावकाश्च चन्द्राग्नयो दानवपूज्यतुङ्गे ॥ ८ ॥

११ १७ १५ ३२
मार्तण्डसूनौ खलु नीलकण्ठाः सप्तेन्दवः पञ्चभुवोऽक्षिरामाः ।

४ ६ ३ ४३
पाथोधयो व्योमचरा हुताशा हुताशवेदा जडरश्मितुङ्गे ॥ ९ ॥

६ १२ ० ३
पाते रसाऽर्काभ्रगुणा भवेयुः क्षेपा ग्रहाद्याः कथिता इतीमे ।

स्वक्षेपयुक्ताः खचरा भवन्ति निशीथजा रावणराजधान्याम् ॥ १० ॥

---

१. अत्राहर्गणानयन आचार्येण ग्रन्थारम्भकालिकाधिमासावमशेषके त्यक्ते । अहर्गणानयनोपपत्तिः—"शकः पञ्चदिक्चन्द्रहीनोऽर्कनिघ्नः" इत्यादिकरणकुतूहलोक्तपद्यवद्बोध्या ।

२. "रुद्रा गोब्जाः कुवेदाः" इत्यादिगणेशदैवज्ञोक्त्या वासना ज्ञेया ।

३. गुरावित्यर्थः । "जीव आङ्गिरसो वाचस्पतिश्चित्रशिखण्डिजः" इत्यमरः ।

[ग्रहाणां क्षेपाः]—

पा	सू	चं	मं	बुउ	गु	शुउ	श	चंउ
६	११	११	२	३	११	६	११	४
१२	६	१८	२३	२६	१३	१	१७	६
०	४५	१०	२६	५६	२६	३६	१५	३
३	१६	४७	११	६	१४	३१	३२	४३

[अथाहर्गणाद् ग्रहसाधनम्]—

३१ ११३२३
कलानिधिगुणैर्गुणो गुणकराग्निभूभूहृतो

गणो भगणपूर्वकद्युमणिशुक्रसोमात्मजाः ।

८६२६
दिवागणरसाक्षिगोगजलवाप्तलिप्तोनिता -

अलोच्चमिदमर्कजक्षितिजगीष्पतीनां भवेत् ॥ ११ ॥

६०० १६३६२
खखाङ्कगुणितो गणो गुणनवाग्नितर्केन्दुहृद्

४६१०
विधुर्गणदशाङ्कसागरलवाप्तलिप्तोनितः ।

३२३२
कराग्निकरवह्निहृद्दिनगणो[ज्य?ऽब्ज]तुङ्गं भवेद्

५१६३
गुणाङ्कशशिवाणहृद्दिनगणाप्तलिप्तोनितम् ॥ १२ ॥

६७६४
कृताङ्कमुनितर्कहृद्दिनगणो[ज्व?ब्ज]पातो भवे-

५३४५
च्छराब्धिगुणवाणहृ [२ ख] द्दिनगणाप्तलिप्तोनितः ।

६८७
धराधरगजाङ्कहृद्दिनगणः कुजोऽयं गणा-

८७१६
द्धृताम्नय[धरा]धराधरगजैः कलाद्यन्वितः ॥ १३ ॥

१०० ८७९७
खखेन्दुगुणितो गणोऽद्रिनवसप्तनागैर्हृतो

१२०३
बुधोच्चमनलाभ्रनेत्रसितभानुभक्ताद् गणात् ।

२८८
अवाप्तकलिकान्वितं विकलिकासु नागाष्टदृग्

६०
विनिघ्नगतवर्षपूर्णरसभागयुक्तं च तत् ॥ १४ ॥

१० ४३३२३
गणो दशगुणो गुरुर्गुणकराग्निरामाब्धिहृ-

४२०७५
च्छराद्रिकृतिवेदहृद्दिनगणाप्तलिप्तोनितः ।

१४४ ६०
गुणा युगयुगेन्दुभिर्गतसमाः खतर्कैर्हृताः

फलं विरहितं गुरोर्विकलिकासु कुर्याद् ध्रुवम् ॥ १५ ॥

५०० ११२३४९
खखाशुगगुणो गणो नवयुगाग्निसूर्येन्दुहृत्

४११९
सितोच्चमिदमङ्कचन्द्रशशिवेदभक्ताद्गणात् ।

२१६
अवाप्तकलिकोनितं विकलिकासु तर्केन्दुदृग्

६०
विनिघ्नगतवर्षपूर्णरसभागहीनं च तत् ॥ १६ ॥

१०७६६
तर्काङ्गसप्तदशभक्तगणः शनिः स्यात्

२३६४६
तर्काब्धितर्कगुणनेत्रहृताद् दिनौघात् ।

२१६
लिप्तादियुक्त इति तर्कमहीद्विनिघ्न-

६०
वर्षाभ्रतर्कलवयुक् च विलिप्तिकासु ॥ १७ ॥

अथान्यः सुगम प्रकारः[1]—

४
[2]समासमाजः श्रुतिहृद्दिनानि द्विघ्नानि नाड्यस्त्रिगुणा विनाड्यः ।
समासमाजेन युतानि तानि दिनान्ययं वारमुखः समेशः ॥ १८ ॥

२३६० २३६० ६५७ २१६
[3]खखगाग्नियमा खखगा[३ क] ग्नियमा नगबाणखगाः खगसोमयमाः ।
१२१४ १३५१२ ६१ १६२७ ११६१
युगभूद्विभुवोऽर्कशराग्निभुवः कुरसा मनूपाः शशिभूपभुवः ॥ १९ ॥

२१६ १८ ५ ४ ४०
गुणकाः कथिता अथ षट्कुयमाः धृतयः पवनाः श्रुतयः खकृताः ।
६० ५ ४० ६०
गग[ना?नां] गमिता विशिखाः खकृता गगनाङ्गमिताः क्रमशश्च हराः ॥ २० ॥

५ १७ ४७ ३०
[4]बाणाः सप्तभुवश्च पर्वतकृताः पूर्णाग्नयोऽब्दाधिपे
२१ ३४ ३३ ३३
शुद्धौ सोमयमाः पयोधिदहना देवाः सुराः शीतगौ ।
८ १८ ४६ ४७
नागा नागभुवोऽङ्कवारिनिधयः सप्ताब्धयो भूमिजे
३ ४ १५ ३ ६ २४
रामा वारिधयो दिनानि दहना बौधोच्चके षड् जिनाः ॥ २१ ॥

---

१. भास्करीयप्रत्यब्दशुद्धेरनुरूपोऽयमुपक्रमः ।

२. अत्र तत्त्वविवेकोपजीव्यसूर्यसिद्धान्तमतेनैकस्मिन् वर्षे सावनदिनानि
= ३६५।१५।३१। ३१।२४।
पञ्चसिद्धान्तिकोपजीव्यसूर्यसिद्धान्तमते तु ३६५।१५।३१।३०।
आचार्योक्तस्वरूपावलोकनेनैतद्वर्षमानम् = ३६५।१५।३०।४५ परमेतच्छास्त्रविरुद्धम् ।
अतोऽत्र—''नाड्यस्त्रिगुणाः'' इत्यत्र, ''नाड्योऽरिगुणाः'' इति पाठे कृते पञ्चसिद्धान्तिकोक्तवर्षमानादब्दपानयनं सम्यग् घटते । तथा च—''त्रिगुणा विनाड्यः'' अत्र लिङ्गविपर्ययत्वमपि वर्तते । तत्—''समासमाजः श्रुतिहृद्दिनानि साङ्गानि रूपाद्विरसैर्हतानि'' इति पाठान्तरे कृते शुद्धयति ।

३. अनुपातेनैकवर्षसंबन्धिलवादिकग्रहेषु ग्रन्थोक्तक्रमत एते गुणहरा भवन्ति ।

४. ग्रन्थारम्भीयसौरवर्षमुखे क्षेपकाः ।

२ ३९ ११ १५ ८ ३८
दस्रौ नन्दगुणा गुरौ शिवदिनाष्टाष्टाग्नयः स्युः सिते
७ ४ ३४ ४ ११
शैला वारिधयः समुद्रदहना वेदाः शनौ भूभुवः ।
१७ ५६ ४५
शैला [ज्वा ? ब्जा] रसपञ्च पञ्चश्रुतयः पाते भवेत् क्षेपकः ॥ २२ ॥

ग्रहाः	अब्दपतिः	शुद्धिः	चं	मं	बु	गु	शु	श	चंउ	पातः
गुणकाः	०	२३९०	२३९०	५९७	२१९	१२१४	१३५१२	६१	१६२७	११६१
हराः	०	२१६	१८	५	४	४०	६०	५	४०	६०
क्षेपकाः	५	२१	८	३	६	११	७	११	४	६
	१७	३४	१८	४	२४	१५	४	१७	११	३
	४७	३३	४९	१५	२	८	३४	५६	२२	४
	३०	३३	४७	३	३९	३८	४	४५	५३	०

समासमाजो निजहारहार्य्यो गुणैर्गुणः क्षेपकयुक्समान्ते ।
शुद्धीन्दुभूजेन्दुज [३ ख] देवपूज्यसितासितेन्दूच्चकचन्द्रपाताः ॥ २३ ॥
तिथ्यादिका स्यात्परिशुद्धिरत्र लवादिकास्ते गगने चराः स्युः ।
एतैर्गणोत्थाः सहिता विधेया मध्याः खगा औदयिका भवन्ति ॥ २४ ॥
चैत्रादियातास्तिथयः समेशनाडीविहीना [1]विगततुंहीनाः ।
विशुद्धितिथ्या च विहीनिता स्याद्दिवासमूहोऽब्दपवासराद्यः ॥ २५ ॥

---

१. अयं दिवासमूहो भास्करीयलघ्वहर्गणानुरूपः । अत्र—"विगततुंहीनाः" इत्यत्र "अवमैर्वियुक्ताः" इति पाठान्तरेण स्पष्टावगमः ।

'दिनमणिर्द्युगणोऽशमुखो भवेद् द्युगणहीनकलो द्युगणाद् गुणैः[३] ।
परिहृतात्तु विलोचनलोचनैः[२२] परिहृतात्कलिकादिफलान्वितः ॥ २६ ॥
रामचन्द्र[१३]गुणितो दिनसङ्घो द्विष्ठ एष दिनसङ्घविशेषः ।
सर्पतर्क[६८]विहृतः फलयुक्तश्चन्द्रमा भवति भागमुखोऽसौ ॥ २७ ॥

पूर्वाहर्गणेन द्विष्ठः, अन्तरं कार्यं हरेण ६८ भक्तं अंशादि ५ ।

दिनगणो निधि[६]हृल्लवपूर्वकं कुमुदिनीपतितुङ्गमिदं भवेत् ।
दिनगणात्करतर्क[६२]विभाजितात् कुरु कलादिफलेन समन्वितम् ॥ २८ ॥

भाजितः खभुजगै[८०]र्दिनसङ्घो षस्रसंघरस[६]भागसमेतः ।
संयुतो गुण[३]गुणघ्युगणेन स्यात्कलादिरजनीपतिपातः ॥ २९ ॥

अहर्गणो द्वि[२]भाजितो लवा गुणै[३]र्गुणाः कलाः ।
गणाद्रिभू[१७]लवोनिता महीसुतोऽत्र जायते ॥ ३० ॥

गणो रस[६]घ्नः शरतर्क[६५]भक्तो लवादि वेद[४]घ्नगणान्वितं स्यात् ।
ज्ञोच्चं गजेभद्वि[२८८]हृताब्दखाङ्ग[६०]भागेन युक्तं विकलासु कार्यम् ॥ ३१ ॥

दिनगणेषु[५]हृतिः [४ क] कलिकादिको गणखसप्त[७०]लवाप्तकलोनितः ।
सुरगुरू रविवर्ग[१४४]समाहतेः खरस[६०]भागवियुग्विकलासु च ॥ ३२ ॥

गणाद्दश[१०]घ्नाच्छरबाणभूभी[१५५] रसै[६]श्च लब्धान्तरमंशकाद्यम् ।
सितोच्चमङ्गेन्दुकर[२१६]घ्नवर्षखाङ्गां[६०]शहीनं विकलासु कार्यम् ॥ ३३ ॥

---

१. लब्धहर्गणातो भास्करोक्तख्याख्यानयनोक्तवत् सर्वेषां प्रकाराणां वासना ज्ञेया ।

२
गणः करघ्नः कलिकादिकः स्यात्सौरिर्विलिप्ताः कलिकाशरांशः ।
२१६ ६०
नृपद्वि [द्वि ?] निघ्नाब्दखतर्कभागयुक्तं विधेयं च विलिप्तिकासु ॥ ३४ ॥

[इदानीं रेखापुराणि देशान्तरं चाह]—

[1]लङ्काकुरुक्षेत्रकदेवकन्याः सिताद्रिरौहीतकवत्सगुल्मम् ।
अवन्तिकापर्य्यलिगर्गराटकां[त्पः? च्यः] सुमेरुः क्षितिमध्यरेखा ॥३५॥

८०
[2]स्वदेशरेखान्तरयोजनघ्नो जवोऽभ्रमातङ्गविभाजनीयः ।
लब्धा विलिप्ता अखिलग्रहेषु कुर्याद्धनर्णं परपूर्वदेशे ॥ ३६ ॥

[ग्रहाणां दिनगतीराह]—

५९ ८ ७१० ३५
नवाक्षा भुजङ्गा रवेः पूर्णनन्दनगाः पञ्चरामा विधोश्चन्द्रतुङ्गे ।
६ ४१ ३ ११ ३१ २६
रसाश्चन्द्रवेदा गुणाश्चन्द्रचन्द्रा अगोर्भूगुणास्तर्कपक्षाः कुजस्य ॥ ३७ ॥

---

१. अत्र श्रीपतिः—

लङ्का कुमारी नगरी च काञ्ची पानाटमद्रिश्च सितः षडास्यः ।
श्रीवत्सगुल्मं च पुरी ततश्च माहिष्मती चोज्जयिनी प्रसिद्धा ॥
स्यादाश्रमोऽस्मान्नगरं सुरम्यं ततः पुरं पट्टशिवाभिधानम् ।
श्रीगर्गराटं च सरोहितार्द्धस्थानेश्वरं शीतगिरिः सुमेरुः ॥
इतीव याम्योत्तरगां धराया रेखामिमां गोलविदो वदन्ति ।
अन्यानि रेखास्थितिभाञ्जि लोके ज्ञेयानि तज्ज्ञैः पुटभेदनानि ॥

२. अत्राचार्येण स्पष्टभूपरिधिः ४८०० गृहीतः । ततोऽनुपातेन विकलादिकं देशान्तरसंबन्धि-
फलम् $= \frac{\text{गक} \times ६० \times \text{देयो}}{४८००} = \frac{\text{गक} \times \text{देयो}}{८०}$ अत उपपन्नं यथोक्तम् ।

शरयुगयम[२४५]तुल्या नेत्ररामा[३२] बुधोच्चे
शरमित[५]कलिकाः स्युर्देवपूज्ये षडङ्काः[१६]।
गजमित[८]विकलाः स्युर्भार्गवोच्चस्य मन्दे
गतिरिति कलिके द्वे लिप्तिका[1] द्योतिताद्यैः॥ ३८॥

सू	चं	चंतुं	पा	भौ	बुउ	गु	शुउ	श
५९	७१०	६	३	३१	२४५	५	१६	२
८	३५	४१	११	२६	३२	०	८	०

[इदानीं मध्यमाधिकारोपसंहारमाह]—

श्रीमन्नृसिंहात्मजरङ्गनाथविनिर्मिते खेचरसाधनेऽस्मिन्।
सिद्धान्तचूडामणिनामधेये मध्याधिकारः प[ध्व]रिपूर्त्तिमागात्॥ ३९॥

इति श्रीरङ्गनाथकृते सिद्धान्तचूडामणौ
मध्यमाधिकारः प्रथमः॥ १॥

१, लिप्तिका ग्रहाणां गतिकला—इत्यर्थः। ''वेगलिप्ता ग्रहाणाम्'' इति पाठः साधुः।

अथ स्पष्टाधिकारः

[तत्र ग्रहाणां मन्दोच्चान्याह]—

[२] नेत्रा[१७]त्यष्टि[२०]नखा रवेर्ग्रहमुखं मन्दोच्चकं [४] वेद[१०]दिग्

[५] बाणः स्यात्कुसुत[स्य] [७] सप्तक[१०][भुभः?दिशः] [३०] पूर्णाग्नयो ज्ञस्य च ।

जीवे [५] सायक[२१]मूर्च्छना[३०]ऽभ्रदहनाः शुक्रस्य [२] नेत्रे तथा

[१९] नन्दा[ज्वा?ज्जा] [५२] ब्धिशराः प्रभाकरसुते [७] सप्तो[२६]त्कृतिः [४०] खाब्धयः ॥ १ ॥

मन्दोच्चम्[1]—

सू	मं	बु	गु	शु	श
२	४	७	५	२	७
१७	१०	१०	२१	१९	२६
२०	५	३०	३०	५२	४०

[इदानीं मन्दकेन्द्रं साधयति]—

[2]त्र्यूनं भुजः स्यात् त्र्यधिकोनषड्भमङ्गोर्ध्वमङ्गोनितमर्कशुद्धम् ।
नवाधिकं चेत्तु यदुच्चशुद्धः खगस्तदाख्यं खलु केन्द्रमुक्तम् ॥ २ ॥

---

१. मन्दोच्चानां स्वल्पगतित्वादाचार्येण—"नेत्रात्यष्टिनखाः" इत्यादयः सूर्यादीनां स्थिरा मन्दोच्चांशाः पठिताः । शिष्यधीवृद्धिदे तु—"वस्वीशा दशबाहवोऽम्बरधृतिः खाङ्का रसत्र्यश्विनो मान्दांशाः''''भौमादीनाम् ॥ दिवाकरोच्चभुजगाचला''''''''''लवाः ।" इति, करणकुतूहले च—"मन्दोच्चमर्कस्य गजाद्रिभागा भौमादिकानां सदलाष्टसूर्याः । तत्त्वाश्विनः सार्द्धयमाद्रिचन्द्राः कष्टौ मतङ्गाग्नियमाः क्रमेण ॥" इति, ग्रहलाघवेऽपि—"सूर्यमन्दोच्चमष्टाद्रयोंशा भवेत् । शुद्धोऽब्ध्यद्रिषडग्निनागग्रहतः स्यान्मन्दकेन्द्रं कुजात् ।" इत्येवं विविधा मन्दोच्चांशा उपलभ्यन्ते ।

२. अत्र मन्दकेन्द्रानयनपूर्वकं भुजसाधनं प्रदर्शितमस्ति ।

अथ मन्दाङ्कानाह—

१७ ३४ ५० ६६ ८० ९३ १०४
'अत्य[ष्टि]यो वेदगुणाः खबाणाः षट्षट्खनागास्त्रिखगा युगाशाः ।
११३ १२१ १२६ १३० १३१
विश्वेन्दवो भूरवयोऽङ्गसूर्याः खत्रीन्दवः क्वग्निभुवोऽर्कमान्दम् ॥ ३ ॥

४० ७९ ११७ १५२
चन्द्रस्य मान्दं फलमभ्रवेदा गोसप्तसप्तेन्दुभुवोऽश्वितिथ्यः ।
१८९ २१४ २४० २६२
बाणाष्टचन्द्रा युगचन्द्रदस्राः खवेददस्रा यमतर्कदस्राः ।
२८० २९२ ३०० ३०२
खनागदस्रा यमनन्ददस्रा अभ्राभ्ररामा यमपूर्णरामाः ॥ ५ ॥

९३ १८२ २७० ३५२
मान्दं कुजे रामखगाः कराष्टचन्द्राः खताराः करबाणरामाः ।
४२६ ४९१ ५५२ ६०२
रसाश्विवेदाः [५ क] क्षितिनन्दवेदाः करेषुबाणाः करपूर्णतर्काः ।
६४२ ६६८ ६८७ ६९२
दस्राब्धितर्का गजतर्कतर्काः शराष्टतर्काः करनन्दतर्काः ॥ ६ ॥

३८ ७३ १०८ १४० १६८ १९३
नागाग्नयो रामनगा गजाशाः खेन्द्रा गजाष्टिर्गुणनन्दचन्द्राः ।
२१७ २३३ २४८ २५९
अत्यष्टिदस्रा गुणरामदस्रा नागाब्धिदस्रा नवबाणदस्राः ।
२६६ २६८
तर्काङ्गदस्रा गजतर्कदस्रा बुधस्य मान्दं फलमुक्तमेतत् ॥ ८ ॥

४० ८० ११८ १५५ १९०
पूर्णाब्धयः पूर्णगजा गजेशाः पञ्चेषुचन्द्रा गगनाङ्कचन्द्राः ।
२१५ २४४ २६३ २८०
पञ्चेन्दुदस्राः कृतवेददस्रा रामाङ्गदस्राः खभुजङ्गदस्राः ।
२९६ ३०४ ३०६
रसाङ्कदस्रा युगपूर्णरामास्तर्काभ्ररामाश्च गुरोर्मृदुः स्यात् ॥ ९ ॥

१५ २९ ४३ ५५ ६६ ७६
बाणेन्दवो नन्दयमास्त्रिवेदाः शराशुगास्तर्करसा रसागाः ।

---

१. इतः प्रभृति श्लोकेषु मन्दफलसाधनार्थं सूर्यादीनां मन्दफलाङ्का मन्दकेन्द्रस्य सार्धसप्तभागवृद्ध्या प्रसाध्य पठिताः सन्ति ।

८५ ९३ ९८ १०२
'सुपूर्विकाष्टौ गुणनन्दतुल्या मातङ्गनन्दाः करपङ्क्तयश्च'।
१०४ १०५
वेदाभ्रसोमाः शरपङ्क्तयश्च शुक्रस्य मान्दं फलमेतदुक्तम् ॥ ११ ॥
६० ११९ १७७ २३२ २८२
षष्टिर्ग्रहेशा नगसप्तसोमा दस्राग्निदस्रा यमनागदस्राः।
३३० ३६२ ४०५ ४२८
खरामरामा यमतर्करामाः प[ञ्च]खाभ्रवेदा गजदस्रवेदाः।
४५४ ४६४ ४६०
वेदेषुवेदा युगतर्कवेदाः खतर्कवेदाश्च शनेर्मृदुः स्यात् ॥ १२ ॥

[अथ ग्रहाणां मान्दाङ्काः]—

मान्दम्	०	१	२	३	४	५	६	७	८	९	१०	११	१२
सू.	०	१७	३४	५०	६६	८०	९३	१०४	११३	१२१	१२६	१३०	१३१
चं.	०	४०	७९	११७	१५२	१८५	२१४	२४०	२६२	२८०	२९२	३००	३०२
मं.	०	९३	१८२	२७०	३५२	४२६	४९१	५५२	६०२	६४२	६६८	६८५	६९२
बु.	०	३८	७३	१०८	१४०	१६८	१९३	२१७	२३३	२४८	२५९	२६६	२६८
गु.	०	४०	८०	११८	१५५	१९०	२१५	२४४	२६३	२८०	२९६	३०४	३०६
शु.	०	१५	२९	४३	५५	६६	७६	८५	९३	९८	१०२	१०४	१०५
श.	०	६०	११९	१७७	२३२	२८२	३३०	३६२	४०५	४२८	४५४	४६४	४६०

---

१. सुपूर्विकाशब्देनात्र पञ्च गृह्यन्ते। "उक्तात्युक्ता तथा मध्या प्रतिष्ठान्या सुपूर्विका। गायत्र्युष्णिगनुष्टुप् च बृहती पङ्क्तिरेव च" इत्यनुक्रमोक्तेषु पञ्चमं छन्दः सुपूर्विका।

२. पङ्क्तिः दशेत्यर्थः। "पङ्क्तिश्छन्दोऽपि दशमम्" इत्यमरोक्त्या पूर्वोक्तच्छन्दक्रमतश्च पङ्क्तिशब्देन दश आचार्याभिप्रेताः।

[इदानीं मन्दफलं साधयति]—

स्यान्मन्दकेन्द्रोद्भवबाहुलिप्ताः खबाणवेदै[४५०]र्विहृता गताङ्कः ।
यातैष्यकाङ्कान्तरशेषघातात्खेषुवब्धि[४५०]भागेन युतोऽत्र मान्दम् ॥ १३ ॥
[1]कलादिकं स्यादथ तद्धनर्णं कार्यं ग्रहे मेषतुलादिकेन्द्रे ।
स्पष्टौ रवीन्दू मृदुना फलेन भौमादयस्तेन मृदुस्फुटाः स्युः ॥ १४ ॥

[इदानीं सूर्यचन्द्रयोर्भुजान्तरं साधयति]—

[1]सूर्यस्य मान्दं रसभक्तम[६]र्के लब्धा विलिप्ता मृदुवत्प्रदेयाः ।
मध्ये विधौ सूर्यफलं भभक्तं[२७] फलं कलाद्यं रविवद्धि दद्यात् ॥ १५ ॥

---

१. आचार्येणैकस्मिन् पादे द्वादशमान्दाङ्काः पठिताः । अतो नवत्यंशकलासु ९०×६०= ५४०० द्वादशभाजितासु ४५० कला लभ्यन्ते । अतः सार्धसप्तभागान्तरवृद्ध्या मान्दाङ्काः साधिताः सन्ति । अभीष्टस्थानीयमान्दाङ्कसाधनार्थमनुपातो यदि ४५० कलाभिरेको मान्दाङ्को लभ्यते तदाऽभीष्टचापकलाभिः किमिति लब्धम् ? गताङ्कः । शेषकलासंबन्धि-फलानयनाय पुनरनुपातो यदि ४५० आभिः कलाभिर्यातैष्यमान्दाङ्कान्तरं लभ्यते तदा शेषकलाभिः किमिति लब्धं गताङ्के योजनेनाऽभीष्टमन्दफलकला भवन्तीत्युपपन्नम् । फल-संस्कारः स्पष्ट एव ।

१. मन्दफलकला एव मन्दफलोत्थासव आचार्येण गृहीताः । ततः सूर्ये भुजान्तरार्थमनु-पातः । यद्यहोरात्रासुभिर्गतिकला लभ्यन्ते तदा मन्दफलोत्थासुभिः किमिति लब्धाः कलाः षष्टिगुणिता विकलाः $= \frac{६०\times\text{मंफक}\times६०}{२१६००} = \frac{\text{मंफ}}{६}$ =भुजान्तरसंस्कारः । अत्र रविगतिः ६० गृहीता स्वल्पान्तरतः । चन्द्रस्य भुजान्तरसंस्कारो ग्रहलाघवोक्तदिशा ज्ञेयः । तथैव ग्रहे धनर्णमपि ।

[इदानीं पलभामानीय चरखण्डान्याह]—

पुराऽयनांशोत्थदिनैः क्रियस्य[1] संक्रान्तिकालाद्दिवसार्धजाभा ।

पलप्रभा स्याच्चरखण्डकानि दिङ्[10]नाग[8]सत्र्यं[श][3।20]गुणैर्गुणा सा ॥ १६ ॥

[इदानीं चरानयनमाह]—

सायना[र्क]र्कभुजराशिमितैक्यं भोग्यभागहतिखाग्नि[30]लवेन ।

युक्चरं क्रिय[1]तुला[7]रस[6]भेऽस्वं स्वं रवौ च विपरीतमथास्ते ॥ १७ ॥

[इदानीं चरसंस्कारं साधयति]—

[1]चरस्य नाड्यः कलिकासु सूर्ये मध्ये विधौ विश्व[13]हताः प्रदेयाः ।

[इदानीमयनांशानयनमाह]—

[2]भूदस्रवेदो[421]नशकस्त्रि[3]निघ्नः खपूर्णदस्रै[200]र्विहृतोऽयनांशाः ॥ १८ ॥

---

१. पूर्वसाधितचरपलस्य घटिकाः कार्याः । ततो रवौ चरसंस्कारार्थमनुपातो यदि षष्टि ६० घटिकाभिर्गतिकला लभ्यन्ते तदा चरघटिभिः किमिति लब्धाः कलाः $= \frac{\text{रग} \times \text{चरघ}}{६०} = \frac{६० \times \text{चरघ}}{६०} =$ चरघ । अत्र रविगतिः ६० कल्पिता । ततश्चन्द्रे चरसंस्कारार्थमनुपातो यदि रविगतिकलाभी रविचरसंस्कारो लभ्यते तदा चन्द्रगतिकलाभिः किमिति लब्धाः चरकलाः $= \frac{\text{चंगक} \times \text{रचंक}}{\text{रगक}} = \frac{(७९० \mid ३५)\ \text{रचंक}}{५९ \mid ८} = १३ \times \text{रचंक}$ स्वल्पान्तरतः ।

२. सौरमते ४२१ शककालेऽयनांशाभाव आसीत् । ततः प्रभृति वार्षिकगत्याऽयनांशवृद्धिरस्ति । तत्रायनवार्षिकगतिः ५४ विकलाः । तया ४२१ शकतोऽभीष्टशकपर्यन्तव्यतीतवर्षाणि गुण्यन्ते तदाऽभीष्टवर्षारम्भ इष्टायनविकला लभ्यन्ते । ताश्च षष्टिवर्गं ३६०० भाजिता अयनांशा भवन्ति । तद्यथा$= \frac{५४ \times \text{इवर्षगण}}{३६००} = \frac{३ \times \text{इवर्षगण}}{२००} =$ अयनांशाः । इत्युपपन्नम् ।

[इदानीं ग्रहाणां मन्दस्पष्टगतिसाधनमाह]—

७८४

[1]ग्लौ केन्द्रभुक्तिर्युगनागशैला भवेत् परेषां स्वगतिः कलाद्या ।

४५०

मान्दाङ्कविश्लेषहताऽभ्रबाणवेदैर्हृता सा कलिकादि यत्तत् ॥ १६ ॥

४　１०

[2]स्वर्णं फलं कर्किमृगादिकेन्द्रे स्वमध्यभुक्तौ क्रमशो विधेयम् ।

---

१. मन्दोच्चोनग्रहो मन्दकेन्द्रम् । अतः चंमग—चंउग=चन्द्रमन्दकेन्द्रगतिः = ७९०।३५—६।०=७८४।३५=७८४ स्वल्पान्तरतः। अन्येषां मध्यगतितुल्यैव स्वल्पान्तरतः केन्द्रगतिः कल्पिता । ततोऽनुपातेन मन्दगतिफलं साधितम् । ४५० कलावृद्ध्या मन्दफलाङ्काः पठिताः । अतोऽनुपातो यदि ४५० कलाभिर्गतैष्यमान्दाङ्कान्तरं लभ्यते तदा केन्द्रगतिकलाभिः किमिति लब्धं मन्दगतिफलम्= $\frac{\text{मान्दाङ्कान्तर} \times \text{मंकेग}}{४५०}$ । गतिफलसंस्कारादिकं सिद्धान्तशिरोमणिवत् स्पष्टम् ।

२. मन्दकेन्द्रकल्पनायां मतभेदः । अत्र लल्लभास्करज्ञानराजप्रभृतीनामैकमत्यम्, सूर्यसिद्धान्तग्रहलाघवयोस्तु भिन्नमतम् । लल्लादयो मृदूच्चेन हीनो ग्रहो मन्दकेन्द्रमित्यामनन्ति । तथा हि—"मन्दोच्चभागरहितग्रहबाहुमौर्व्या……" इति लल्लः, "मृदूच्चेन हीनो ग्रहो मन्दकेन्द्रम्………" इति भास्करः, "मान्दं केन्दं मन्दतुङ्गोनखेट………" इति ज्ञानराजः । अपि च—"ग्रहं संशोध्य मन्दोच्चात्………" इति सूर्यसिद्धान्तः, "मन्दोच्चं ग्रहवर्जितं निगदितं केन्द्रं तदाख्यं बुधैः………इति ग्रहलाघवश्च । अत्रैव च मन्दकेन्द्रानयने रङ्गनाथाचार्येण—"यदुच्चशुद्धः खगस्तदाख्यं खलु केन्द्रमुक्तम्" इत्युक्तम् । अत्र समासभेदात् पूर्वोक्तमतद्वयानुकूलं मन्दकेन्द्रं साधयितुं शक्यते । परं वस्तुत आचार्यस्य सौरमतानुकूलं ग्रहोनोच्चमेव मन्दकेन्द्रमभिमतम् । एतादृश्यां मन्दकेन्द्रस्य कल्पनायां मन्दगतिफलसंस्कारे स्फुटतानवबोधः प्रतीयते । अत एव ग्रहलाघवोपपत्तौ मल्लारिणा स्पष्टमुक्तम्—"अथ धनर्णोपपत्तिः । तत्र तावदुच्चोनो ग्रहः केन्द्रमित्यस्मिन् (लल्लादीनां) पक्षे मकरादिकेन्द्रे ग्रहस्य धनफलस्यापचयान्मृगादिकेन्द्रे गतिफलमृणं वर्धते । मेषादिकेन्द्रे ग्रहस्य ऋणफलवृद्धौ सत्यां गतिफलमृणमपचीयते । अतो मृगादिके षड्भे

गतिर्भवेत्पुष्पवतोः स्फुटा सा भौमादिकानां तु मृदुस्फुटा स्यात् ॥ २० ॥

[1]यद् ज्ञानराजादिभिरत्र केन्द्रे धनं मृगादावथ (१०) कर्कटादौ (४)।

ऋणं फलं मन्दगतेर्निरुक्तं तत् तुच्छमेवेति वयं वदामः ॥ २१ ॥

अथ शीघ्रफलसाधनम्—

वेदा[ज्व?ब्ज]नागा (८१४) युगतर्कशक्राः (१४६४) सूर्याङ्कचन्द्राः (१६१२) कुवनेन्दुदस्राः (२१६१)।

वेदाब्धिरामाश्विमिताः (२३४४) खगाभ्रजिनाश्च (२४०६) रामेन्दुजिनाः (२४१३) क्रमात्स्युः ॥ २२ ॥

केन्द्रे गतिफलमृणम् । कर्क्यादिकेन्द्रे ग्रहस्य ऋणफलह्रासे गतेर्धनफलं वर्धते । तुलादित्रये केन्द्रे ग्रहधनफलवृद्धौ गतेः फलमपचीयते । अतः कर्कादिषड्भे धनमिति युक्तम् । ग्रहोनमुच्चं केन्द्रमित्यस्मिन्नपि (सूर्यसिद्धान्तादीनां) पक्षे मकरादित्रिके ऋणफलवृद्धिर्मेषादित्रिके धनफलह्रासः । अतो मकरादिषड्भे गतिफलमृणमेव । एवं कर्क्यादिषट्के धनमिति । अतो युक्तियुक्तं धनर्णं केन्द्रे कुलीरमृगषट्कगतः" इति । एवमेव सूर्यसिद्धान्तोपपत्तौ श्रीसुधाकरद्विवेदिभिरप्युक्तम्—"एवमद्यतनश्वस्तनग्रहफलयोरन्तरं तद्गतेः फलं कर्क्यादिकेन्द्रे ग्रहर्णफलस्यापचीयमानत्वात् तुलादौ धनफलस्योपचीयमानत्वाद्धनम् । मकरादौ तु धनफलस्यापचीयमानत्वान्मेषादावृणफलस्योपचीयमानत्वादृणमिति धनर्णोपपत्तिर्भास्करोक्तैवात्र समीचीना बोध्या" इति ।

१. अत्र श्लोक आचार्येण मन्दगतिफलसंस्कारे ज्ञानराजमतमखण्डि । आचार्यदृष्टौ मकरादिकेन्द्रे मन्दगतिफलं धनं कर्कादिकेन्द्र ऋणमिति ज्ञानराजमतमाभाति । परमत्राचार्याणां भ्रान्तिः । वस्तुतो ज्ञानराजमतमेतन्नास्ति । आचार्येणान्यथैव प्रकल्प्य खण्डितम् । ज्ञानराजमतेऽपि मकरादिकेन्द्रे मन्दगतिफलम् ऋणं कर्कटादिकेन्द्रे धनमिति । तथा चोक्तम्—

नक्रकर्किमुखकेन्द्रतः फलेनोनयुङ्निजगतिर्मृदुस्फुटा ।
तां विशोध्य चलतुङ्गभुक्तितः शेषमत्र चलकेन्द्रजा गतिः ॥ इति ।

[सिद्धान्तसुन्दरस्फुटगतिसाधनाध्याये, श्लो०२६]

सारस्वत्यां सुषमायां प्रकाशिता ग्रन्थाः

१. प्रत्याख्यानसंग्रहः (व्याकरणम्) नागेशभट्टप्रणीतः । श्रीसूर्यनारायणशुक्ल- श्री अनन्तशास्त्रिफडके-श्रीदेवदत्तशर्मोपाध्यायैः संपादितः ।

२. सुवर्णमुक्तासंवादः (लघुकाव्यम्) श्रीमद्देशमनीषिणा विरचितः । खिस्तेश्रीबटुकनाथशास्त्रिणा साहित्याचार्येण संपादितः ।

३. पथिकजनपातकचिन्तनस्मृतिः (यात्रावर्णनम्) महेश्वरभट्टप्रणीता । श्रीब्रजवल्लभद्विवेदेन दर्शनाचार्येण संपादिता ।

प्रकाश्यन्ते

४. काण्वसंहिताभाष्यसंग्रहः (वेदः) आनन्दबोधभट्टोपाध्यायप्रणीतः । डा० सुभद्रझा-ब्रजवल्लभद्विवेदाभ्यां संपादितः ।

५. प्रत्यङ्गिरासूक्तम् (पिप्पलादशाखीयम्) (वेदः) वासुदेवद्विवेदविरचितव्याख्यानसंहितम् । डा० सुभद्रझा-ब्रजवल्लभद्विवेदाभ्यां संपादितम् ।

६. बीजगणितावतंसः (गणितज्यौतिषम्) नारायणपण्डितविरचितः । श्रीचन्द्रभानुपाण्डेयेन ज्योतिषाचार्येण संपादितः ।

७. सिद्धान्तचूडामणिः (सिद्धान्तज्यौतिषम्) रङ्गनाथभट्टविरचितः । संपादकः—श्रीमीठालाल ओझा, ज्यौतिषाचार्यः ।

Published by the Superintendent, Printing and Stationery, U.P. Allahadad.
मुद्रक— परेशनाथ घोष, सरला प्रेस, बाँसफाटक, बनारस-१